1183

Muhurtha martenda satik

।अथमुहूर्त्तमार्तंडसटीकप्रारंभः ॥ श्रीः ॥
।सदाशिवार्पणमस्तु ॥ हरयेनमः ॥

9/19

Td 155

19

श्रीगणेशायनमः॥ हरिः ओं॥ मार्तंडोवतुवाचंनः पादैर्जाड्यतमोहरः॥ वृत्तबद्धतनुः सेव्योभीष्टदोविश्वलोचनः॥ १॥ अर्थद्व
यशाली॥ तत्रप्रथमंसूर्यपक्षे। मार्तंडः सूर्यः नोऽस्माकं वाचंअवतु। किंलक्षणोमार्तंडः। वृत्तबद्धतनुः॥ वृत्तेमंडलेबद्धा
तनुर्येनसतथा॥ तथाचस्मृतौ॥ सशंखचक्रंरविमंडलेस्थितंकुशेशयाक्रांतमनंतमच्युतमित्यादि। श्रुतिरपि। एषएतस्मिन्मंडले
पुरुषःसोग्निरित्यादि। पुनःकिंलक्षणः। पादैःकिरणैःजाड्यतमोहरः। जाड्यंपातकराशीनमंधकारः। तद्धरतीतितथा। पुनःकथंभूतः।
सेव्यः। सेवितुंयोग्यःसेव्यः। अभीष्टफलदातृत्वात्। पुनःकिंलक्षणः। अभीष्टदःसेवितःसन्नभीष्टार्थदायीत्यर्थः। पुनःकिंलक्षणः।
विश्वलोचनः विश्वंलोक्यतेयेनेतिविश्वलोचनः। लोकचक्षुर्ग्रहेश्वरः। इत्यादित्यहृदयेउक्तत्वात्। प्रकाशकत्वात्। अथग्रंथपक्षे।
मार्तंडोमुहूर्तमार्तंडः। नःवाचंअवतु। किंलक्षणः। वृत्तबद्धतनुः। वृत्तानिप्रहर्षिणीशार्दूलविक्रीडितादीनि। तैर्बद्धातनुर्यस्यसतथा।
पुनःकथंभूतः। पादैर्जाड्यतमोहरः। पादैर्वृत्तचरणैः। जाड्यंमूर्खत्वंतदेवतमः। तद्धरतीतितथा। पुनःकिंलक्षणः। सेव्यः निरंतरंपठनीयइ
त्यर्थः। पुनःकिंलक्षणः। अभीष्टदः। यथोक्तमुहूर्तेकृत्यकरणादभीष्टार्थसिद्धिकारीत्यर्थः। पुनःकिंलक्षणः। विश्वलोचनः। समयप्रकाश
कत्वात्॥ १॥ कुर्वेमुहूर्तमार्तंडटीकांमार्तंडवल्लभां। इयमाकल्पमेतेनदीव्याद्विप्रास्यवेश्मसु॥ २॥ इहशास्त्रेतावत्संबंधाभिधेयप्रयोज
नान्युच्यंते। आब्रह्मादिविनिःसृतमिदंवेदांगमितिसंबंधः। उक्तंचनारदमुनिनास्वसंहितायां। वेदस्यनिर्मलंचक्षुर्ज्योतिःशास्त्र
मनुत्तमं। अस्यशास्त्रस्यसंबंधोवेदांगमितिधातृतइति। अत्राप्युक्तं। पूर्ववाक्यार्थमादायग्रंथोयंरचितोलघुरिति। त्याज्जनस
नोद्वेतुलग्नंगोचरगर्भाधानादिसंस्कारविवाहाग्न्याधानवास्तुयात्राभिश्रानध्यायपल्लीग्रहगोचरसंक्रांतिकथनमभिधेयं॥ १

तथा च नारदः। अभिधेयं च जगतः शुभाशुभरूपणमिति। अस्य प्रयोजनं मुहूर्तैर्नानाकार्यसाधनं। अस्य संम्यक्ज्ञानान्मोक्षावाप्तिरि
ति वा। किमेभिरुक्तैरित्युच्यते। न्टणां संबंधाभिधेयप्रयोजनकथनाच्छास्त्रे प्रवृत्तिर्जायते। सिद्धिः श्रोतृप्रवृत्तीनां संबंधकथनाद्यतः।
तस्मात्सर्वेषु शास्त्रेषु संबंधः पूर्व उच्यते। किमेवात्राभिधेयं स्यादिति पृष्टस्तु केनचित्। यदि न प्रोच्यते तस्मै फलं स्यान्तु लड्डवेत्। सर्वस्यै
व हि शास्त्रस्य कर्मणो वापि कस्यचित्। यावत्प्रयोजनं नोक्तं तावत्केन प्रगृह्यते इति। इति शास्त्रे कस्याधिकार इति प्रोच्यते। द्विजस्यैव वेदां
गत्वात्। यतः षडंगो वेदो द्विजैरेवाध्यापनीयो ज्ञातव्यश्च। तथा चोक्तं भास्करीयसिद्धांतशिरोमणौ। तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं पर
मं पवित्रं। यो ज्योतिषं वेद नरः स सम्यग्धर्मार्थमोक्षांल्लभते यशश्चेति। शिष्टास्तावच्छास्त्रारंभे सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः।
इति शास्त्रेण सर्वारंभे षंतरायप्राप्तौ सत्यां धर्मेण पापमपनुदतीति श्रुतिनिर्विघ्नप्रयोजनमास्थाय। स्वस्ति न इंद्रो वृद्धश्रवा इति श्रुति
लिंगाच्च ग्रंथस्यादितः प्रत्यूहपरिसमाप्तये मंगलमाचरंति। तस्मान्माध्यंदिनीयो ब्राह्मणो नारायणो नारायणरूपावाप्तमतिर्ज्योतिः
शास्त्रसंहितास्कंधं चिकीर्षुरशेषप्रत्यूहोपशांतये अभिमतदेवतानमस्कारलक्षणमंगलपूर्वकं ग्रंथकरणप्रतिज्ञां प्रकटयिष्यन्नाह॥ ॥
सिंदूरोल्लसितमिभेंद्रवक्त्रमंबां श्रीविष्णुं वियति चरान्गुरून्प्रणम्य॥ बह्वर्थं विबुधमुदे लघुं मुहूर्तमार्तंडं सुगममहं तनोमि सिध्ये॥१॥
सिंदूरेण उल्लसितं शोभायमानं इभेंद्रवक्त्रं गजाननं अंबां सरस्वतीं। श्रीविष्णुं प्रसिद्धं। वियति चरान् ग्रहान्। गुरून् निजगुरून् शास्त्रोप
देष्टॄन् प्रणम्य नमस्कृत्याहं नारायणो मुहूर्तमार्तंडनामग्रंथं तनोमि विस्तारयामि। किमर्थं सि[...]ह्येकार्यसाधनाय। पुनः किमर्थं विबु
धमुदे पंडितहर्षाय। हर्षकारणं विशेषणद्वारेणाह॥ किंलक्षणं मुहूर्तमार्तंडं। लघुं अतिशयेनाल्पं। पूर्वाचार्यग्रंथाथैस्त्वल्पास्तैः केवलैः
कार्यसिद्धिर्न भवति। ये महांतो ग्रंथास्ते पठितुमशक्याः अयं ग्रंथोऽल्पः कार्यसाधकश्च। अल्पे बह्वर्थाभावशंकां विशेषणद्वारा परि
णं हरति। पुनः किंलक्षं। बह्वर्थं। अर्थबहुलं। अल्पग्रंथे बह्वर्थे दुर्बोध[...]शंकां परिहरति। पुनः किंलक्षणं। सुगमं। प्रकटार्थमिति॥१॥

अथनानामुहूर्तान्विवक्षुस्तावच्छुभेकर्मणित्याज्यांस्त्रिभिःशार्दूलविक्रीडितैराह। यामार्धंकुलिकंदिनक्षयमवमंपूर्वेंदलंपारिघंविष्टिंवैधृति
पातसंक्रमगण्डांतभेकार्गलं। कृष्णान्तंगचतुर्दिनंरविशशिक्रांत्योःसमत्वंखलांहोरांरात्रिदिनार्धकेक्षयदिनंपित्रोर्जनन्यार्तवं। २
मासाद्यंजनिसंभवंग्रहणभंचंद्रायुधंदुःक्षणंज्येष्ठंपूर्वभवस्यपापयुगितंष्यर्क्षाणिविस्थंचभं। ऊनाख्याधिकमासकौयुतिषुविव्याघ्र
वगंडातिषु त्र्यं ३ कौ ९ थों ५ क ९ रस ६ तु ६ पूर्वघटिकाभानांविषाख्याघटीः॥ ३॥ लत्तापंचकपापवर्गभमथभंचंद्रदशारिष्टकंजन्मेशे
ज्यसितास्तमंगशशिनोःक्रूरोडुवांकर्तरीं। रिष्टंगोचरसंभवंग्रहजनिप्रांतोडुवंस्तनकंदुश्चिक्यानिमनो[illegible]विभंगमपिचव्या
धिंशुभेसंत्यजेत्॥ ४॥ यामार्धादिकंशुभेकर्मणिसंत्यजेत्। इत्यंतिमश्लोकेनान्वयः॥ किंतत् यामार्धेत्यादि। यामार्धकुलिको
वक्ष्यमाणलक्षणोदिनक्षयोनामयत्रतिथिःसूर्योदयात्षष्टिघटिकाभवति। सैवान्यस्मिन्दिनेदृश्यतेसादिनक्षयः। अवमःप्र
सिद्धिः। पारि[illegible]श्चोघंन्दलं पारिघयोगस्यपूर्वार्धं। विष्टिर्भद्रावक्ष्यमाणा। वैधृतिर्योगः। पातोव्यतिपातः। संक्रमणंसूर्यादीनांराशिसंक्र
मणंसर्वेषांग्रहाणांसंक्रमणेत्याज्यघटिकाअग्रेवक्ष्यमाणाः। एकार्गलोवक्ष्यमाणः। कृष्णान्तंचैगंतुर्दिनं। कृष्णत्रयोदश्यादिप्रति
पदंतं। चंद्रस्यक्षीणत्वात्। केचित्तुहूदश्यादिसार्धदिनपंचकंसत्यजंति। कृष्णेचांत्यत्रिकंकेचित्। तेषुमध्यमोर्थपक्षोत्रांगीकृतः। कृष्णा
नं गचतुर्दिनैरविशशि॥ मिति॥ क्रांत्योःसमत्वंसूर्यचंद्रमसोःक्रांतिसाम्यंगणितगम्यं। तथापितस्यावलोकनंकस्मिन्दिनेकर्तव्य
मित्यग्रेवक्ष्यति। खलांहोरांपापग्रहहोरां। रात्रिदिनार्धके। दिनार्धेरात्र्यर्धेच। उक्तंग्रंथांतरे। मुहूर्तेकालोनिवसतिमहानिशायांच
दिनदलेषस्मात्। दशपूर्वंदशपरतस्तस्माद्वर्ज्यानिचपलानीति। क्षयदिनंपित्रोः मातापितापितरोतयोःक्षयाहनंश्राधदिनमित्यर्थः
।जनन्यार्तवंमातुरजस्वलात्। मासाद्यंजनिसंभवं। जनिरुत्पत्तिः तत्संभवोयस्येयंविधंमासाद्यंमासप्रभृति। जन्ममासजन्मतिथिज

क्रांतिपातोव्यतीपातोवैधृतिःपरिघार्धकं।भानोःसंक्रांतिभो[illegible]गश्चकुलिकश्चार्धयामकः।क्रूरैर्मुक्तंयुतंभोग्यंसराहुशिखिधूमितं।धिष्ण्यंग्र
ग्रहणगंपापैर्विद्धंसौम्यैश्च[illegible]पादतः।विष्टिःक्रूरयुतंलग्नंलग्नेशारिपुमस्तगः।जन्मतोदुःस्थितश्चंद्रोलग्नस्थोनिधनोपगः।जन्मभाज्ज
न्मलग्नाच्चलग्नलग्नांशकाष्टमौ।पापयोर्मध्यगंलग्नंक्षीणेंदुःकुनवांशकः।क्रूरवारेपापहोरादुष्ट[illegible]योगाग्रहोद्भवाः।तिथिर्दग्धसंयोगभा
नोनाडिकाविषसंज्ञिताः।एतेदोषाःसमाख्याताःशुभकर्मणिगर्हिताः।दशारिष्टोद्भवाश्चान्येगोचरेस्थात्तथापरे।लत्तैकार्गल[illegible]चंडाश्च
कालवेलाश्चपंचकं।मृत्युयोगोपग्रहाद्याःस्वेस्वेदेशेतुनिंदिताइति।अथोपग्रहांतवर्तिदोषांतरंवृत्तार्धेनाह।नोकुयोङ्विभाद्गेंद्रधृति
नोयुग्मेषुपंचाशयोः।७।८।१४।१५।१०।१९।५।१०।स्वर्गासंवसू।२१।२२।२३।२४।२५।शोभनानितनुयादिषुग्रहशास्त्रादिकं।मासतो
यनवारयोगतिथिभाशिनांचसिद्धाभिधाज्ञातव्याःपुनरुक्तिरस्तिकुहचित्ससातत्स्मृतिप्राप्तये।।५।।नोकुयोङ्विभादि।सूर्याधिष्ठित
नक्षत्रादि।अगेंद्रधृतिमितानियानिनक्षत्राणितेभ्योयुग्मेषु।सप्तमाष्टमयोः चतुर्दशपंचदशयोःअष्टादशैकोनविंशयोरिति।
तथापंचाशयोः रविनक्षत्रात्संचदशमयोः।तथास्वर्गासंवसुनक्षत्रेषु।२१।२२।२३।२४।२५।शोभनानिकर्माणिनोकुर्यात।
एषुग्रहशास्त्रादिकंनतनुयाद्विस्तारयेत्कुर्यादित्यर्थः।उक्तंच।विद्धसंचमभेक्षितेश्चचक्रनंस्यात्सप्तमेसूर्यभाद्धलश्चाष्टमभे
शानिश्चदशमेकेतुस्तथाष्टादशे।इंद्रःपंचदशेचतुर्दशइहप्रोक्तेनिपातोबुधैरुल्काकालविदांगणेनिगदितोवैकोनविंशे
र्कभादिति।दैवज्ञवल्लभेपि।कर्मशोमोहनिर्घातभूकंपावज्रएवच।परिवेषश्चविज्ञेयानक्षत्रादेकविंशतेः।एतेष्विंदुसमेतेषुकु ३
र्यात्कर्मनशोभनं।दहनास्त्रेविधेसाध्यंयत्तत्सिद्धिमुपैतिचेति।अन्यानपिदोषान्।अग्रेप्रसंगतोवक्ष्यामि।अथास्मिन्ग्रंथे

मासादीनांसंज्ञालोकप्रसिद्धाज्ञेयाइतितथापुनरुक्तिनिर्दूषणंवृत्तार्धेनाह।मासर्त्वयनेति।मासाश्चैत्रादयः।ऋतवोवसंतादयः।
अयनेएवायनेदक्षिणोत्तरे।वाराःसूर्यादयः।योगाःविष्कंभादयः।तिथयःप्रतिपदादयः।भान्यश्विन्यादीनि।इत्यादीनांकरणराशिज्ञानां
सिद्धाभिधाःशास्त्रांतरसिद्धाःसंज्ञाज्ञातव्याः।तथाइहास्मिन्ग्रंथेकुहचित्पुनरुक्तिर्वर्तते।सातस्यदूरांतरितस्यस्मृतिप्राप्त्यर्थस्म
रणार्थेतिनदोषः।।५।।इतिश्रीकृतमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांत्याज्यप्रकरणं।। ।।अथसाधारणंनक्षत्रप्रकरणंविव
क्षुरादौनक्षत्रदेवताश्लोकेनाह।।अस्मिन्प्रकरणेसर्वाणिशार्दूलविक्रीडितानि।।भेशादस्त्रयमाग्निकेंदुगिरिशाःप्रोक्ताअदितिर्
गिरःसर्पाःकव्यभुजोभगोर्यमरवीत्वष्टासमीरःक्रमात्।।इंद्राग्नीत्वथमित्रइंद्रनिर्ऋतीनीरंचविश्वेविधिर्वैकुंठोवसुपाश्यजै
कचरणाहिर्बुध्न्यपूषाभि[illegible]धाः।।६।।अश्विन्याःसकाशात्क्रमशोभेशाबुधैःप्रोक्ताइत्यन्वयः।भानांनक्षत्राणांईशाःस्वामि
नः।दस्रोअश्विन्याः।यमोभरण्याः।अग्निःकृत्तिकायाः।कोब्रह्मारोहिण्याः।इंदुर्मृगस्य।।गिरिशोमहादेवआर्द्रायाः।अदितिः
पुनर्वसोः।अंगिरागुरुःपुष्यस्य।पंनगाःसर्पाःआश्ले[illegible]षायाः।कव्यभुजःपितरोमघायाः।भगःपूर्वाफ[illegible]ल्गुन्याः।अर्यमाउत्त
राफल्गुन्याः।रविर्हस्तस्य।त्वष्टाचित्रायाः।समीरोवायुःस्वात्याः।इंद्राग्नीदेवताद्वयंविशाखायाः।मित्रोनुराधायाः।इंद्रोज्येष्ठा
याः।निर्ऋतीराक्षसोमूलस्य।नीरंजलंपूर्वाषाढायाः।विश्वेउत्तराषाढायाः।विधिर्ब्रह्माअभिजितः।वैकुंठोविष्णुःश्रवणस्य।वसु
अ वोधनिष्ठायाः।पाशीवरुणःशततारकायाः।अजैकचरणःपूर्वाभाद्रपदायाः।अहिर्बु[illegible]ध्न्यउत्तराभाद्रपदायाः।पूषारेवत्याः।
देवताप्रयोजनंनक्षत्रसंज्ञानार्थंशांतिकार्येयजनार्थंच।अथनक्षत्राणांस्थिरचरादिसंज्ञास्तत्प्रयोजनंचसार्धवृत्तेनाह।। ।।

मु०मा०टी० ब्राह्म्यं त्र्युत्तरयुग्ध्रुवं स्थिरमथो पूर्वामघायाम्य भं क्रूरोग्रं श्रवणत्रयादितियुतास्वाती चराख्यं चलं। हस्तार्काभिजिदीज्यभं ल
घु तथा क्षिप्रं चमैत्रांतिमैंदुत्वाष्ट्रं मृदु मैत्रमग्निभविशे मिश्रं च साधारणे॥७॥ ब्राह्म्यं रोहिणी। किंलक्षणं ब्राह्म्यं। त्र्युत्तर
५ युक्। तिसृणामुत्तराणां समाहारस्त्र्युत्तरं तेन युक् त्र्युक्तं। ध्रुवं स्थिरमिति। ह्यभिधानं मुनींद्रैः स्मृतमित्यन्वयः। अथो पूर्वामघायाम्य
भरणीमिति पंचकं क्रूरोग्रं क्रूरं उग्रं चोक्तं। श्रवणत्रयादितियुतास्वाती। श्रवणधनिष्ठाशततारकाः। अदितिः पुनर्वसुः। एभिः स
हितास्वाती। चराख्या चला चोक्ता। श्रवणत्रयादितिस्वातीपंचकं चराख्यं चलं प्रोक्तमित्यर्थः। हस्तार्काभिजिदीज्यभं। हस्तो अ
श्विनी। अर्को हस्तः। अभिजिद्वक्ष्यमाणलक्षणः। ईज्यो गुरुः तस्य भं पुष्यः। इति चतुष्टयं लघु तथा क्षिप्रं प्रोक्तं। मैत्रांतिमैंदुत्वाष्ट्रं मित्रं
अनुराधा। अंतिमं रेवती। इंदुर्मृगः। त्वाष्ट्रं चित्रा एतच्चतुष्टयं मृदु तथा मैत्रं प्रोक्तं। अग्निभविशे। अग्निभं कृत्तिका। विशा विशाखा।
एते द्वे मिश्रं साधारणं च प्रोक्ते॥ ॥मूलाहींद्राशिवं च दारुणमदस्तीक्ष्णं मुनींद्रैः स्मृतं संज्ञातुल्यमिहाचरंति सुधियः कार्यं हि संसिद्धये।
सूर्याद्याः स्थिरचंचलोग्रमिलिताः क्षिप्रोऽमृदुर्दारुणः क्षीणेंद्वर्कयमारराहुशिखिनः पापा बुधस्तैर्युतः॥८॥ मूलं प्रसिद्धं। अहिः आ
श्लेषा। इंद्रो ज्येष्ठा। शिव आर्द्रा। एतच्चतुष्टयं दारुणं। अदः इदं दारुणं। ती[illegible]क्ष्णं चोक्तं। [illegible] इह एषु ध्रुवादिसंज्ञेषु नक्षत्रेषु संज्ञातुल्यं का
र्यं सुधियः पंडिताः आचरंति। किमर्थं संसिद्धये। एतदुक्तं भवति। स्थिरनक्षत्रेषु स्थिरं। क्षत्रं भ्रमति छादि चरे चरमित्यादि कुर्वंतीत्यर्थः।
।अर्थसमानार्थसंज्ञाद्वयकरणं कवित्वबंधनार्थं। अथ प्रसंगेन सूर्यादीनामपि स्थिरादिसंज्ञाः सौम्यपापत्वं चत्त्वाहे नाह। सूर्या ५
द्या इत्यादि। सूर्यः स्थिरः। चंद्रश्चंचलः। भौम उग्रः। बुधो मिलितो मिश्रः। गुरुः [illegible] क्षिप्रः। शुक्रो मृदुः। शनिर्दारुणः। अथ पापसौम्या
न्ग्रहानाह। क्षीणेति। क्षीणेंदुः कृष्णाष्टम्यूर्ध्वं प्रतिपत्पर्यंतं क्षीणः। अर्कः सूर्यः। यमः शनिः। आरो भौमः। राहुः प्रसिद्धः। शिखी केतुः॥

न्मनक्षत्रादि। ग्रहणभं ग्रहणनक्षत्रं। चंद्रायुर्थं वक्ष्यमाणं दुःक्षणे दुर्मुहूर्तो वक्ष्यमाणस्तां ज्येष्ठं पूर्वं जनवस्य प्रथमजातापत्यस्य ज्ये
ष्ठं ज्येष्ठमासं। पापयुगिति पापयुक्तधिष्ण्यानि। पापाः पापग्रहास्तेषामन्यतमस्य युक् युक्तं। इतं गतं। एष्यं पुरः स्थितं। एतानि नक्षत्राणि। विसंच
भं। विद्धनक्षत्रं वक्ष्यमाणलक्षणं। ऊनाख्याधिकमासकौ क्षयमासाधिमासौ वक्ष्यमाणलक्षणौ। युतिषु व्यासत्वगंडगतिषु। त्र्यं ३ का ९
थीं ५ कू ९ रस ६ र्तु ६ पूर्वघटिकाः। विविष्कंभः। व्याव्याघातः। शूः शूलः। वव्रज्रः। गंडः प्रसिद्धः। अतिगंडः। एषु योगेषु क्रमेण त्र्यकाथी
करसर्तुसंख्याकाः प्रथमघटिकाः। तद्यथा। विष्कंभे तिस्रः। ३। व्याघाते अंकानव ९ शूले अर्थाः पंच। ५। वज्रे अंकानव ९ गंडे रसा
षट् ६ अतिगंडे ऋतवः षट् ६ इति। भानां विषाख्याघटीः। भानां अश्विन्यादीनां नक्षत्राणां विषाख्याघटीर्वक्ष्यमाणाः। क्रूरापं
चकपापवर्गे एतत्त्रयं वक्ष्यमाणं? अशुभं चंद्रं वक्ष्यमाणगोचरप्रकरणे वेद्यं। दशारिष्टकं जातककाराद्गम्यं। जन्मेशा
ज्यसितास्तं। जन्मेशो राशिस्वामी। ईज्यो गुरुः। सितः शुक्रः। एषां अस्तमनं। रविलुप्तकिरणत्वं। अंगशशिनोः क्रूरोद्भवां कर्तरीं। अंगल
ग्नं। शशी चंद्रः। तयोः क्रूरोद्भवां क्रूरग्रहजनितां कर्तरीं वक्ष्यमाणलक्षणां। रिष्टं गोचरसंभवं। गोचरे दुष्टग्रहाधिक्यं। गोचरं वक्ष्यमाणं।
ग्रहजनिभांतोद्भवं सूतकं। ग्रहो ग्रहणं। जनिर्जन्म। भांतो मरणं। एभ्यः उद्भूतं सूतकं। ग्रहसूतकं। जन्मसूतकं। मृतसूतकमिति। तेषु ग्र
हणसूतकं वक्ष्यमाणं। दुश्चिह्नानि। कार्यारंभसमये क्षुतदुर्वचनश्रवणादीनि। मनोविभंगं। अंतःकरणस्य अप्रवर्तनं। व्याधिज्वर
स्तमपि। रोगः पाम्याज्वराव्याधिर्विकारो दुःखमामयः इति वाग्भट्टः। ज्वरितस्य मंगलं न कुर्यादित्यर्थः। तथा चोक्तं ज्योतिःप्रकाशे॥
जन्माधिपविलग्नेशचंद्रभागं वर्मजिष्णां। विरश्मित्वं जन्ममासो जन्मभं जन्मवासरः। दुर्निमित्तं मनोभंगः क्षयमासाधिकमासकौ॥
मृतजातकयोश्चैव सूतकं ग्रहणस्य च। ज्वरासक्ती रजो मातुः पित्रोः क्षयदिनं तथा। गंडांतं त्रिविधं तैः कालः संधिर्भस्याति थिस्तनोः॥

मु॰मा॰टी॰ द्दिभूपचर्यति। तथावेधयत्थयोगदर्शनाश्च। नागोद्वादशनाडीभिर्दिक्षं चतुर्दशभिस्तथा। भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिंति॥ मि
५ दिकूदशमी। भूतश्चतुर्दशीतिवत्। इतिस्वोक्तमुहूर्त्तमार्तंडटीकायांमार्तंडवल्लभायांनक्षत्रप्रकरणं॥ ॥अथगर्भाधानादिसंस्का
रप्रकरणंविवक्षुस्तावद्गर्भाधानस्यऋतुसंबंधत्वात्प्रथमर्तुफलंस्रग्धरावृत्तेनाह॥ आद्यर्तौपौषशुक्रोर्जमधुशुचिनभस्याःकुयु
क्पापवारारिक्ता॥ ७।९।१४। मार्काष्टषष्ठ्यः। ३०।१२।८।६। परगृहकुपदेरात्रिसंध्यापराह्णाः। मिश्रोग्राम्रस्तौ स्वर्णविवरमनरुणा
त्याधिकाश्चांगराष्ट्रोत्पातःपापस्य लग्नंनसदरुणजरंनीलरक्तांबरंच॥ १०॥ तत्रादौमासफलमाह॥ आद्यर्तौप्रथमर्तौपौषशुक्रो
र्जमधुशुचिन [illegible] भस्याःसंतीरस्युरित्यन्वयः। अर्थाद्विभक्तिपरिणामः। पौषःप्रसिद्धः। शुक्रोज्येष्ठः। ऊर्जःकार्तिकः। मधुश्चैत्रः।
शुचिराषाढः। नभस्योभाद्रपदः। एतेषण्मासानशुभाइत्यर्थः। अर्थादन्येशुभाः। तदुक्तंज्योतिर्निबंधे। प्रथमर्तौमधौनारीविध
वाभवति ध्रुवं। वैशाखेधनपुत्राढ्याज्येष्ठेरोगान्विता भवेत्। आषाढेचमृतापत्याश्रावणेवध नान्विता। भाद्रपदेदुर्भगाचआश्विनेच
तपस्विनी। ऊर्जेत्वायुष्मतीनारीमार्गशीर्षेबहुप्रजा। पुष्येतुपुंश्चलीनारीमाघेपुत्रसुखान्विता। फाल्गुनेश्रीमतीसाध्वीक्रमान्मासफ
लंस्मृतमिति। योगफलमाह। कुयुगिति। कुयो [illegible] गाविष्कंभादिकयोगेषुनवयोगादुष्टाःसंति। विष्कंभातिगंडशूलगंडव्याघात
वज्रव्यतीपातपरिघवैधृताः। एतेयोगानशुभाइत्यर्थः। अर्थादन्येशुभाः। तदुक्तं। आद्यर्तौदुर्भगानारीविष्कंभेचेद्रजस्वला। वंध्याचैवा
तिगंडेचशूलेशूलवतीभवेत्। गंडेचपुंश्चलीनारीव्याघाते [illegible] चात्मघातिनी। वज्रेचवैरिणीप्रोक्तापातेचपतिघातिनी। परिघेमृतवं
ध्याचवैधृतौपतिमारिणी। शेषाःशुभावहायोगायथानामफलप्रदाइति। वारफलमाह। पापवाराइति। क्षीणेंदुर्कसमाराःपापास्तेषां ५
वाराःनशुभाः। अर्थादन्ये [illegible] शुभाः। उक्तंचकारिकायां। आदित्येविधवानारीसोमेचैवमृतप्रजा। अंगारेस्वायुहंत्रीस्याद्बुधेकन्याप्रसूर्भ
वेत्। पुत्रिणीगुरुवारेचकन्यापुत्रवतीभृगौ। शनौतुपुंश्चलीनारीप्रथमर्तौविदुर्बुधाइति। तथाचनारदः। रोगीपतिव्रतादुःखीपुत्रिणी
भोगभागिनी। पतिप्रियाक्लेश [illegible] भागीसूर्यवारादिषुक्रमादिति। कारिकावचनेसोमवारफलंमृतप्रजेति। नारदवचनेपतिव्रतेति।
एवंद्वयोर्विरोधेमृतप्रजेतिकृष्णपक्षसोमवारविषयं। पतिव्रतेतिशुक्लसोमविषयं। इतिव्यवस्थापनीयं। अतोमार्तंडवचनंपापवाराइदं
नारीनप्रशस्तं। तिथिफलमाह। रिक्तामार्काष्टषष्ठ्यइति। रिक्ताश्चतुर्थीनवमीच तुर्दश्यः। अमाअमावास्या। अर्को [illegible] द्वादशी। द्वा
दश्यःस्वामी अर्कः। अथवाअर्केसंख्यापिद्वादशवाचकासंख्य [illegible] यापिद्वादशीभवति। ति [illegible] थिदेवतारत्नमालायां। तिथिपाश्च
तुर्मु [illegible] खविधातृविष्णवेसाख्यः। अष्टअष्टमी। षष्ठीप्रसिद्धा। एताःसप्ततिथयःनशुभाः। अर्थादन्याःशुभाः। उक्तंच। आद्य
र्तौस्युभगानारीप्रतिपत्सुरजस्वला। द्वितीयायांभाग्यवतीतृतीयायांसुतान्विता। चतुर्थ्यांविधवानारीपंचम्यांधनदायिनी। षष्ठ्यांचकुरा
भाढ्नारीसप्तम्यांधनवर्धनी। अष्टम्यांराक्षसीनारीनवम्यांपापवर्धनी। दशम्यांप्रीतिरुन्नारीएकादश्यांसुतान्विता। द्वादश्यांदुर्भगाना
रीत्रयोदश्यांहिरण्यदा। चतुर्द्दश्यांपुंश्चलीस्यात्पौर्णमास्यांतुपुत्रिणी। यदिभद्रानजायेतदर्शेचौरिकाध्रुवमिति॥ स्थानफलमाह॥
परगृहकुपदेति। परगृहं। भर्तृगृहाद्न्यत्। कुपदं। कुत्सितस्थानं। एतेउभेस्थानेनिंद्ये। अर्थादन्यच्छुभं। उक्तंच। देवस्थानेपितृस्थानेनिंद्य
स्थानेन्यवेश्मनि। पुष्पवत्याःफलंनस्यान्मार्गेचांडालवेश्मनीति। देवस्थानंदेवालयं। पितृस्थानंश्मशानं। निंद्य [illegible] स्थानंकुत्सित
स्थानं। अन्यवेश्मभर्तृगृहादन्यवेश्मं। अन्यत्सुगमं। ननुअत्रश्लोकेबहूक्तं। अत्रकथं। परगृहकुपदेइत्येवोक्तं। सत्यं। यत्स्थानद्वयमुक्तंतस्मि
न्नेवसर्वंश्लोकोक्तमधितिष्ठति। तद्यथा। देवस्थानान्यवेश्मचांडालवेश्मेति परत्वयंपरगृहइत्यस्मिन्नंतर्गतिष्ठति। अन्यद्यदत्रश्लोकोक्तं तत्कु धि
कुपदेवर्तते। ननु। मार्गःकथंपदेअस्ति। सतुकुत्सितोनभवति। अस्तिमार्गेपिदुष्टत्वंसर्वजनसंचारात्प्रथमे [illegible] शास्त्रप्रसिद्धं। नहिपूर्वश्लोके।
कु

मु०मा०टी० कं वकुभाषणं व्यर्थस्यात्। मेवे। तदुक्तं वकुभाषणं त्वनधिकाधिकदोषाविवक्षयोक्तमिति। नदोषः। वेलाफलमाह। रात्रिसंध्यापराह्ना इति। रात्रिःप्रसिद्धा। संधेहं।
६ अपराह्णस्त्रेधाविभक्तस्याह्नस्तृतीयोभागः। एते चत्वारः कालानुशुभाः। अर्थादन्योपूर्वाह्णमध्याह्नौशुभौ। उक्तं च पुत्रिणीसुभगापुण्यापूर्वाह्णेपारज
स्वला। मध्याह्ने तु शुभप्राप्तिःस्वैरिणीचापराह्णके। संध्ययोरुभयोर्वेश्यानिशायां विधवात्रथेति। नक्षत्रफलमाह। मिश्रोग्रामूलतीक्ष्णमिति। मि
पूर्वा श्रेकृत्तिकाविशाखे। उग्राणीत्रयभरणीमघा। अमूलतीक्ष्णानि। मूलरा द्रिता नि आश्लेषाज्येष्ठार्द्राः। इत्यतन्नक्षत्रदराकं नशुभं। अर्थादन्या
निशुभानि। तदुक्तं नारदीयसंहितायां। श्रीयुतासुभगापुत्रवतीसौख्यान्विता स्थिरा। कुलाधिका धनवती चाश्विन्यां प्रथमार्तवा॥१॥ दुः
शीलास्वैरिणीस्वस्यगर्भपातनतत्परा। परप्रेष्याकाकवंध्याभरण्यां प्रथमार्तवा। २। अनर्थापुंश्चलीवंध्यागर्भपातनतत्परा। प्रेष्यामृत
प्रजावा पिवह्निभे प्रथमार्तवा॥३॥ सुशीलास्वप्रजामान्यापतिभक्ताद्दढव्रता। गृहार्चनरतानित्यंधातृभे प्रथमार्तवा॥४॥ गु
णान्विताधर्मरतानारीसर्वंसहासती। पतिप्रियसुता व्याचचंद्रभे प्रथमार्तवा॥५॥ कुलटादुर्भगाकष्टामृतपुत्राखलाजडा। दुष्टाव्रत गा
परिभ्रष्टारौद्रभे प्रथमार्तवा॥६॥ पतिभक्तापुत्रवतीपरसंतानमोदिनी। कुलाचारानुरक्ता धाऽदितिभे प्रथमार्तवा॥७॥ पतिप्रि
यापुत्रवतीनानाभोगवतीशुभा॥ स्वकर्मनिरतादक्षातिष्यभे प्रथमार्तवा॥८॥ परभर्तृरताप्रेष्याकोपिनीनिर्घृणालसा। मृषावादीच
दुःपुत्राभौजंगेप्रथमार्तवा॥९॥ निर्द्रव्यारोगसंयुक्तासर्वद्रोगयलोलुपा। पितृवेश्मरतामान्यापितृभे प्रथमार्तवा॥१०॥ परकार्यरता
हीनादुःपुत्राकूशभागिनी। मलिनाकर्कशावृद्धाभाग्यर्क्षेप्रथमार्तवा॥११॥ प्रजावतीधर्मरतानिर्वैराभित्रपूजिता। सतीमातृगृहास
क्ताअर्यमर्क्षेरजस्वला॥१२॥ निर्द्रव्यश्याभूरिवित्तवापुत्राढ्याभोगभागिनी। प्रधानादानकु शलाहस्तर्क्षेप्रथमार्तवा॥१३॥ चित्रक
र्मभोगिनीचकुशलाक्रयविक्रये। विकीर्णाकामाश्लिष्णाद्याचाष्ट्रभे प्रथमार्तवा॥१४॥ बहुपुत्रवतीनीरुक्कुशीलाशिल्पकर्मणि भे ६
।पुत्रपौत्रवतीसाध्वीवायुभे प्रथमार्तवा॥१५॥ नीचकर्मरतादुष्टापानासक्तापरप्रिया। विपुत्रामलिनाकुत्स्याद्विदैवे प्रथमार्तवा॥१६॥

एतेक्षीणेंदुरक्स्यः। पापाः क्रूराः। नैःपापैर्युतो बुधः पापस्यात्। उक्तं जातकोत्तमे। क्षीणेंदुर्कार्किभौमास्तुः पापाः सौम्योपितद्युतः॥
राहुकेतूपापतरोपापः पापयुतस्तथेति। अर्थादन्येसौम्याः। एषांप्रयोजनं क्रूरसौम्यकर्मसाधने। अथप्रसंगेननक्ष
त्रसमानाथान् दिनरात्रिमुहूर्तान्नक्षत्रोक्तकार्यसाधकान् वृत्तेनैकेनाह॥ ॥अह्नःस्युःशिवसर्पमित्रपितरोवस्वंबुविश्वेभिजि
द्वेधेंद्राग्निनिशाचराअपिजलाधीशार्यमाख्योभगः। रात्रेस्तुःस्मरहाचयोजचरणासंचाश्विनोथोदितिर्जीवोविष्णुरिनात्रयस्त्वि
थिलवाः कर्मैषुभोक्तस्मृतं॥२॥ एतेंक्ष्णोदिवसस्यतिथिलवाः पंचदशमुहूर्ताः शिवाद्यस्तुः प्रथमः :शिवः। द्वितीयःसर्पः। तृती
योमित्रः। चतुर्थःपिता। पंचमोवसुः। षष्ठोंबु। सप्तमोविश्वे। अष्टमोअभिजित्। नवमोब्रह्मा। दशमइंद्रः। एकादशइंद्राग्नी।
द्वादशोनिशाचरः। त्रयोदशोजलाधीशोवरुणः। चतुर्दशोऽर्यमाख्यः। पंचदशोभगः। अथरात्रेः। प्रथमःस्मरहाशिवः। अज
चरणात्रयः। अजचरणाहिर्बु ध्न्यपूषाख्याः। क्रमेणाद्वितीयोऽजचरणः। तृतीयोहिर्बुध्न्यः। चतुर्थःपूषा। पंचाश्विनइति।
अश्विनःपंच। दस्रयमाग्निकेदवः। पंचमोदस्रः। षष्ठोयमः। सप्तमोऽग्निः। अष्टमःकःब्रह्मा। नवमःइंदुः। अथोऽदितिः।
दशमः। एकादशोजीवः। द्वादशोविष्णुः। इनात्रयःरविलष्टनिलाः। त्रयोदशोरविः। चतुर्दशःत्वष्टा। पंचमोऽनिलोवायुः
।प्रयोजनमाह॥ कर्मैषुभोक्तं नक्षत्रोक्तकर्मस्मृतंमुनींद्रैरित्यध्याहारः। एतदुक्तंभवति। शिवमुहूर्तेआर्द्रानक्षत्रोक्तं
।सार्पमुहूर्तेआश्लेषोक्तं। मित्रमुहूर्तेअनुराधोक्तं। कर्मकुर्यादित्यादि। तदुक्तंरत्नमालायां। यस्मिन्धिष्ण्येयच्चकर्मोप
दिष्टंतद्दैवत्येतन्मुहूर्तेपिकार्यमिति। ओकेहिस्वामिराव्दैःसेवकेप्रयुंजानादृश्यंते। अतोदेवताशब्दैस्तन्नक्षत्रंनिथ्या

मु॰मा॰टी॰ दा भवेत्॥ नैतिले संमतवती गेहे नारी विनश्यति। नष्टप्रज्ञा वणिक्संज्ञे विष्यांव ध्या धनोझिता। शकुनौ च चतुष्पादे नारी वैधव्यमा
७ प्नुयात्। नगेरनष्टे रामा कैस्तुघ्ने विधवा भवेदिति॥ अथोत्पातफलं॥ उत्पातेति॥ उत्पातस्त्रिविधः। सन्नस्यात्। तथा च नार
दः। संध्यासूपप्लवे विद्युमशुभं प्रथमार्तवमिति। अथ लग्नफलमाह। पापलग्नमिति। पापग्रहस्य लग्नं संस्यात्। क्षीणेंदुर्केयु न
माराः पापास्तेषामन्यतमस्य लग्नमित्यर्थः। पापग्रहलग्नानि मेषसिंहवृश्चिकमकरकुंभाः। एतानि लग्नानि नरकभानी
त्यर्थः। अर्थादन्यानि शुभानि। कर्कलग्ने कृष्णपक्षे शुभं। शुक्लपक्षे अशुभं। स्वामिवशात्। लग्नस्वामिनो वक्ष्यमाणाः। उक्तं च।
आत्मघ्नी भ्रूणहा मेषे वृषे पुत्रवती भवेत्। द्वंद्वे कन्याप्रसूर्नारी मृतात्याचकर्किणी। सिंहे वैधव्यमाप्नोति कन्यायां स्त्रीप्रसूर्भवेत्
तुलायां बहुपुत्राढ्या दुष्टकर्मरतालिनि। चापे पुत्रधनाढ्या स्यान्मकरे दुःखिनी भवेत्। सकलप्रजावती कुंभे मीने वाल्पप्रजा भवेदि
ति। नारदोपि। कुलीरवृषचापांत्यनृयुक्कन्यातुलाधराः। राशयः शुभदा ज्ञेया नारीणां प्रथमार्तवे॥ति। अत्रापि कर्कलग्नस्य
ह्रेधे चंद्रस्य सौम्यत्वपापत्ववशाद्व्यवस्था ज्ञेया॥ अथ वस्त्रफलमाह। अरुणजरन्नीलचित्रांबरमिति न मत्स्यादिति। अरुणं
आरक्तं। जरज्जीर्णं। नीलं प्रसिद्धं। चित्रं नानावर्णैरंजितं एवंविधमंबरं वस्त्रं सैनेत्स्यान्नभंस्यादित्यर्थः। अर्थात् दृढं शुभं पीतंव
स्त्रं शुभं। उक्तं च। शुभगा श्वेतवस्त्रा च रोगिणी रक्तवाससा। नीलांबरधरा नारी विधवा प्रथमार्तवे। योगिनी पीतवस्त्रा च दृढव
स्त्रा पतिव्रता। दुर्भगा शीर्णवस्त्रा च सुभगा चारुवस्त्रिणीति। अत्रानुक्तमपि स्वाज्यप्रकरणोक्तमन्यदुष्टं विचारणीयं॥ ॥ ७
इति श्रीवाक्तमुहूर्तमार्तंडटीकायां मार्तंडवल्लभायां प्रथमार्तवप्रकरणं॥ ॥ अथ साधारणलग्नबलं स्रग्धरावृत्तेनाह॥

आपश्चंद्रं त्यजांत्याष्टमरिपुतनुगं॥१२॥८।६।१। भांशकौ मूढनाथौ क्रूरेंद्वाप्तौ खलांशं मृतिगत।८।खचरं मृत्यु।८। ततौ तनुस्थौ
सौम्याः केंद्र।१।४।७।१०। त्रिकोणे।५।९। श्वरिभवसहजे।६।११।३। चान्यखेटाः प्रशस्ताः सर्वत्रैतत्प्रयोज्यं प्रकरणपठितांस्तद्वि
शेषान्विदित्वा।१३। इह वक्ष्यमाणे गर्भाधानादिकृत्ये प्रायो बाहुल्येन चंद्रं अंत्याष्टमरिपुतनुगं संत्यजेदिति। इच्छकं प्रतिदैवाव
द्वचनं। अंत्यं द्वादशं। अष्टमं प्रसिद्धं। रिपुः षष्ठं। तनुर्लग्नं। एतान्प्रतिगतं चंद्रं त्यजेदिति। तथा भांशकौ त्यज। किंलक्षणौ भांशकौ
मूढनाथौ। मूढः नाथो ययोस्तौ तथा। अस्तंगतस्य ग्रहस्य लग्ननवांशावित्यर्थः। पुनः किंलक्षणौ। क्रूरेंद्वाप्तौ। क्रूरग्रहचंद्र
णा न्यतमयुक्तौ। तथा खलांशं त्यज। यत्र कुत्रापि लग्ने पापग्रहनवांशं त्यज। तथा मृतिगतखचरं त्यज। लग्नादष्टमं
ग्रहं त्यजेदित्यर्थः। तथा मृत्युतः तौ तनुस्थौ त्यज। मृत्युर्जन्मराशिजन्मलग्नाभ्यामष्टमं। तस्य स्वामिनः एतौ तनुस्थौ त्यजेदि
त्यर्थः। लग्नगोचरमाह। सौम्या इति। सौम्याः सौम्यग्रहाः केंद्राणि लग्न चतुर्थ सप्तम दशमः त्रिकोणे नवपंचमे। एतेषु केंद्रत्रि
कोणेषु सौम्याः ग्रहाः प्रशस्ताः। अरिभवसहजेषु अन्यखेटाः। अरिः षष्ठं। भवएकादशं। सहजं तृतीयं। एतेषु स्थानेषु अन्यखेटाः
सौम्येभ्योऽन्ये पापग्रहाः प्रशस्ताः स्युः। सर्वं चैतत्प्रयोज्यं। एतत् श्लोकोक्तं सर्वत्र गर्भाधानादिकृत्ये प्रयोज्यं। साधारणत्वा
त्। किंलक्षणं प्रकरणपठितान् तद्विशेषान् विदित्वा पृथक्पृथक्प्रतिपठितान् विशेषान् ज्ञात्वा॥ ॥ अथ गर्भाधानं स्रग्ध
रावृत्तेनाह। स्वस्त्रीं प्राङ्मिंदुतुष्का समदिनविवरश्राद्धनष्टा दिनानि सक्तामूलं मघां स्वेवक्त।८। कलि।४। जनि भाहा निपर्वा
णि वर्तो।१५।३०। याहि आर्के दुलग्ने विषमभलवगे रुद्धलेभोऽर्कनाथि न्व्यस्ते रेतोरिहे वायुगहनि मुदितः कन्यकेच्छोः सु
चंद्रे।१४। भोः कृतार्थी निवृत्तो मुदितः सन् स्वस्त्रीं प्रति याहि गच्छ। इत्यन्वयः। कृतं अर्थं यत्ते असौ कृतार्थी तस्य संबंधनं भोः कृ

मु०मा०टी० वार्थिन्। कन्यैरजोदर्शनदिनादारभ्य षोडशरात्रयो ऋतुस्तस्मिन्मुहूर्तः सा जातमस्य समुदितः एवंविधः सन् स्वस्त्रीं प्रतिगच्छेदित्य
८ र्थः। यतो वस्त्री गर्भधारणं करोति अत्र स्त्री अपि हर्षिता भाव्या। तथा च मनुः। ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताइ
ति। किंकृत्वा प्राक् द्वितुष्का समदिनविवरश्राद्धं तल्लाग्दिनानि त्यक्त्वा। प्राचीनिशा चतुष्कं प्राङ्नि दूचतुष्कं पूर्वरात्रिचतुष्टयं अस
मदिनं। विवराणि दिनरात्रितिथि नादीनां संधयः। श्राद्धं स्वपित्रोः श्राद्धदिनं। तल्लाग्दिनं। तस्य श्राद्धस्य पूर्वदिनं तानि त्यक्त्वेत्य
र्थः। एवं मूलं त्यक्त्वा। तथा माघां त्यक्त्वा। मघा प्रसिद्धा। अंत्यं रेवती। एतेत्यक्त्वेत्यर्थः। तथा वक्र कलिजनिभा हानि त्यक्त्वा॥ व
क्र रष्टमी। कलिश्चतुर्दशी। जनिभं जन्मनक्षत्रं। अहो दिवा। एतानि त्यक्त्वेत्यर्थः। तथा पर्वाणि च त्यक्त्वा। पर्वाणि दर्शपौर्णमासव्य
तीपातवैधृति संक्रांतिमहापातादीनि। त्यक्त्वा स्त्रियं प्रतिगच्छेदित्यर्थः। तथा च नारदः। रजोदर्शनतोस्पृश्या नार्यादिनचतुष्टयं। ततः
शुद्धा क्रियास्वेताः सर्ववर्णेष्वयं विधिरिति। वसिष्ठः। उपप्लवे वैधृति पातयोश्च विष्ट्यां दिवा पारिघपूर्वभागे। संध्यासु सर्वास्वपि मा
तृपित्रोर्मृतेह्नि पत्नीगमनं विवर्ज्यं। दिनेषु युग्मेषु च वक्ष्यमाणयोगे: कृतार्थी स्वसतीमुपेयात्। दिनेषु युग्मेषु च कन्यकार्थी
हिलाच गंडांतिथिलग्नभानां। ज्योतिषार्के। कृतेयुग्मनिशि स्वस्त्रीं गच्छन्पुत्रायसद्विधो। मघामूलांस्पपक्षांतनिंद्यभूताष्ट
मीस्त्यजेदिति। के:। इवेज्यार्केदुलग्नेविषमभलवगे:। इवेज्यो गुरुः। अर्कः प्रसिद्धः। इंदुश्चंद्रः। लग्नं प्रसिद्धं। एतेविषमभ
लवगे:। भंराशिः। लवो नवांशः। विषमराशिर्विषमनवांशे इत्यर्थः। नकेवलं विषमभलवगे:। उद्बले:। उत्तउत्कृष्टं बलं एषां तानि
नयाते:। अथ कन्यकार्थिनो विशेषमाह। भोकन्येकेछाइहैव अनंतरोक्ते पूर्वलक्षणकाले अयुगहनि विषमदिने मुदितः सन् ८

सामिपक्षार्चितास्वस्य गुणै: सम्यग्विभूषिता। कृपुत्रा कृभगा कांता मित्र भे प्रथमार्तवा॥ १७॥ दुश्चारित्ररता क्लेशी त्यनर्था पुंश्चली व्यसुः॥
दुःसंतानवती ज्येष्ठा नक्षत्रप्रथमार्तवा॥ १८॥ संतानार्थगुणैर्नो स्वैर्युता न्यक्कुरशामोचिनी। स्वकर्मणि रता नित्यं मूलर्क्षे प्रथमार्तवा॥ १९॥
अल्पपापा दुःपुत्रा प्राणिहिंसनतत्परा। अजस्रं व्यसनासक्ता तोयभे प्रथमार्तवा॥ २०॥ कार्याकार्येषु कुशला सदा धर्मानुवर्तिनी। गुणा
ढ्या भाग्यवती विश्वभे प्रथमार्तवा॥ २१॥ पुत्रपौत्रान्विता भोगधनधान्यवती सती। कुलानुमोदिनी मान्या विष्णुभे प्रथमार्तवा॥ २२॥ धन
धान्यवती भोगपुत्रपौत्रसमन्विता॥ स्वकर्मनिरता साध्वी वसुभे प्रथमार्तवा॥ २३॥ बहुपुत्रा धनवती स्वकर्मनिरता सती। कुलानुमोदिनी
मान्या वरुणे प्रथमार्तवा॥ २४॥ आढ्या पुत्रवती मान्या सुप्रसन्ना पतिप्रिया। बंधुपूज्या धर्मवत्या हिर्बुध्न्ये प्रथमार्तवा॥ २५॥ दृढव्रता धर्म
वती पुत्रसौख्यार्थसंयुता। विख्याता गुणसंपन्ना पौष्णभे प्रथमार्तवा॥ २६॥ अथ संधिफमाह॥ बंधकी बंधुविद्वेष्या नित्यं दुष्टरता खला।
शिल्पकार्येषु कुशला जांघ्रिभे प्रथमार्तवा॥ २७॥ विवरमिति॥ तिथिभादीनां विवरं संधि: न शुभा॥ उक्तं च। दुर्भगा सर्वसंधिषु इति॥
रक्तफलमाह॥ अनरुणा साधिका समिति। अरुणाद न्यत्। अनरुणं। अनरुणं च। अल्पं चाधिकं च। अनरुणाल्पाधिकं तच्च तत् असं
च। अनरुणाल्पाधिकासं। न सत्स्यात्। अनरुणं नाम यत्कुंकुमारक्तं न भवति। असृग्रक्तं। अन्यत्सुगमं। अर्थाद न्यच्छुभं। उक्तं च। प्रथ
मर्तौफलं स्त्रीणामुच्यते रजसो धुना। रक्ते रक्ते भवेत्पुत्रः कृष्णे च मृतपुत्रका। पिच्छलाभे भवेद्वंध्या काकवंध्या च पांडुरे। पीते च स्वैरिणी
प्रोक्ता सुभगा गुंजवर्णके। सिंदूराभे भवेत्कन्या रजः शोणितमुच्यते। लक्षणमपि। ग्रंथांतरे। शोणितेबिंदुमात्रे तु स्वैरिणी चाल्पशो
णिता। वराम ध्यस्रवास्या तु दुर्भगा बहुशोणितेति। करणफलमाह। गराश्टेति। गरान्। अष्ट। गराष्ट। गराद्यष्टकरणानि भवपर्यंता
निनेष्टसंति। नशुभानिस्युः अर्थादन्यानि शुभानि। उक्तं च। बवे पुष्पवती नारी वंध्या वाविभवा भवेत्। बालवे पुत्रिणी नारी कौलवे प्रम

नेभवेत्। व्यंक्तगर्भेभवेत्कार्यंसीमंतेनासहाथवा। नृसिंहः रिक्तंच पर्वनवमींप्रक्तां पुंसवने त्रुभाः शस्ताते। सीमंतोन्नयनंबुधसुहृनिगोपुन्नामधि
ष्ण्येस्थितेकुर्यात्पुंसवनंचरस्यदिवसेभौमस्यजीवस्यचादि। रहस्यमिः कुलीरमिथुनंकन्याहिताशेषाः शुभाचरहाः। इति। नारदः। चतु
र्थेमासिषष्ठेवाप्यष्टमेवातदीश्वरे। बलेपपन्नेदंपत्योश्चइत्ताराबलान्विते। अरिक्तापर्वदिवसेकुजजीवार्कवासरे। तीक्ष्णमिश्रोग्र
वर्ज्येषुपुंलग्नेपुन्नवांशके। शुद्धेष्टमेजन्मलग्नात्तयोर्लग्नेनने धने। शुभग्रहयुतेदृष्टेपापस्वटायुतेक्षिते। पंचेरिके चतुर्भिर्वा
दृष्टेर्के द्वीज्यपूर्वकैः। स्त्रीणांतु प्रथमेगर्भेसीमंतोन्नयनंशुभं। शुभग्रहेषुधीधर्मकेंद्रेष्वरिभवत्रिषु। पापेषुसत्सु चंद्रेस्तनिधनारि
ववर्जिते। क्रूरग्रहाणामेकोपिलग्नादंत्यात्मजाष्टगः। सीमंतिनींवानुगर्भंबलीहंतिनसंशयइति॥ ॥अथजातकर्मनामधे
यसकूधरयाह॥ ॥ ॥सूतेजातंविदध्यादपिजनिमरणाशौचकेवांतदं तेक्षिप्रेध्रौ मृदौ चराभिश्चरमृदुभिरथोनामव
र्णाविदध्युः। सूतेः सूर्याष्टिविंशाकृतिमितदिवसे १२।१६। २०।२२। जातभेवोचरांगैरिक्ता ष्टम्यारमंदान्व्ययगतखचरंप्रोझ्यरात्रिंपराह्नं।
॥१४॥ सतौप्रसूतेजातायांजातंजातकर्मविदध्यात्। कुर्यात्। अथकदाचित्सूतकमध्येप्रसूतेजातायांसत्यां। स्मार्तकर्मपरित्यागोन्यत्राहि
न्यत्रसूतकइतिशास्त्रेण जातकर्मणो विरोधेप्राप्तेतदपवादमाह। जनिमरणाशौचकेत्वपि। अयमर्थः। कदाचिज्जातमृतसूतकयोः प्रस
ति र्भवतितदाजातकर्मविषयेसूतकांतरदोषोनास्तीतिभावः। सूतकांतरेसत्यपिजातेपुत्रेपितासचेलंस्नानंकुर्यादितिस्वस्वगृह्योक्तं
कर्मकुर्यादित्यर्थः। यतः पूर्वाशौचेनेवास्यशुद्धिः। नाद्यस्यनानंतरं तेपूर्वाशौचांतेवा एतस्यांतेवाक्षिप्रादिभिर्नक्षत्रैः कुर्यात्। क्षिप्राणि॥
अश्विनीहस्ताभिजित्पुष्याः। ध्रुवाण्युत्तराःरोहिणी। उत्तराभिस्तिस्रः। चराणिश्रवणत्रयपुनर्वसुस्वात्यः। मृदूनिअनुराधारेवतीमृगचि
त्राः। एतैरित्यर्थः। लग्नबलंपूर्ववत्। उक्तंच। तस्मिन्जन्ममुहूर्तेपिसूतकांतेथवाशिशोः। जातकर्मचकर्तव्यंपितृपूजनपूर्वकं। २

क्षिप्रेध्रुवेचरेमृदौवोर्भेश्रेष्ठेद्वादशेप्रथमेपिवा। केंद्रेगुरौशुभगोकार्यंजातकर्मसनातनमिति। प्रजापतिः। सूतकेतुसमुत्पन्नेपुत्रजन्मय
दाभवेत्। कर्तुस्तात्कालिकीशुद्धिः पूर्वाशौचेनशुध्यतीति। संवर्तः। जातेपुत्रेपितुः स्नानंसचैलंतुविधीयतेइति। नचशीतो
दकेनकार्यं। तत्रजाबालिः। कुर्यान्नैमित्तिकंस्नानंशीताद्भिः काम्यमेवचेति। नच्चरात्रावपिकार्यं। तत्रवसिष्ठः। पुत्रजन्मनियज्ञे
ततथासंक्रमणेरवेः। राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशीति। नच्चोत्तराभिमुखंकार्यं। तदुक्तंतेनैवोक्तं। श्रुत्वाजा
तंपितापुत्रंसचैलंस्नानमाचरेत्। उत्तराभिमुखोभूत्वानद्यांवादेवखातके इति। रात्रौउदकाद्गिगमनाशक्तौविशेषमाह
।सांख्यायनः। दिवाहृतंतोयंरुलास्वर्णयुतंतुतत्। रात्रिस्नानेतुसंप्राप्तेस्नायादनलसन्निधाविति। अथनामकर्म
माह। अथनामवर्णाविदध्युः। सूतेः सूर्याष्टिविंशाकृतिमितदिवसेइति। अथानंतरंवर्णाः ब्राह्मणादयः क्रमेणसूतेः
प्रसूतेः सकाशात्। सूर्या १२ ष्टि १६ विंशा २० कृति २२ मितदिवसे। द्वादशषोडशविंशद्वाविंशमितदिवसेनामविदध्युः। कुर्युरि
त्यर्थः। अयमर्थः। ब्राह्मणोद्वादशेदिवसे। क्षत्रियः षोडशे। वैश्योविंशमिते। शूद्रोद्वाविंशदिवसेनामकुर्यादित्यर्थः। तथाचोक्तं
बृहस्पतिना। द्वादशेदिवसेवापिजन्मतोदिवसेशुभे। षोडशेविंशतौचैवद्वाविंशेवर्णतः क्रमादिति। अत्रान्येपिविकल्पाः संति
।तत्रव्यासः। नामधेयंदशम्यांतुकेचिदिच्छंतिसूरयः। द्वादशेह्न्याहुरन्येतुमासेपूर्णेतथापरे। अष्टादशेहनितथावदंत्यन्येमनी
षिणइति। प्राप्तेकालेचविशेषमाह। गर्गः। व्यतीपातेचसंक्रांतौग्रहणेवध्रुतावपि। श्राद्धंविनाशुभंनैवप्राप्तकालेपिमानवः। अमासंक्रां
तिविष्ट्यादौप्राप्तकालेपिनाचरेदिति। यत्रकालनिरोधस्तत्रदोषोनास्ति। यस्यांक्रियायांसर्वोक्तकालोमासदिनेरपि। तस्यांनदोषोमूढत्वं

वक्रं वाजीव शुक्रयोरिति। अथ कालातिक्रमेन नक्षत्राण्याह। जातमैत्रेति। जातमैर्जातकर्मोक्तनक्षत्रैः। मैत्रैः क्षिप्रैरित्यादिभिर्वा कार्यं।। त
दुक्तं नारदेन। देशकालोपिधाताद्यैः कालातिक्रमणं यदि। अनस्तगे भृगावीज्ये तत्कार्यं चोत्तरायणे। चरस्थिरमृदुक्षिप्रनक्षत्रे शुभवा
सरे। चंद्रता[illegible]राबलोपेते दिवसे च शिशोः पितुरिति। अथान्नप्राशने विशेषमाह। चरांगमिति। चरांगं चरलग्नं। रिक्ताष्टम्यारमंदान्।।
रिक्ताश्चतुर्थी नवमी चतुर्दश्यः। अष्टमी प्रसिद्धा। आरो भौमवारः। मंदः शनिवारः। तान्। व्ययगतखचरं व्ययभावगतखगं सौम्यं असौ
म्यं वा। रात्रिः प्रसिद्धा। अपराह्णो दिनस्तृतीयांशः। एतान् प्रोक्ष्यस्त्रे[illegible]को लग्नबलं पूर्ववत्। तथा बृहस्पतिः। पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्या
ह्नो मध्यमस्मृतः। अपराह्णं चरात्रिं च वर्जयेन्नामकर्मणीति। नृसिंहः। सायाह्ने दुष्टयोगे च रात्रौ भूमिजवारयोः। रिक्तापर्वाष्टमी
विष्टिः किंस्तुघ्नं च विशेषतः। एतैर्दोषैर्युते काले रात्राविपि न कारयेदिति। बृहस्पतिः। शुभवारे च षड्वर्गे शुभानां नामसंपदे। राश
यश्च स्थिराः श्रेष्ठा द्विस्वभावा शुभैर्युता। इति। नृसिंहः। लग्नाद्व्ययाष्टमे सर्वे न शुभा नामकर्मणीति। केषां नामकार्यमिति संग्र
हे उक्तं। देवालयगजाश्वानां रक्षाणां वापिकूपयोः। सर्वोपकरणानां च विक्रानां योषितां नृणां। काव्यादीनां कवीनां च पश्चादी
नां विशेषतः। राजप्रसादसंज्ञानां नामकर्म विशिष्यइति।। ।।अथ पालकारोहणं भूम्युपवेशनं दुग्धपानं निष्क्रमणं चेति चतु
ष्टयं वक्ते केनाह।। जन्माहाद्वादशे ह्नि ध्रुवमृदुलघुभैर्वान्यसे सालके भे सौम्याश्वीज्यध्रुवे द्वे भृगुविधुशुभ दिवसे पंचमे मासि
दध्यात्। एकत्रिंशद्दिने वा [illegible] शनिगदितभैः कंबुनायोज्य मर्भ्यं व्यग्वाशास्यपयो थास्यग[illegible]मवदुदितो निष्क्रमो मासि तुर्ये।।१५।।
प्रसूतेः सकाशात् द्वादशे दिवसे पालके खट्वायां अर्भं बालकं न्यसेत्। निदध्यात्। उक्तकालातिक्रमे ध्रुवमृदुलघुभैर्वा नक्षत्रैर्नि १०
दध्यात्। लग्नबलं पूर्ववत्। तथा चोक्तं बृहस्पतिना स्वसंहितायां। खट्वारोहस्तु कर्तव्यो दशमे द्वादशे पि वा। षोडशे दिवसे वापि

स्त्रीं प्रति याहि। केः एतैर्व्यस्तैः एतेर्दैवेज्यार्केंदुलग्नैर्व्यस्तैरिति समभलवगैः। तथा च बृहज्जातके। ओजर्क्षे पुरुषांशकेषु बलिभि
र्लग्नार्कगुर्विंदुभिः पुंजन्म प्रवदेत्समांशकगतैर्युग्मेषु तैर्योषितेति। कस्मिन्सति। रूचंद्रे शोभने चंद्रे सति। गोचरेण चंद्रबले स
तीत्यर्थः। रूचंद्रे इति अनन्यगतिकं विना सर्वत्र योज्यं। पूर्ववल्लग्नबलं। अथ पुंसवनसीमंतोन्नयने स्रग्धरयाह।। ।।
पुंभेर्केज्यारवारे विमिथुनविषमांगांशयोः पुंसवं स्यात्सीमंताख्यं [illegible] च सत्सुव्ययस्कृतः १२। ५। ग्रहयोः पर्वरिक्तोनतिथ्यां। मा
से द्वित्रि २। ३। प्रसंख्ये प्रथमकमपरं तुर्यषष्ठाष्टमेषु। ४। ६। ८। श्रोकं पुंगर्भलग्नं ग्रहबलमनयोर्योज्यमाद्यश्च पक्षः।।१३।।
पुनश्च नाण्याह। वुराह। हस्तोमूलश्रवणः पुनर्वसुमृगशिरस्तथा पुष्यः। पुंसंज्ञके कार्ये ह्येतानि पुन्नामानि। पुंभे पुन्नक्षत्रे पु
भक्षत्राणि च एतानि पुष्योहस्तः पुनर्वसुः। अभिजित्प्रोष्ठपादश्च अनुराधाश्वियुक्तथेति। प्रोष्ठपाद्पूर्वभाद्रपदा। एषा मन्य
तमे पुंभे अर्केज्यारवारे। रविगुरुभौमवारे विमिथुनविषमांगांशयोः। अंगं च अंशश्च अंगांशौ विगतौ मिथुनं याभ्यां तौ विमिथुनौ। तौ च तौ
अंगांशौ च तथा तयोः। मिथुनरहिते विषमलग्ने विषमनवांशे इत्यर्थः। पुंसवं पुंसवनं सीमंताख्यं च सीमंतोन्नयनमपि सत्सु स्यात्। नाडि
केत्राग्रहणेनामग्रहणं कुयोः सतोः। सुव्ययस्थलग्रहयोः सतोः। पापग्रहरहितयोः। व्ययस्थपुंसवनयोः सतोरित्यर्थः। पर्वरिक्तोन
तिथ्यां। पूर्णिमा अमा रिक्तारहिततिथ्यां। मासेद्वित्रिप्रसंख्ये प्रथमकं। पाठो त्र्यो। प्रथमकं पुंसवनं गर्भाधानात् द्वितीये मासि तृ
तीये तृतीये वा मासि सत्स्यात्। अपरं सीमंतोन्नयनं तुर्यषष्ठाष्टमेषु। [illegible]धानात् चतुर्थषष्ठाष्टमेषु मासेषु सत्स्यात्। यत्सुंगर्भा य ग्रहक
नबलमुक्तं देवेज्यार्केंदुलग्नैरित्यादिकं तदनयोः पुंसवनसीमंतोन्नयनयोः योज्यं। आद्यः पक्षः शुक्लपक्षश्च योज्यः। नकृष्णः। अत्र गर्भा
धानानंतरं पुरुषकर्मोठ्यादिकेन नदिघ्नं स्यादिति अग्रे वक्ष्यति। लग्नबलं पूर्ववत्। आत्रकण्वः। द्वितीये वा तृतीये वा मासि पुंसव

तिथि

शेषक्र केचरक्षिणे। कालराहुः कुजेभल्लगुरुचरेबुधमंदयोरिति। लक्षणांतरं। इंद्रेवायोयमेरुद्रेतोयाग्निशशिराक्षसे। यामार्ध
मुख्या द्वाहुर्भ्रमत्येवंदिगष्टकेति। उदयात्सूर्यैस्यात्। रुद्रलक्ष्ं। हरिसोमवह्निराक्षसयमवरुणानिलहरालयेचैव। उद
यादिभ्रमति सदाघटिकारुद्रोमहाप्रलयेद्रुत्यादि। हरींद्रः। अथनिष्क्रमणमाह। अथास्यगमवदुदितोनिष्क्रमोमासितुर्ये। इति
तुर्येचतुर्थेमासिअर्भकस्यनिष्क्रमोनिष्क्रमणंगमनवत्यात्रावदितियावत्। उदितः उक्तः पूर्वैः अत्रयात्राप्रकरणोक्तंयोज्यमि
त्यर्थः। निष्क्रमलक्षणंबृहस्पतिनोक्तं। अथनिष्क्रमणंनामगृहात्प्रथमनिर्गमः। अकृतायांक्रियायांस्यादायुःश्रीनाशशो
रिति। यमः। उपनिष्क्रमणंकुर्याच्चतुर्थेमासिसांनैवइतिकारिकायां। चतुर्थेमासिपुण्यर्क्षे शुक्लेनिष्क्रमणंभवेत्। स्नातं
स्वलंकृतंचाभिकृतस्व स्त्ययनंशिशुं। आदायगेहान्निष्क्रम्यगच्छेत्सुदेवतालयं। अभ्यर्च्यदेवतांसम्यगाशिषोवाचयेद्द्वि
था। कृत्वाप्रदक्षिणंगेहंमानयंतिततःस्वकं। मातुस्वस्रगृहंगत्वामातुलादेर्गृहंनयेत्। नराशीर्वचनाद्येस्याद्दी र्घायु
रभिनंदितः। जयंतस्यमतेनायं लिखितःशिशुनिष्क्रमइति। स्वगृह्यानुसारंयोजयेत्।। ।।अथकर्णवेधंमंदाक्रां
तयाह। मैत्रैःक्षिप्रैःस्थिरभचरभैर्व्यानिलांभःपक्षैश्चैकाफापोषिनशनिकुजर्क्षांशवारानपास्य। रिक्तापर्वेश्वरवसुति
थीन्रात्रिसंध्येसमाब्दंपुंस्त्रीकर्णौसविधिपटुनादक्षवामादिवेध्यौ।।१९।। मैत्रैः अनुराधारेवतीमृगाचित्राभिः। क्षिप्रैःह
स्तार्काभिजिदीज्यभैः। स्थिरचरभैः स्थिराणित्र्युत्तरारोहिण्यः। चराणिश्रवणत्रयपुनर्वसुस्वात्यः। तैःकथंभूतैः स्थिरचर
भैः व्यानिलांभःपक्षैः। विगतानिआनिलांभःपक्षाणिएभ्यस्तानितथातैः अनिलंस्वाती। अंभःपःशततारका। कृषे ११

रोहिणी। नह्रहि तैरित्यर्थः। चैकाफापोषु। चैचैत्रः। काकार्तिकः। पैपौषः। फाफा ल्गुनः। तेचैकाफापवर्जितेषुपुंस्त्रीकर्णौपुरुषस्त्रियोः।
कर्णौपटुनाकुशलेनसविधियथास्यात्तथादक्षिणवामादियथास्यात्तथावेध्यौ। पुरुषस्यदक्षिणकर्णादिस्त्रियाः वामकर्णादिइत्य
र्थः। कर्णवेधविधिस्तुगृह्यपरिशिष्टेउक्तः। अथकर्णवेधोवर्षेतृतीयेपंचमेवापुष्येंदुचित्राहरिरेवतीषुपूर्वाह्णेप्राङ्मुखउपवि
ष्टस्यदक्षिणंकर्णमभिमंत्रयतिभद्रंकर्णेभिरितिरिरत्यंवक्ष्यंतीवेदितिकुमारायमधुरंदत्वाथभिंद्यात्ततोब्राह्मणभोजनमिति
। किंकृत्वाइनशनिकुजर्क्षांशवारानपास्यविहाय। रविशनिकुजानांऋक्षाणिलग्नानिअंशाःनवांशाः वाराः प्रसिद्धास्तान्त्य
क्त्वेत्यर्थः। पुनःकिंकृत्वा।। रिक्तापर्वेश्वरवसुतिथीन्। अपास्य। रिक्ताश्चतुर्थीनवमीचतुर्दश्यः। पर्वाणिपूर्णिमामावास्ये
। ईश्वरांतिथिःएकादशी। वसुतिथिरष्टमी एतांस्तिथीनपा स्य। पुनःकिंकृत्वा। रात्रिसंध्येअपास्यप्रस्पष्टौसमाब्दंपुनःकिंकृत्वा
अपास्यसमवर्षेषुयुक्ताविषमवर्षेकर्तव्यइत्यर्थः। लग्नबलपर्यंवत्। अत्रनृसिंहः। वेध्योकर्णौवदंतस्यविषमेब्देपिवाशिशोः।
शुक्लपक्षेशुभेवारेचैत्रपुष्योत्तफाल्गुने। एकादश्यष्टमीपर्वरिक्तावर्ज्याःशुभावहाइति। शिष्टाश्चतिथयःसर्वाःकृष्णेचांत्यत्रिकं
विना। कर्णद्वयाद्दितिक्षिप्रमृदुभैश्चायुगेःश्रुते। युगेलग्नेपिकेप्याहुरुत्तराकृश्रुतिव्यधइति। अगस्त्यः। द्वयोश्चसंध्ययोर्लग्नेनकु
र्यात्कर्णवेधनं। रात्रावपितथालग्नेनक्षत्रेनभिसंधिषु। कर्णवेधनकुर्वीतकुर्याच्चेच्छेदनंभवेदिति। बृहस्पतिः। मंदाकारांशवाराः
स्तुर्वर्ज्याः कर्णस्यवेधने। गुरुशुक्रेंदुजेंदूनांपूज्यावारांशकोदयाइति। संग्रहे। शनकुंभमृगोसूचीवेधनेतुशुभप्रदा।
राजतीवायसीवापियथाविभवतःशुभा।। सुभूमौप्रांगणेरम्येशुचौदेशेंबरेरवौ।। संस्थितेवेधयेत्कर्णौस्त्रीपुंसोर्वामद

क्षिपेत्। शङ्कुसूत्रसमायुक्ततान्नसूच्याथवेधयेत्। वेधात्तृतीयनक्षत्रेसालयेदुष्णवारिणेति। देवलः। कर्णरंध्रेरवेश्छायानविशेद्यस्यजन्म
नः। तंदृष्ट्वाविलयंयातिपुण्यौघाश्चपुरातनाइति। अथान्नप्राशनंवृत्तेनैकेनाह॥ ॥मासेषष्ठेष्टमेनुनिग दितमशनंपंचमेस
प्तमेवाभीरोरुक्षंतिनंदाहरिवस्करजनीरिक्तकाः स्वर्क्षमेके। सद्दृक्कांशाह्न्यचांद्रेध्रुवमृदुचरभक्षिप्रभेजालिमीनोन्यांगेकेंद्रत्रिको
णांत्यमृतिषुविमलाखिंदुरिष्टोखिलोंगे॥१७॥ जन्मतः षष्ठेष्टमेमासेनुः नरस्यअशनंअन्नप्राशनंनिगदितंप्रोक्तं। भीरोः कन्या
याः पंचमेसप्तमेवामासिअशनंप्रोक्तं। अत्रनंदाहरिवस्करजनीरिक्तकाठज्झंतिमुनयः। नंदाप्रतिपत्षष्ठ्येकादश्यः। हरिर्द्वाद
शी। वस्करष्टमी। रजनीराज्ञिः। रिक्ताश्चतुर्थीनवमीचतुर्दश्यःताः। स्वर्क्षंजन्मनक्षत्रंएकेआचार्याः उज्झंति। तथाचोक्तं। जन्मर्क्षेत्री
स्वयंविद्यादिति। जन्मर्क्षंतुपुंविवाहान्नप्राशनादिषुबहुभिर्गृह्यतेतदग्रेवक्ष्यते। पुनः कस्मिन्सद्दृक्कांशाह्न्यद्दृक्काद्दृक्काणाः अं
शोनवांशः। अहोदिनंएषांसमाहारोदृक्कांशाहः। सतांग्रहस्यदृक्कांशाहः सद्दृक्कांशाहः। तस्मिन्कथंभूतेसद्दृक्कांशाह्नि। अचांद्रेनवि
द्यतेचांद्रंदृक्कांशाहोयस्मिन्तदचांद्रंतस्मिन्। चंद्रस्यदृक्कांशाहानिनिंद्यानि। अन्येषांशुभग्रहाणांशुभानीत्यर्थः। पुनः कस्मिन्
ध्रुवमृदुचरभक्षिप्रभेपूर्वोक्ते। पुनः कस्मिन्। अजालिमीनान्यांगे। अजोमेषः। अलिर्वृश्चिकः। मीनः प्रसिद्धः। एभ्योन्यलग्ने।
मेषवृश्चिकमीनलग्नान्यन्नप्राशनेनशुभानीत्यर्थः। कास्कसतीषु। केंद्रत्रिकोणांत्यमृतीषुविमलास्कसतीषु। केंद्राणिप्रथम
चतुर्थसप्तमदशमानि। त्रिकोणेनवपंच[illegible]मे। अंत्यंद्वादशं। मृतिरष्टमं। परवंल्लिंगंद्वंद्वतत्पुरुषयोः। एतास्वविमलास्कपापग्रह
रहितास्कसतीषु। पापग्रहोअनिष्टकारीत्यर्थः। इंदुश्चंद्रः। अखिलः पूर्णः। अंगेलग्नेदुष्टः। अन्नप्राशनेपूर्णश्चंद्रोलग्नेशुभ
इत्यर्थः। अन्यल्लग्नबलंपूर्ववत्। अत्रनारदः। षष्ठेमास्यष्टमेवापिपुंसांस्त्रीणांतुपंचमे। सप्तमेमासिवाकार्यंनवान्नप्राशनंशिशोः॥ १२

द्वात्रिंशेदिवसेपिवेति। तथोक्तंभविष्योत्तरे। अतीतेदिवसेपुण्येचंद्रताराबलान्विते। मृदुध्रुवक्षिप्रभेतुमालावाकुलयोषि
तः। शेषशायिनमानित्यप्राकूशीर्षंवि[illegible]न्यसेछिशुभिति॥ ॥भूम्युपवेशनमाह। सौम्येति। सौम्यंमृगः। अश्विप्रसिद्धा
। इज्यः पुष्यः। ध्रुवाणिपूर्वोक्तानि। उत्तरात्रोहिण्यः। इंद्रोज्येष्ठा। एभिर्नक्षत्रैः शुभदिवसेरिक्तादिवर्जिते। जन्मतः पंचमेमासि
भुविभूम्यांअर्भंनिदध्यात्। उपवेशयेदित्यर्थः। तथाचोक्तंपद्मपुराणे। पंचमेचतथामासिभूमौतमुपवेशयेत्। तत्रसर्वेग्र
हाः शस्ताभौमोप्यत्रविशेषतः। तिथिंविवर्जयेद्रिक्तांशस्तान्यार्क्षणुभामिनि। उत्तरात्रितयंसौम्यंपुष्य[illegible]क्षंशक्रदैवतं।
प्राजापत्यंचहस्तश्चशस्तआश्विनमित्रभं। वराहंपूजयेद्देवंपृथिवींचतथाद्विजान्। भूभागमुपलिप्याथतत्रकृत्वातु
मंडलं। वाद्यपुण्याहशब्देनक्षमोतमुपवेशयेदिति। उपवेशनमंत्रस्तत्रैवोक्तः। रक्षैनंवसुधेदेविसदासर्वगतंमम।
आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रियेति॥ ॥दुग्धपानमाह। एकत्रिंशद्दिनेति। एकत्रिंशत्तमेदिवसेअर्भेबाल
केकंबुनाशंखेनपयोदुग्धंयोज्यंपाययेदित्यर्थः। अत्रनृसिंहः। एकत्रिंशद्दिनेचैवपयः शंखेनयोजयेदिति। अथमा
तुस्तनपयस्त्वेपक्षांतरमाह। वाशननिगदितभैरिति। अंनप्राशननक्षत्रैर्वायोज्यं। भैरित्युपलक्षणं। अन्नप्राशनोक्तं
अन्यदपिविचार्यं। किंलक्षणेअर्भे। व्यग्वाशास्ये। विगतः अगुः राहुर्यस्याःसाव्यगुः साचासौआशाच। तस्यांआस्यंमुखं
यस्यसतथातस्मिन्। राहुवर्जितदिङ्मुखइत्यर्थः। लग्नबलंपूर्ववत्। व्यग्वाशास्येइत्युपलक्षणं। तेनरुद्रयोगिन्यादिकम् पं
पिवर्ज्यं। तथाचोक्तंज्योतिर्निबंधे। योगिनीराहुरुद्रादिसुखंचैवविवर्जयेत्। इति। राहुलेणं। गुरुभानोर्वेसेलाचामि

क्ष॰

नित्यंनैमित्तिकंतथेतिस्मरणात्संस्कारक्रमस्तुकात्यायनगृह्यकारिकायामुक्तः। गर्भाधानंपुंसवनंसीमंतोन्नयनंततः॥
जातकर्मनामधेयंनिष्क्रमप्राशनेक्रमात्। चूडोपनयनंदेवव्रतानांचचतुष्टयं। गोदानमेखलेन्मोक्षोविवाहःषोडशःक्रियाइति।
अनेनक्रमेणगर्भाधान्नाशनांतेषुमोढ्यादिकंबुधिमतानकिलोकयेरित्यर्थः। तथाबृहस्पतिः। मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्र
योः। नदोषकृत्तदामासलक्षणोबलवानिति। यमोपि। गर्भेवार्धुषिके भृत्ये श्राद्धेकर्मणिमासिके। सपिंडीकरणेनित्येनाधिमास
विवर्जयेदिति। भृगुः। सीमंतजातकादीनिप्राशनांतानिचक्रमात्। कर्तव्यानिनदोषोस्तियंचाननगतेगुराविति। कात्यायनस्मृतौ
।गर्भाधानादिकाअन्नप्राशनांतामलिम्लुचे। आकर्णवेधाःकर्तव्यानान्याइत्याहभास्करइत्यादि। अस्तादिकंचूडादिषुवर्जनीय
मित्याह। एवंचौलादिष्वपीति। एतद्गुरुसितास्तादिकंचूडादिषुकर्मसुउज्झेत्। अथबालत्ववृद्धत्वप्रमाणमाह। अथगुरुसि
तयोरिति। गुरुसितयोर्गुरुशुक्रयोर्बालवार्धक्येबालत्ववृद्धत्वेनगाहेसप्ताहंसप्ताहंवाल्यंसप्ताहंवार्धक्यमित्यर्थः। बालत्ववृद्धत्वेब
हुविधमस्ति। तत्रमध्यमःपक्षोंगीकृतः। शाखेशास्यास्तेबध्यमाह। अथोशाकेशमौढ्येइति। शाखेशोवेदपतिर्वक्ष्यमाणस्तस्यमौ
ढ्येअस्तेव्रतंमौंजीबंधनंनिगमारंभंवेदारंभमपिअर्थःश्रेष्ठोनकुर्यात्। तस्यास्तेअस्तादिकेकृतेसतिबटोर्मूर्खत्वंस्यात्। न
नुवेदारंभेमूर्खत्वंघटतेवेदपाठेव्रताल्। व्रतेमूर्खत्वंकिमुक्तं। उच्यते। व्रतबंधस्तुवेदाध्ययनार्थंक्रियते। तस्मात्तत्रापिमूर्खत्व
संघटते। तथाचयाज्ञवल्क्यः। उपनीयगुरुःशिष्यंमहाव्याहृतिपूर्वकं। वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेदिति। प्रति
वेदंब्रह्मचर्यंद्वादशाब्दानिपंचवा। ग्रहणांतिकमित्येकेकेशांतश्चैवषोडशे। यज्ञानांतपसांचैवशुभानांचैवकर्मणां॥वे १३

रएवहिद्विजातीनांनिःश्रेयसकरःपरइति। तथाचकात्यायनगृह्यसूत्रं। वेदंसमाप्यस्नायाद्ब्रह्मचर्यंवाष्टाचत्वारिंशकं
द्वादशकेप्येकेगुरुणानुज्ञातइत्यादि॥ ॥अथचौलनिर्णयंरथेनाह। चौलंमाघादिपंचस्वमधुषुगदितंद्वि
त्रिपंचोन्मितेब्देस्वाचाराद्वासगर्भाथपदिभवतिजननीत्यत्रनोकार्यमेतत्। सार्कंयंत्रोपनीत्याक्रियतइहनदोषंनिरोधो
नहिस्याज्ज्यास्तेबार्तवेदोव्रतमुपयमनंचाविशक्रहेःशक्रमार्थौ। १९। कार्यंवर्णेरिनारर्कशनिषुनिखिलेज्ञेन्द्रयेष्ठु
कृसामेद्धंसद्वाहित्यशाकेंदुभिरिनहरितस्त्रिनिभेश्चौलकर्म। द्यूने७कौरार्किभृगुकागनकविनिखिलास्त्युगा
स्तुदाःसुर्च्ये ज्ञाःसंतोस१२इष्टास्त्यजगुह ६शशिनो। १५। रात्रिसंध्येचरिक्ताः॥२०॥ चौलंचूडाकरणंमाघादिपं
चमासेषु। अमधुषुचैत्ररहितेषुगदितं। उक्तंच। तथाचोक्तंनारदेन। माघादिपंचकेचौलंहिताक्षीणविधुंमधुमि
तिति। द्वित्रिपंचोन्मितेब्देद्वितीयेतृतीयेपंचमेवर्षे। स्वाचाराद्वा। स्वकुलाचारतोवा। उक्तंचकात्यायनगृह्ये। सांवत्स
रिकस्यचूडाकरणंतृतीयेवाप्रतिहतेषोडशवर्षस्यकेशांतोयथामंगलंवासर्वेषामिति। सांवत्सरिकस्यअतिक्रांताब्दस्येतिह
रिहरमिश्रैर्व्याख्यातं। तथाच मदनगुरुशिष्यः। अब्देब्देकुर्वतेकेचित्पंचमेत्वद्वितीयके। उपनीत्यासहेवेतिविकल्पाःकुलधर्म
तइति। सगर्भायदिभवतिजननीत्यत्रनोकार्यमेतत्। अत्रउक्तेषुवर्षेषुद्वित्रिपंचमोन्मितेब्देकेषुजननीकुमारस्यमातायदि
सगर्भाभवतिगर्भवतीस्यात्। तदाएतच्चौलंनोकार्यं। पंचमाब्दादूर्ध्वंगर्भिण्यांसत्यामपिकार्यमित्यर्थसिद्धं। अत्रनार
दः। सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्। पंचमाब्दात्तथोर्ध्वंतुगर्भिण्यामपिकारयेत्। उक्तकालातिक्रमेणजन
नीयस्यगर्भिणी। ऊर्ध्वंमब्दंसंवमतश्चौलंकालंव्रतंतथा। उपनयनेनसहक्रियमाणेनदोषइत्याह। सार्कंयत्रोपनीत्या

क्रियतइहतद्दायंनिरोधोनहिस्यादिति। यत्रउपनीतस्यासाकंउपनयनेनसह क्रियते। तदाइहास्मिन्चौलेअयमुक्तोनिरोध
श्चैत्रमासभानुगभीलक्षणोनस्येवस्यात्। तदुक्तं। तेनेवसहोपनीतस्याकुर्याच्चेतदादोषोनविद्यतइति। अंबातवेनिषिध्यमा
ह। जन्मारंबातेवेदव्रतमुपयमनंचाक्षिपुद्धेः शुभार्थी। अंबातवेमातरजसिअदः चौलमित्यर्थः। व्रतंमौंजी। उपयमनं
विवाहं। आविशुद्धेः शुद्धिपर्यंतं शुभार्थीनरः एतत्त्रयंजह्यात्त्यजेत्। नकुर्यादित्यर्थः। तथाचमनुस्मृतौ। उद्वाहव्रत
चूडासुमातायदिरजस्वला। तदानमंगलंकार्यंशुद्धौकार्यंशुभेच्छुभिरिति। अन्यमुहूर्तालाभेकारिकानिबंधेशांति
कमुक्तं। अलाभेसमुहूर्तस्यरजोदोषेतुसं· स्थिते। श्रियंसंपूज्यतत्कुर्याच्छत्रहत्याभयंकरी। हेमीमाषमितां
वपांश्रीसूक्तविधिनार्चयेत्। प्रत्यृचंपायसंहुत्वाअभिषिच्यशुभमाचरेत्। सूतिकोदक्ययोःशुद्धेगांदद्या
द्धोमपूर्वकं। प्राप्तेकर्मणिशुद्धाख्यादितरस्मिन्शुध्यतीति। उदक्यारजस्वलायाः। अथर्वणविशेषेण
यारविशेषंतथानक्षत्राणिलग्नबलंचवृत्तेकेनाह। कार्यमिति। यर्णेभ्यो ब्राह्मणादिभिर्यथाक्रमेणइनार्का
किशनिषुचौलकर्मकार्यमित्यन्वयः। इनः सूर्यः। आरोभौमः। आर्किःशनिः। शनिःप्रसिद्धः। तेनायमर्थः।
एतदुक्तंभवति। विप्रेणरविवारे। क्षत्रियेणभौमवारे। वैश्येनशनिवारे। शूद्रेणापिशनिवारे। चौलंकर्तव्यमितिप्रयोगपारि
जातेि। शूद्रस्यद्वादशसंस्कारा उक्ताः। वेदव्रतोपनयनमहानाम्नीव्रतं। महा। विना द्वादशशूद्राणांसंस्कारानामभंत्र
तइति। निखिलैरिति। निखिलैश्चतुर्भिर्वर्णैरविशेषेणज्ञत्रयेबुधत्रये। शुक्लसामेशुक्लपक्षगतसोमवारेकार्यं। कृष्णप १४

रिक्तादिनक्षयंनंदांद्वादशीमष्टमीमिमां। त्यक्त्वान्यतिथयःश्रेष्ठाःप्राशनेशुभवासराइति। ज्योतिर्विवरणे। जन्मर्क्षेश्चीक्षयं
विधात्कर्मर्क्षेचातिसौख्यकृत्। आधानर्क्षेचबालानांस्मृतंवैरोगनाशनं। वृद्धनारदः। जीवसौम्यसितानांतुद्रेष्काणादिव
सांशकाः। बालान्नप्राशनेशस्तानचंद्रार्कार्किजास्तुजामिति। अर्णवे। गोश्वीकुंभस्तुलाकन्यासिंहःकर्किमृगोयमः। एताश्चरा
शयः शस्तानमेषझषवृश्चिकाइति। नारदः। वरस्थिरमृदुक्षिप्रनक्षत्रेषुनतेधनेति। श्रीपतिः। रवौलग्नेकुष्ठीत्यादि॥ ॥
अथएषुसंस्कारेषुगुरुशुक्रास्तादिदोषाभावः। एषुदोषःबालवृद्धत्वप्रमाणंशाखेशस्यमौढ्यंकिंकिंनकार्यमितिचतुर्थ
यंवृत्तेकेनाह॥ ॥गर्भाद्यन्नाशनांतेषुनगुरुसितयोर्बाल्यवार्ध्येचमौढ्यंजन्मकालस्यरोधात्। हरिगुरुमयनंयाम्यमून
धिमासौ। एतच्चौलादिषूक्ष्वेदयगुरुसितयोर्बाल्यवार्द्धेनगाहे। चाथौशाखेशमौढ्येव्रतमपिनिगमारंभमार्येनकुर्यात्।
॥३८॥ गर्भाद्यन्नाशनांतेषुगर्भाधानादिअन्नप्राशनांतेषुकर्मसुगुरुसितयोर्बाल्यवार्ध्येचपरंमौढ्यंगुरुशुक्रमूढत्वंनजह्या
त्। कस्माद्धेतोः। कालस्यरोधात्। यतःशास्त्रेगर्भाधानादीनांअन्नप्राशनांतानांकर्मणांकालनिरोधः कृतोस्ति। तस्माद्धेतोः
हरिंगुरुंसिंहस्थितंबृहस्पतियाम्यमयनंदक्षिणायनंऊनाधिमासौक्षयमासाधिमासौनत्यजेत्। कालस्यरोधादित्येत
सर्वंबुध्यावगंतव्यं। तद्यथा। प्रसूतिसमयएवजातकर्मविहितंतत्रातिकालनिरोधात्। किमप्यस्तादिकंनचिंत्यं। अन्नाशनं
तंतुमासेषष्ठेष्टमेवेतिविकल्पेनमासद्वयेविहितंतत्रयस्मिन्मासेमौढ्यादिकंनस्यात्तत्रकर्तव्यं। कालस्यसावकाशत्वात्। तयोर
धिमासयोर्यदिसिंहस्थगुर्वादिनिरोधःस्यात्सोप्यत्रनचिंतनीयः। एवंगर्भाद्यन्नाशनांतेषुविचारणीयं। अनन्यगतिकंकुर्यात्

मु॰मार्त॰टी ॥ षोडशीभागांकसंस्थो २।५।११।७।९ व्ययजलनिधनत्र्यब्धगे।१२।४।८।३।१०। श्चेन्नविद्धः शस्तोनिषेधेपिवामंशु

१७ भेद्दहखचरैर्वेधितोनोष्टमस्थः॥ शुक्लेमाघादिपंचस्विनिफलमहिदिवसेप्रागद्वलेकोव्रतंसस्यक्तानध्यायरिक्ता

२	५	३	७	६
२	४	८	३	७

तिथिमुनि ७ मदनां१३ श्चंद्रभागंप्रदोषं॥२५॥ द्वीघायागांकसंस्थोगुरुस्तदाशुभः स्यात्। तदाकदा। यदिव्ययजलनिधन

त्र्यब्धगैः खचरैर्नोविद्धः स्यात्। द्वौद्वितीयं। इषुः पंचमं। आयएकादशं। अगाः सप्तमं। अंकानवमं। एतत्संस्थोगुरुः॥ ॥ व्ययोद्वा

दशां। जलंचतुर्थं। निधनंअष्टमं। त्रयः तृतीयं। अभ्रंदशमं। एतत्संस्थैः खचरैर्यदिनोविद्धोभवतितदाशुभः स्यात्। वेधितश्चेदशुभदस्

थंः। अनिष्टोपिव्ययजलनिधनत्र्यभ्रगोपिवामंविद्धः सन्द्वीघायागांकसंस्थैः खचरैर्वेधितः सन्नित्यर्थः। इहास्मिन्व्रतबंधेविवाहेवाशु

संधितः वसंतादि ऋतुप्रवृत्तेः षट्षष्ठी ६६ षड्भिरधिकाषष्टिः षट्ष ष्टिः घटीनां षट्षष्टी इत्यर्थः। ऋतुप्रवृत्तिलक्षणं रत्नमालायां। मृ
गादिराशिद्वय भानुभोगात्षड् तवस्युः शिशिरो वसंतः। ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमंतनामा कथितो त्र षष्ठः। इति। तिथिभयुक्संधौ तिथि
नक्षत्रयोगानां संधौ द्विनाड्यौ पृथक् द्वे द्वे घटिके त्याज्ये।। अथपूर्वमुक्तं ग्रहजनिप्रांतोद्भसंस्तकमितितत्र ग्रहणास्तकलक्षणमाह।।
ग्रहणादिति। ग्रहणात ग्रहणसकाशात उपरितत्सादैस्त्रिवेदषडिभान। ३।४।६।८। दिवसांस्त्यजेत। एतदुक्तंभवति। पादैकमात्रेग्रहणेत्रीं दिव
सांस्त्यजेत। अर्धग्रहणे चतुरो दिवसान। त्रिपादग्रहणे षट् दिवसान। सर्वग्रहणे अष्टौ दिवसांस्त्यजेत।। ।। प्राग्र्धितान् संत्यजेत। प्राग्ग्रह
णात् प्रथमतः अर्धितान् त्रिवेदादीन् दिवसान् संत्यजेत। एतदुक्तं भवति। पादग्रहणे त्रयाणामर्धं। तद्यथा।। पादग्रहणे ग्रहणात्पूर्वं सार्धैकं दिवसं
अर्धग्रहणे चतुर्णामर्धं द्वौ। पादत्रयग्रहणे ष ण्णामर्धं त्रीन। सर्वग्रहणेष्टानामर्धं चतुरो दिवसान ग्रहणात्पूर्वं सजेत। तथचोक्तं शार्ङ्गी

मु॰मा॰टी॰
२६

यविवाहपटले। सर्वग्रासे सप्तदिनान्यष्टौ शुभकार्येषु वर्जयेत्। त्रिभागेने ॰ दृष्टे खग्रासन [illegible] जेत्। धग्रासे चतुर्दिनं। चतुर्थां
शे त्रिरात्रं तु ग्रहणे चंद्रसूर्ययोरिति। अत्राप्यंतराले नुपातो ज्ञेयः। तथा चार्ष्टिषेणिः। ग्रहणात्त्रिदिनं पूर्वं परतो दिनसप्तकमिति। सर्वग्रहणविष
यं। ज्योतिःप्रकाशेपि। खग्रासे सर्वपादोनखंडांघ्र्यर्द्धे तु वासराः। गजाश्वेषुषडब्धिरामा ज्ञानेष्टाः प्राकृतद्दलं ग्रहेइति।। ।।अथउत्पातेव
र्ज्यकालमाह। उत्पाते त्र्यहमिति। उत्पाते भूकंपनिर्घातमहोल्काशनिपातादिके अत्र्यहं। त्रिमितानां अह्नां समाहारः अत्र्यहं सप्ताह
मित्यर्थः। त्यजेत्। उत्पाते जाते सति सप्ताहं शुभे कर्मणि त्यजेदित्यर्थः। दोषांतरमाह। उद्गमं चा शिखिनः। शिखिनः केतोः उद्गमं उदयं च त्य
जेत्। यावत्केतूदयास्तावन्मंगलं न कुर्यादित्यर्थः। तथा चार्ष्टिषेणिः। परं सप्ताहमुत्पाते सद्यो केतूदयं शुभेइति। भद्रालक्षणमाह। राकाष्ट
मी प्राक्दले विष्टिः स्यात्। राका पूर्णिमा। अष्टमी प्रसिद्धा। अनयोस्तिथ्योः प्राग्दले पूर्वार्धे विष्टिर्विष्टिः स्यात्। प्रांत्ये भूतरुद्रयोः भूतश्चतुर्भी
।रुद्र एकादशी। अनयोः प्रांत्ये दले विष्टिः स्यात्। एतद्भद्राचतुष्टयं। अवकुले शुक्लपक्षे स्यात्। कृष्णेनिरेकेषिह। इह उक्तेषु तिथिषु निरेकेषु
एकरहितेषु कृष्णे कृष्णपक्षे विष्टिः स्यात्। भद्रापवादः शार्ङ्गीयविवाहपटले दूषितः। अतः कारणात् अत्र नोक्तः।। ।।अथगंडांतल
क्षणमाह। सार्पेंद्रांतिमभांततोब्धि ४ घटिकं पूर्णांततोब्ध्यर्धकं २ कीटांत्यालिविरामतः कु १ घटिकं गंडांतमूर्ध्वाधरं। सावेश्व्य
हगाख्ययोगविरतो भं तत्र चंडायुधं दुर्योगो दिनभाद्वसाभिजिदयुग्भे कस्तदेकार्गलः।।१०।। ।।सार्पं आश्लेषा। इंद्रो ज्येष्ठा
।अंतिभं रेवती। एषामंतस्तस्मात्कालात् प्राक् परं पूर्वापरतः अब्धिघटिकं गंडांतकं स्यात्। अब्ध्यश्चतस्रो घटिका यस्मिंनि २६
त्यब्धिघटिकं। चतुर्घटिकमित्यर्थः। एतद्गुक्तं भवति। उक्तनक्षत्रांतात् पूर्वतो घटिकाद्वयं। परतो घटिकाद्वयं। एवं घटिका

थां

मुम्मा०टी० चतुर्दशं तद्रात्रौ त्रयोदशं। सोमे दिवा द्वादशं तद्रात्रौ एकादशमीत्यादि। अथ तेरवेः इंद्रादिभिर्मुहूर्तैः। अमरेज्यज्ञास्फुजिद्भ्यः सकाशात् कालं कंट
२७ कं टेन घंटं। इनस्यापत्यं पुमान् वैवियमः। तस्य घंटो यमघंट इत्यर्थस्तं उज्झंति। एतदुक्तं भवति। अरमेज्यो गुरुस्तस्मात्सकाशात् वारेषु इंद्रादि
भिर्मुहूर्तैः कालं उज्झंति। ज्ञात् बुधात् तेरवेंद्रादिभिः कंटकं। आस्फुजिच्छुक्रः तस्मात्सकाशात् तेरवेंद्रादिभिः मुहूर्तैः। ऐनिघंटं उज्झंति॥ ॥
अथ दुर्मुहूर्तानाह। शुक्रेंदुज्ञीज्यपमेषु गो ९ कु ९ रवि १४ भू १ तुल्या मुहूर्ता दिवा दुष्टाः स्युः कुजा निश्यगो ७ यइतरेसं त्यर्धयामादिषु। प्रेश्यः
संप्राति रक्षितुर्य ४ चरणे ब्रह्मद्वितीये २ पमः सूर्याद्या अनु विश्वपाशियमलेंदुद्व्यर्कभैर्मृत्युदाः॥ २२॥ ॥ शुक्रः प्रसिद्धः। इंदुश्चं
द्रः। इज्यो गुरुः। यमः शनिः। एषु क्रमेण गोकुरविभूतुल्या मुहूर्ता दिवा दुष्टाः स्युः। मुहूर्ता इत्यर्थः। कुजा निश्यगः। कुजा निशि अगः सप्तमो दु
मुहूर्तो दुर्मुहूर्तः। अथ ग्रंथांतरे। अर्यम्णोर्के तुहिनकरणे राक्षसब्राह्मसंज्ञा वित्यादि बहवो दुर्मुहूर्ताः उक्ताः अत्र तु स्वल्पा उक्तास्तस्य
परिहारमाह। यइतरदिति। ये इतरे दुर्मुहूर्ता ग्रंथां नैवपठितास्ते सर्वे अर्धयामादिषु संति अतो मया त्र नोक्ता अतो र्धयामादीनां त्यागे
तेपि त्यक्ताः स्युः। किं ग्रंथविस्तरेणेति भावः। एतत्तु सूक्ष्मज्ञाज्ञास्यंति। यथा रवौ चतुर्दशो मुहूर्तो दुर्मुहूर्तः। तत्र कुलिकोपि चतुर्दशो मुहू
र्तस्तयोरेकत्र सद्भाव इत्यन्योपि विचारगम्यः। नन्वेवं तर्हि पूर्वे व्यर्थे पठितं मेवं। तेस्त्वनधिकाधिकदोषा व्यवस्थयोक्ता इति न दोषः॥ ॥
अथ पातसंभवमाह। प्रेश्य इति। संप्रतिसांप्र तं रक्षितुर्ये चरणे रक्षियोगस्य चतुर्थ चरणे तथा ब्रह्मद्वितीये। ब्रह्मयोगस्य द्वितीय चरणे
ऽपमः क्रांतिपातो विलोक्य ब्रह्मसिद्धांतायुक्तप्रकारेण विलोक्य इत्यर्थः॥ ॥ अथ मृत्युसर्वत्र वर्ज्य इत्युक्तत्वान्मृत्युयोगमा
ह॥ अर्काद्या इति। अर्काद्याः सूर्यादयः क्रमेण अन्वादिभिर्नक्षत्रैः सह मृत्युदाः स्युः। अनु अनुराधा। विश्वे उत्तराषाढा। पाशी शततारका॥ २७

यमलौ अश्विनी। इंदुर्मृगः। अहिराश्लेषा। अर्कभं हस्तः। एतदुक्तं भवति। अर्को अनुराधया सह वर्तमानो मृत्युदः। सोम उत्तराषाढया।
भौमः शततारकया। बुधो श्विन्या। गुरुर्मृगेण। शुक्रो श्लेषया। शनिर्हस्तेन सहितो मृत्युदः स्यादित्यर्थः॥ ॥ अथ विषघटिका आ
ह। पंचाश ५० जिन २४ खाग्नय ३० श्वरखक्ष्मा ४० आरवंडला १४ मूर्छना २१ त्रिंश ३० द्विंश २० रदाः ३२ खराम ३० नख २० धृत्ये १८
काश्विनो २१ विंशतिः २० शक्रे १४ द्वौ १४ दश १० वासवा १४ रसशराः ५६ सिध्या २४ नखा २० शा १० दिशो १० धृत्य १८ धी १६ जिन २४
खाग्नयो ३० श्विलइमाभ्यो ग्नेब्धि ४ नाड्यो विषं॥ २३॥ पंचाशदिति। अश्वितः अश्विन्याः सकाशात् नक्षत्रेषु इमाभ्यः पंचाशज्जि
नेत्यादिभ्यो घटिकाभ्यो ग्रे परतो ब्धिनाड्यः चतुर्नाड्यो विषं स्यात्। एतदुक्तं भवति। अश्विन्यां पंचाशद् घटिकाभ्यो नंतरं चतुर्नाड्यो
विषं। एवमन्यत्। अत्रांकन्यास एव व्याख्यानं॥ ॥ अथैतांस्पष्टीकरणमाह। नक्षत्रस्य गतैष्ययोग गुणितः स्वस्वध्रुवः षष्टि ६०
त हृत्स्पष्टः स्यादत ऊर्ध्वमब्धिकाः ४ स्पष्टास्युरेवं कृताः। चंद्रः सौम्यखगान्वितो थवा शुभस्वक्षेत्रदृष्टोथवा स्वांशगः कोणा ९।५ स्ता ७ प्त्र १० मुखेषु
वा ४ विषभयं हंतीह सांगेंगपः॥ २४॥ नक्षत्रस्येति। नक्षत्रस्य गतैष्ययोगेन गुणितः स्वस्वध्रुवः पचाशज्जिनादिः षष्ठिहृत्स्पष्टः स्या
त्। अतऊर्ध्वं स्पष्टध्रुवानंतरं अब्धिघटिकाश्चतुर्नाड्यः। एवमुक्तप्रकारेण कृताः सत्यः स्पष्टाः स्युः। स्पष्टानंतरं विषाख्या ज्ञेया इत्यर्थः।
अथासां विषघटीनामपवादः। चंद्र इति। चंद्रः सौम्यखगः शुभग्रहराशिगः सन् विषयभयं हंति। वा इत्यथवा कोणास्तरबबंधुगोपि
चंद्रो विषभयं हंति। कोणेन वपंचमे। अस्तं सप्तमं। खं दशमं। बंधुश्चतुर्थं। एतत्स्थानगोपि विषभयं हंतीत्यर्थः। अत्रास्मिन् कोणा
दिस्थाने सांगे सलग्ने वर्तमानो गपो लग्नपो विषभयं हंति। एवं पंचभंगाः संति। ननु सप्तमः खेटो विवाहे निंदितः कथमत्र चंद्रोग्रहीतः स
त्यं इदं वाक्यं सर्वकर्मसाधारणं। तस्मान्निं दितस्थानं वर्जयित्वान्यत्रग्राह्यः। तथा च बृहस्पतिः। चंद्रो विषघटीदोषं हंति केंद्रत्रिकोणः।

मु०मार्त०टी० लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नयोस्तथा। मूलप्रदीपे। विषनाड्युस्थितंदोषंहंतिसौम्यस्थगःशशी। मित्रदृष्टोथवास्वायंवर्गस्थोलग्नपो
पिवेति।। ।।अथविवाहलग्नेइष्टानिष्टग्रहानाह। लग्ने१ चंद्रबलारिपौ६ शशिसितोसर्वेद्युने७ खे१० बुधोंत्ये१२ गुःसुखगो४
२८ ष्टमाः८ कुजशुभाः शुक्रःस्तृतीयः३ शुचे। लाभे११ सर्वखगाः शुभाअखिलगा २।५।९। स्त्र्यष्टारिगा ३।८।६। स्युःखलाश्चंद्रस्त्वंबुध
नि।३।४।२। श्रियेंशभदृक्केद्रस्यान्मृत्यवेष्टारिगः८।६।। ।।२५।। चंद्रश्चखलाश्चतेचंद्रक्रूरालग्नेवर्तमानाः शुचेशोकायभवंति
।तथारिपौषष्ठेविधुसितौचंद्रशुक्रौ।तथासर्वेद्युने।सर्वेक्रूरसौम्याःद्युनेसप्तमे।तथाखेदशमेबुधः।तथाअंत्येश्चंद्रोस्येद्वादशे।।
स्य६ अगुःराहुःसुखगश्चतुर्थगः।नविद्यतेगावःकिरणाःयस्यसःअगूराहुः।राहुस्तमोगुरसुरश्चेति।बृहज्जातके।राहुनामानि।तथाअष्ट
माः कुजशुभाः।कुजश्चशुभाश्चेतितथा।शुक्रःस्तृतीयःस्पष्टार्थं।एतेप्रत्येकमुक्तस्थानगाःशुचेशोकायभवंति।अथइष्टानाह।।
लाभेएकादशेसर्वखगाः।तथाशुभाः।सौम्यखगाः।अखिलगाःनिंद्यंविनासर्वस्थानगाः।तथाखलाक्रूराः त्र्यष्टारिगाः।तृतीयाष्टष
ष्ठगाः।अत्रअष्टमम भौमोनिंदितः।तंविनापापाअष्टगाग्राह्याः।चंद्रस्त्वंबुधने।तृतीयेचतुर्थेद्वितीयेचंद्रः।एतेप्रत्येकंश्रियेल
क्ष्म्यैभवंति।श्रीकारकाइत्यर्थः।एवंशुभाशुभग्रहानुक्त्वातत्रविशेष माह।अंशेति।अंशभदृक्केद्रअष्टारिगःसन्मृत्यवेस्यात्।
अंशोनवांशः।भंलग्नं।दृक्कोदृक्काणः एषामीट्स्वामीनवांशस्वामीलग्नस्वामीदृक्काणस्वामी।एतेप्रत्येकमष्टमषष्ठगाः।मृत्युहेतु
वोभवंतीत्यर्थः।अथकांश्चिद्दोषाणामपवादमाह।तत्रप्रथमंभृगुषष्ठापवादमाह।कन्या६ तौक्षिक८ शत्रुगेहगः४।५।भृगुःषष्ठो
पिनोभंगकृत्भौमोमृत्युगतोपि८ शत्रु३।६।शशिनोर्गेहस्थितो४ वाकेंगः।।शुक्रेंत्यारि१२।६।विधुःस्ववर्गेदृगितःस्वोजोयुजोज्यतनो। २८

चतुष्टयंनक्षत्रगंडांतं।अथतिथिगंडांतमाह।पूर्णांततोव्यर्धकं।पूर्णाःपंचमीदशमीपूर्णिमाख्यास्तासां अंततःअध्यर्धकंद्विघटिकंगंडांतं
पूर्वापरतःस्यात्।अथलग्नगंडांतमाह।कीटांत्यालिविरामतःकुघटिकं।कीटःकर्कःअंत्योमीनः।अलिर्वृश्चिकः।एषांविरामेवसा
नेतस्मात्कुघटिकंएकघटिकं।प्रागर्धघटिका।परतोर्धघटिका।एवमेकघटिकंलग्नगंडांतंस्यात्।अथचंडायुधमाह।सार्धेइति।सार्धाद्ये
गः।वैधृतिः।शूलः।व्यतीपातः।हर्षणः।गंगंडः।एतदाख्ययोगानांविरतिरवसानंतत्रयद्भंनक्षत्रंतस्मिन्चंडायुधंस्यात्।।
चंडंप्रचंडंमहत्एवंविधमायुधंस्यात्।ओयुधंघातकंतस्मात्नक्षत्रंवर्ज्यमित्यर्थः।अथैकार्गलमाह।दुर्योगइति।विष्कंभातिगंड
शूलगंडव्याघातवज्रंव्यतीपात परिघवैधृतयोनवदुर्योगाः।एषामन्यतमेसतिदिनभादिदिननक्षत्रादिसाभिजित्युग्मे अभिजि
तासहायुग्मेविषमनक्षत्रेयदाअर्कःसूर्योभवतितदाएकार्गलःस्यात्।एकाअर्गलारुभावरोधिनीयस्मिन्नित्येकार्गलः।शुभफला
क पहइत्यर्थः। ।।अथवारदोषमाह।सूर्याद्यामदलंद्विवेबनिगमा४ द्रु७ श्वी२ षु५ नाग८ त्रि३ षट्६ संख्यार्ककुलिकंदिवेंद्र१४
रवि१२ दिङ्१० नाग८ तुं६ वेद४ द्विकं२ व्येकंतानि यौशिडशांशःप्रमितंतथ्यंशुभेषुउज्झंतितैःकालंकंटकमैनिघंटममरेज्यज्ञास्फुजि
त्सुःक्रमात्।।२१।। ।।सूर्यात्सकाशात्वारेषुक्रमेणनिगमादिकंयामदलंयामार्धमुज्झंतित्यजंतिमुनयइतिविशेषः।युग्मितंरवौ
।सप्तमितंसोमे।अश्विनोद्वौतन्मितंभौमे।इषवःपंचतन्मितंबुधे।नागाअष्टौतन्मितंगुरौ।त्रिमितंशुक्रे।अरयःषट्तन्मितंशनौ।इत्थं
धा तद्यामदलंद्विवेवउज्झंति।नरात्रौ।अथकुलिकादीनाह।इनादारूसूर्याद्दिवारेदिवाइंद्रादिकंषोडशांशकुलिकंउज्झंति।अपरेतिथ्यं
शंपंचदशांशकुलिकंउज्झंति।तन्निशितरात्रौव्येकंएकरहितंइंद्रादिकं षोड शांशंपंचदशांशंवउज्झंति।तद्यथा।स्वोदिवाइंद्रमितं

हचंद्रदोषापवादमाह। सग्रहः ग्रहेणग्रहाभ्यांग्रहैर्वासहवर्तमानः सग्रहः। बुधगुरुवर्जमन्यग्रहयुक्तइत्यर्थः। यतः पूर्वमुक्तं। हिमरु
चिर्निज्योनखेटान्वितमिति। एवंविधः सग्रहोविधुः केंद्रनिजगेवर्गेज्येक्षितः सन्शुभदः स्यात्। केंद्रंप्रसिद्धं। निजवर्गेनिजांशस्त
त्रवर्तमानोईज्यः। केंद्रनिजवर्गेज्यः। तेनईक्षितोवलोकितः सग्रहचंद्रमाः शुभदइतिभंगकरोनस्यादित्यर्थः। उक्तंच। गुरुः स्वकीय
१५४ वर्गस्थोबलवान्कंटकस्थितः। प[…]न्सग्रहशीतांशुकृतदोषंविलयंनयेदिति॥ ॥अथसामान्यदोषापवादमाह॥ ॥दोषाणां
शतमिंदुजः शतयुगंशुक्रोगुरुर्घातयेल्लक्षंकंटक॥१४।७।१०।कोणगोंग५।९। भिनचंद्रोजस्विपातादिकान्। भंगाय्येविवलान
श्री तेत्रसफलाः संध्यं[…]तुल्याफलस्याद्भावांशसमोग्रहोखिलफलः संध्यूर्ध्वगस्यात्परः॥२७॥ ॥कंटककोणगः केंद्रत्रिको
णगः इंदुजोबुधो दोषणांशतंघातयेत्। तत्रस्थोभृगुर्दोषाणांशतयुगंद्विशतंघातयेत्। तत्रस्थोगुरुर्दोषाणांलक्षंघातयेत्। अपवादां
तरमाह॥ ॥अंगंलग्नंइनचंद्रोजस्वि। इनचंद्रयोः सूर्यचंद्रयोराज्ञोबलमस्यास्तीतिइनचंद्रोजस्वि। एवंविधंलग्नंपातादिकान्
घातयेत्। उक्तंवसिष्ठेन॥ एकार्गलोपग्रहपातलत्ताजामित्रकर्तर्युदयादिदोषाः। नश्यंतिचंद्रार्कबलोपपन्नेलग्नेयथार्कोभ्युदये
धकारइति। अथदोषापवादभंगमाह। भंगायेति। येभंगाः दोषभंगाः विबलाः। गतबलानिर्बलास्तेत्रदोषभंगविषयेसफला
नभवंति। दोषभंगसमर्थानभवंतीत्यर्थः। तस्माद्दोषभंगकृतांबलंविचार्यदोषभंगमादिशेदितिभावः। तथाचोक्त[…]मस्ति।
सामान्येनोदितादोषाभंगास्तेषांलुपबुधैः। यद्दितेबलहीनास्युः प्रध्वंसाभावतांययुरिति। अथभावफलविमाह। संध्यंशतुल्योऽफ
लइति। संध्यंशतुल्यः संधिभागसमानोग्रहोऽफलदः स्यात्सदसत्फलदोनभवति। भावांशतुल्योग्रहोअखिलफलः स्यात्॥ २९

संपूर्णफलदाताभवति। अर्थान्मध्येऽनुपातात्फलंवेद्यं। विशेषमाह। संध्यूर्ध्वगः स्यात्परइति। संध्यूर्ध्वगः संध्यधिकोग्रहः परस्यात्
परभावफलदोभवतीत्यर्थः। संध्यंशतुल्यइत्याद्युक्तंतर्हिकेतेसंधयः केतोभावाइत्यपेक्षायांतत्साधनंकिंचित्स्थूलंचतेनैकेनाह।
॥ ॥भागास्युर्नतनाडिकारसहतास्तत्स्थीनयुक्प्राक्परेस्यैः खंसरसंस्फुटंकथितवल्लग्नंसषड्भंमदः। व्यस्ताभ्यांत्रि[…]लवोथद
कुच्युतउभौयोज्यौकुदृग्घ्नौ। पृथकूलग्नेचांबुनितेसषट्तनुसुखाः संधिर्द्वियोगार्धकं॥२८॥ अथपाठांतरं। व्यस्ताभ्यांत्रिलवोथ
कच्युतइमौभूयोगपातालयोः क्षेप्यौषट्ट्तनुतः ससंधयइमेषड्भान्विताः स्युः परे॥ नतनाडिकारसहताभागाः स्युः। ततसाधनं
जातकपद्धत्यामुक्तं॥ राते: शेषमितंयुतंदिनदलेनाङ्गाग्नतंशेषकंविश्लेष्यं[…]खलुपूर्वपश्चिमनतमिति। एतदुक्तंभवति। सूर्यैष्टलग्नाभ्या
मिष्टकालंसाधयित्वानतंचसाधयित्वातदिष्टकालभवंनतंषड्गुणांसत्भागास्युरित्यर्थः। प्राक्पश्चिमनतेक्रमेणतन्यूनयुक्स्व
यैः। तेभागैर्न्यूनयुक्। पूर्वनतेसतिन्यूनः। पश्चिमनतेसतियुक्। युक्तस्तात्कालिकः सूर्यः खंस्यात् दशमभावःस्यादित्यर्थः॥
तत्खंसरसंषड्राशियुक्तंसत्स्फुटंखंस्यात्। चतुर्थभावः स्यादित्यर्थः। कथितवल्लग्नंज्ञेयंतत्षड्[…]षड्राशिसहितंसत्समदः स्यात्
सप्तमभावः स्यादित्यर्थः। एवंभावचतुष्टयंसाधयित्वातभावसाधनमाह॥ व्यस्ताभ्यांत्रिलवइति। विगतः अस्तंअस्तभावोयस्मा
त्तद्व्यस्तं। तच्चततअभ्रंचव्यस्ताभ्रं। सप्तभावरहितदशमभावइत्यर्थः। तस्यत्रिलवोराश्यादिकोग्राह्यः। अथदकुच्युतः द्विपुनि
तः कार्यः। एतौउभौकिंवलत्रिलवदकुच्युतत्रिलवौपृथक्पृथक्कु१द२द्वौसंतौपृथक्पृथक्कुलग्नेअंबुनिचयोज्यौ। अयमर्थः।
कुश्चैत्रिलवोलग्नेयोजितः सन्द्वितीयभावोभवति।[…]द[…]द्वौयोजितः सन्तृतीयभावोभवति। अथदकुच्युतस्त्रिलवः कु१

मु०मा०टी० ध्रः अंबुनि पूर्वसाधिते चतुर्थभावे योजितः सन् पंचमभावो भवति। तत्रैव द्वि२ योजितः सन् षष्ठभावो भवति। तेषट्। ते अनंतरसाधिताभा
वाः सषट्षड्राशिसहिताः कार्याः। तेनत्सप्तमाज्ञेयाः। लग्नं सषड्भं मदइतिवत्। धनं सषड्भं मृत्युरितिवद्वत्। तनुमुखाः लग्नाद्याभा
३० वास्युः॥ ॥अथ संधिसाधनमाह। संधिर्द्वियोगार्धकमिति। द्वयोर्भावयोर्योगार्धं संधिः स्यादिति स्पष्टं। अथ पाठांतरस्य व्याख्या
। व्यस्तेति। सप्तमभावरहितस्य दशमभावस्य अखिलनः षड्भागाराश्यादिकः। सखथकुभू च्युतः। एकस्मात् लातितः। इमे उभौ भूयोवा
रंबार भंगपाताल्ययोः प्रथमचतुर्थभावयोः क्षेप्यो तनुतः लग्नात् संधयः संधिसहिताः षड्भावास्युः। इमे भावाः षड्भान्विताः सं
तः परे स संधयो भावास्युः। एवं भावसंधिसाधनं तत्ससंध्यं मतुल्याफलइति प्रागुक्तं ग्रहफलं विचार्यं। अंतरे अनुपातः। भावसंध्यं
तरेणाप्तं संधिखेटांतरात्सलभितिजातकस्थंतः। एतत्स्थूलभावान [illegible] यनं। सूक्ष्मं तु जातकफलादावगंतव्यं॥ ॥अथकर्तरीदोषलक्षणं
सापवादमाह। इंदोर्वाहिरिजाद्व्ययस्वगतयोः स्याक्रूरयोः कर्तरी स्वे वक्रे व्ययत्य ऋजु मे हत्यय गुरोरिष्फे शुभे वा तनौ। स्वक्षे सौम्यखगेपि
वा गुरुभृगुज्ञैः केंद्रकोणेषु वा चेत्तत्कर्तरिकारकौ दिवि चरौ नीचस्थितौ मानहि॥ २१॥ ॥इंदोश्चंद्रात्सकाशाद्वाइत्यथवा हति
जाल्लग्नात्सकाशाद्व्ययस्वगतयोः व्ययं। द्वादशं। सं द्वितीयं। तदुभयत्रगतयोः क्रूरयोः सतोः कर्तरी स्यात्। अथ महत्कर्तरील्लक्ष
णमाह॥ ॥स्वे द्वितीये स्थितः क्रूरो यदि वक्री स्यात् तं ते द्वादशे स्थितः क्रूरो यदि ऋजुमार्गगामी स्यात्तदा महती कर्तरी स्यात्। एवं
कर्तरीलक्षणमुक्त्वाथ तद्भंगमाह। गुरोरिष्फेपासेद्वादशे सा कर्तरी न स्यादेवे [illegible] त्येको भंगः। वा इत्यथवा शुभे ग्रहे बुधगुरुशु
क्राणामन्यतमे तनौ लग्ने सति सा न॥ ॥इति द्वितीयो भंगः। स्वे द्वितीये भक्ते चंद्रे सति सा नेति तृतीयो भंगः। वा इत्यथवा ३०

शुक्रे वा शुभदे सोथ कंटक १।४।७।१० निजांशेष्वेक्षितः सग्रहः॥ २६॥ कन्याप्रभृतिस्थौ। शुक्रस्य नीचं। तौक्षिको धनुर्धरः। शत्रुगेहं पूर्वो
क्तं। भृगुभुवः शत्रुरवींद्रूइति। अत्र रवेर्गेहं सिंहः। इंदुर्गेहं कर्कटः। एषां कन्यादीनामन्यतमगे हगतो भृगुः षष्ठोपि नो भंगक
त्स्यात्। लग्नभंगकरो न भवतीत्यर्थः। तथा च कश्यपः। नीचगे तत्तुरीये वा शत्रुक्षेत्रगतेपि वा। भृगुषष्ठाख्यया दोषो नास्ति तत्र
न संशयः इ[illegible]ति। अथ कुजाष्टमदोषापवादमाह। भौमोभ्रस्युगतोपि अष्टमगतोपि शत्रुराशिनो गेहस्थितो यदि भव
ति वा इत्यथवा अर्कगः अस्तंगतो यदि भवति तदा तेन भंगकृत्स्यात्। अस्य शत्रुर्बुधः कुजस्य विदरीरिति प्रागुक्तः। तस्य
गृहं मिथुनः कन्या च। शशिगृहं कर्कटः। तत्स्य नीचं। एषामन्यतमस्थः अस्तंगतो वा अष्टमस्थोपि लग्नभंगकरो न भवतीत्यर्थः। अस्त
गइति पाठे स एवार्थः। तथा च कश्यपः। अस्तगे नीचगे भौमे शत्रुक्षेत्रगतेपि वा। कुजाष्टमोद्भवो दोषो न किंचिदपि विद्यतइति। अथद्वा
दशषष्ठचंद्रापवादमाह। शुक्केइति। शुक्ले शुक्लपक्षे अंत्यारिविधुः द्वादशः षष्ठो वा चंद्रः शुभवर्गदृगितः वर्गाश्च दृशश्च वर्गदृशः शो
भनानां वर्गदृशः सुवर्गदृशः इतः प्राप्तः शुभवर्गदृगितः शुभवर्गेशुभदृष्टियुक्त इत्यर्थः। एवंविधो विधुः शुभदः स्यात्। किमस्मिन्
सति। ईज्ये गुरौ शुक्रे वा तनौ लग्ने सति। कथंभूते गुरौ स्वोजोयुजि। शुभतरं ओजः स्वोजः उत्कृष्टबलं तेन युनक्ति स्वोजोयुक्
तस्मिन् स्वोजोयुजि। अतिबलिष्ठे सतीत्यर्थः। शुक्रस्याप्येतद्विशेषणं। एतदुक्तं भवति। बलिष्ठे गुरौ शुक्रे वा लग्नस्थे सति शुक्लपक्षे
चंद्रमाः शुभवर्गदृष्टिसहितो यदि भवति। तदा द्वादशषष्ठगोपि शुभदइति भंगकरो न स्यात्। अन्यथा न। मुहूर्तदर्पणे। कवौ गुरौ
ग वा बलिनि स्थिते तनौ शुभेन दृष्टः शुभवर्गगः शशी। विवर्धमानः शुभकृद्भवेन्नाशुभं करोति तिष्ठन्नपि षष्ठरिष्फयोरिति। अथ सप्त

 अस्यापवादमाह। कस्मिंत्सति। तनौ लग्ने हीने हीनबले सति। बलिष्ठे लग्ने सति। एषां किमपि न बलाइत्यर्थः। तथा च ज्योतिःप्रकाशे। रोगं चो
 रत्न जेद्रात्रौ इत्यादि। तत्रापि यत्र लग्नं चेद्बल्ला ... ध्यंतत्व निःफलमिति। बलं जातकात ज्ञेयं। ल... जातके। अधिपयुतो दृष्टो वा बुधगुरुनि
रीक्षितश्च योराशिः। स भवति बलवान्न यदायुक्तो दृष्टोपि वा शेषैरित्यादि। अथ भवनांशयोः शुद्धिसापवादमाह॥ ॥जन्मर्क्षोदयतो
ऽष्टमोदधिपेन द्वाश्चयेतल्लुवस्तदुं वांगगभं तरूनखलु न चेतत्स्वामिमित्रे कृता। शस्तोंशो धटयुग्मभीरुधनुषां विज्ञास्त भांशो तथाचं
द्रापुण्ययुतोऽष्टतिं वितनुतो देन्यं वहीनौजसः॥ ३३॥ जन्मर्क्षोदयतः जन्मराशिजन्मलग्नाभ्यां सकाशात् ऽष्टतीये अष्टमभवनेयो चतद
धिपो तयोर्मृत्युभवनयोः स्वामिनौ। यचतद्राः मृत्युभवनगतास्युः तेषां अंशी नवांशाः। अंगगो लग्नगतः। चपरं तेषां भराशिः अंगगं लग्न
तं गेभ न तदाखलु निश्चयेन। अंतलग्नमरणकृत्स्यात्। नदाक दचिद्यदि तत्स्वामिमित्रे कृता न स्यात्। तयो जेन्मन्मृत्युभवनयोः स्वामिनौ त
त्स्वामिनौ तयोः। अथवा ... यमर्थः। तयोर्जन्मभनिंधुभयोः। स्वामिनौ तत्स्वामिनौ तर्यौर्यदि मित्रे कृता न स्यात्। मित्रं एकश्च भिंत्रे ते को॥ भि
त्रे कयोर्भावामित्रे कृता सा चेन्न स्यात्। अनेन सर्वेष्वोक्त सार्थकता भवति। यदि तयोर्मित्रता स्यात्। अथवा एकता स्यात्तदा नायं दोषइत्य
र्थः। वसिष्ठः। यस्याष्टलग्ने तदधीश्वरे वा राशौ तदंशे शेषविलग्नगे वा। समृत्युप्राप्नोति न तदा मनोज स्त्रिनेत्रभालानलवन्हिनेति॥
अन्यच्च। जन्मर्क्षजन्मलग्नाभ्यां रंध्रेशावष्टमो चयो। विलग्नसंस्थितानेतांस्तद्राशंशानपि त्यजेदिति। चूडामणौ। लग्नं चालिवषंत्या
ज्यष्टमं सर्वकर्मसु। तत्राप्यथिके शतास्ये यततस्तन्ने व दोषकृत्। न दोषोष्टमलग्नस्य यदि जन्मेशलग्नयो। सुहृदोर्वेत्तदा कार्यं मंगलं मुन
योविदुरिति। चतुर्थद्वादशभवनयोर्दोषो नात्रोक्तः। यतश्चतुर्थद्वाद... शं लग्नं शस्तं यदि गुणान्वितमिति पूर्वाचार्यमतं द्वादश्यस्तास ३१

गुणमेवांगीकृतं। न तु रस्ताद्व्यस्याति। अंगमशुभं चेद्देद्र्गे। नितमिति। सगुणस्यैवांगीकारात्। किंच्यर्थो विस्तरेणेति भावः। अंशशुद्धिमा
ह। शस्तोंशइति। धटयुग्मभीरुधनुषां अंशः शस्तः स्यात्। धटस्तुला। युग्मं मिथुनं। भीरुकन्या। धनुः प्रसिद्धं। एषां अंशो नवांशः शस्तः
प्रशस्तः स्यात्। तत्रापि विशेषमाह। विगतः ज्ञे बुधास्त दोषापवादः। बुधोयेष्वस्तेविज्ञाः। ते च ते अस्ताश्च तेषां भांशो राशिनवांशो। मृ
तिं वितनुतः। अर्थादस्तमितस्यापि बुधस्य भांशो दोषकरो न भवतः। तथा चंद्रा पुण्ययुतो चंद्रेण पापग्रहेण वा युक्तिं मृती मरणं वितनुतः
कुरुतः। वधूवरयोरिति शेषः। हीनौजसो निर्बलस्य भांशो दैन्यं दीनतां वितनुतः॥ ॥विशेषांतरमाह॥ नो वर्गोत्तमवेविनं तिमलवंद
द्याचरक्षे चरं चंद्रे तौलिमृगास्य ... गेन यत्तनुं पंचेष्टखेटेनितं। मेषादिष्व जनक्रतौलिककुलीराद्यानवांशाः क्रमादिष्टघ्नः सूर्यनवांशकादशहता
 स्यापालवाद्यान्तनुः॥ ३४॥ वर्गोत्तमतः वर्गोत्तमेन विना अंतिमलवं चरमं नवांशं दद्यात्। यल्लग्नं स एव नवांशो वर्गोत्तमं। तथा चरक्षें चरलग्ने च
रलवं चरं नवांशं नो दद्यात्। कस्मिंत्सति। चंद्रे तौलिमृगास्यगे तुलाकरगे सति। एतच्चरत्रयोगे नो दद्यादित्यर्थः। अत्र चरचतुष्टयमध्ये चं
द्रे तौलिमृगास्यगे इत्येवोक्तं तन्मेषकर्कट्योर्विवाहनक्षत्राभावात्तथा न तुं लग्नं पंचेष्टखेटोनितं नो दद्यात्। यत्र लग्ने पं चइष्टग्रहानम
वेतितल्लग्नं न देयमित्यर्थः। अथेष्टनवांशाल्लग्नसाधनमाह॥ ॥तत्रनावन्मेषादिषु आद्यांशानाह। मेषादिष्विति मेषादिषु अ नवां
जनक्रतौलिककुलीराद्यानवांशाः क्रमेण ... काः। तद्यथा। मेषे अजाद्यामेषाद्याः। वृषेनक्राद्या मकराद्याः। मिथुने तौलिकाद्यास्तुला
द्याः। कर्कटे कुलिराद्याः कर्कटाद्याः। सिंहे अजाद्या मेषाद्याः। कन्यायां मकराद्याः। तुलायां तुलाद्याः। वृश्चिके कर्काद्याः। पुनः धनु
षि मेषाद्याः। मकरे मकराद्याः। कुंभे तुलाद्याः। मीने कर्कटाद्याः। नवांशा उक्ता इत्यर्थः। इष्टात्सूर्यनवांशकाः गतानवांशाः दश १० हताः दश
गुणिताः। त्याप्ताः। त्रिभि ... र्हृताः लवाद्या भागाद्या तनुः लग्नं स्यात्॥ ॥अत्रोदाहरणं। इष्टलग्नं मेषः। तत्र मेषादिकौंशाः प्रव नवां

तेने। इष्टांशाः कन्या। सआद्यासप्तपूर्वांशकः पंच ५ एतेदशहताः ५० आप्ताः लवादिलब्धं १६।४०। इष्टलग्नसहितं ०।१५।४०। यथावामिथुनल
ग्नेमिथुनांशे लग्नसाधनं। तत्रतुलादिः। ततोमिथुनंयावत्। अंशाः ९ ततः पूर्वै ८ दशहताः ८० आप्ताः लब्धाभागाः २६।४०। गतराशि २
युक्ताजातंलग्नं २।२६।४०। यथाधनुर्लग्नेसिंहांशे। तत्रमेषादितोगतानवांशाः ४ दश १० हताः ४० आप्ताः १३।२० गतराश्यन्विताः
।८।१३।२० जातं। एवंसर्वत्रज्ञेयं॥ ॥अथोद्वाहस्यास्तशुद्धिमाह। लग्नांशौस्वपदृग्युतौनचस्वदौवान्यो न्यपादृश्येक्षितौताभ्यांसप्त
मकौतथैवयुवतेर्नोचेत्तयोर्मृत्युदौ। द्विघ्नेकौनविलग्नकेरविसितज्ञेंद्वार्किजीवाःस्त्रजोहोरेशाःघुपतेःस्वखेक्रिखलजानेष्टाशुभेमध्य
मा॥ ३३॥ लग्नांशौ लग्ननवांशौस्वपदृग्युतौस्वस्वपतिनादृष्टौयुतौवासंतौनचस्वदौवरस्यसुखदौस्यातां। वाइत्यथवा अन्योन्यपा
दृश्येक्षितौ अन्योन्यपतिना आदृश्योईक्षितौवासंतौनचस्वदौस्यातां। इत्युद्वाहशुद्धिमुक्ता अस्तशुद्धिमाह। ताभ्यांसप्तमकौतथैव
ति। ताभ्यांलग्नांशाभ्यांसकाशात्सप्तमकौसप्तमलग्नतदंशौतथैवेति। पूर्ववत्। स्वपदृग्युतौयुवतेः कन्यायाः सुखदावेवस्यातां। इस
थवानौसप्तमलग्नसप्तमांशकौअन्योन्यपादृश्येक्षितौ। युवतेः सुखदौस्यातां नो चेत्। एवंचेन्नस्यात्तदातयोर्मृत्युदौस्यातांक्रमे
ण। अथेष्टकालेहोरासाधनमाह। द्विघ्नेति। अर्कोनविलग्नेद्विघ्नेलव्धेसति। धुपतेसकाशात् होरेशाभवंति। तेषांगणनाक्रममा
ह। तेकेहोरेशाः। रविसितज्ञेंद्वार्किजीवास्त्रजः। रविःप्रसिद्धः। सितःशुक्रः। ज्ञोबुधः। इंदुश्चंद्रः। आर्किःशनिः। जीवोगुरुः। अस्र
जोमंगलः। स्वखेक्रिपापवारेखलजाहोरानेष्टाशुभेमध्यमास्यात्। अथात्र शुभहोराशुभवारे शुभतरा। पापवारेमध्यमास्यात्॥
अत्रोदाहरणं। गुरुवारेइष्टार्कः। १।२५।८ । इष्टलग्नं ४।१०।० । इदं अर्कोनं ।२।१४।५२। इदं द्विघ्नं ५।२९।४४। ऊर्ध्वांकस

सौम्यखगेद्वितीयेसतिसानेतिचतुर्थोभंगः। वाइत्यथवाकेंद्रकोणेषु १।४।७।१०।५।९। केंद्रत्रिकोणेषुभृगुविदीज्येः। भृगुःशुक्रः
विद्बुधः। ईज्योगुरुः। तैःसद्भिःकालश्चेतिसप्तम्यर्थेतृतीया। साकर्तरीनस्यादेवेतिपंचमोभंगः। वाअथवाकर्तरिकारकोक्रूरोदि
निचरोनीचस्थितोयदास्यात्तदातदासानस्यादितिषष्ठोभंगः। हिअवधारणे॥ ॥अथपंचकदोषसापवादमाह। लग्नंमेततिथि
ग्रहे ९ दि ८ इ २ वेद ४ तुं ६ सू १ शेषकेरोगाग्नीनहराःस्युरत्यास्त्वजरुजंराश्यर्कभौमजीवधुच। अग्निंभौमगहद्युबुधुशनिसेवेंदु
धिनंहारमी ज्यारेतिषपरंविवाहसितविसंध्यासुहीनेतनो॥ ३०॥ लग्नंइष्टलग्नंसततिथि। इना चासौतिथिश्चइनतिथिः। गत
तिथिः। तयासहवर्तमानंसततिथि ग्रहेहस्तनवभक्तंकार्यं। इभदकुवेदतुभृच्छेषकैः। इ ९ भा ८ दो २ कौ ४ वेदाश्चत्वारः। ऋतवः
षट्। भूरेक। एतस्मिन्वैःशेषैःक्रमेणरोगाग्नीनहराःस्युः। रोगःप्रसिद्धः। अग्निःप्रसिद्धः। इनोराजा। राजाधिपःपतिः
स्वामीनाथःपरिवृढःप्रभुः। ईश्वरोविभुरीशानोभर्तेंद्रइनईशानेतिधनंजयः। हरश्चौरः। अत्ययोमृत्युः। एतेपंचकाःस्युरित्यर्थः।
एतदुक्तंभवति। लग्नंस्फुटप्रतिपदादिगततिथियुतंकृत्वानवभिर्हृत्वा अष्टशेषेरोगः। द्विशेषेअग्निः। चतुःशेषेराजा। षट्शेषेचौ
रः। एकशेषेमृत्युः। अथैतेकुत्रवर्ज्याइत्याह। रात्र्यर्कभौमजीवधुरुजंत्यज। रात्रौ। अर्को। आदित्यवासरे। भौम ज्यारुजंत्यज। भौमग्रहह
धुबुअग्निंत्यज। भौमादयःप्रसिद्धास्तेषु। धुशनिसेवेंदुबुइनं। धुर्दिवा। शनिःशनिवारःसेवास्वामिसेवनं इंदुः सोमवारः। एषुइ
नंराजानंराजपंचकंत्यज। ईज्यारेविषुहारंत्यज। चोरंत्यज। ईज्योगुरुवारः। आरोभौमवारः। इतिगतिर्यावित्तेतियावत्। आरुचोरं
त्यजेत्। विवाहसितविसंध्यासु अपरंचैरितंमृत्युरित्यर्थः। विवाहःप्रसिद्धः। सितःशुक्रवारः। बुधवारः। संध्यासंध्याकालः। आसुमृत्युंत्यजेत्।
वित्

आद्यंलग्नं।कोणेनवपंचमे।एषामन्यतम गतो ऽन्यतमः शुभग्रहश्चंद्रमसंनिखिलदृष्ट्यापश्येत्तदाजामित्रंनस्यादित्यर्थः॥
एतेपंचभंगाःसर्वैर्मिलिताश्चतुर्दशभंगाःसंपद्यंते।अथदृष्टिसाधनमाह।त्र्यष्टंकोणमब्धायुरेनिगुरुभूपुत्राःक्रमात्पूर्णया
दृष्ट्यान्ये चरणोत्तरंचमकलाःपश्यंतिपूर्णंद्युनं।भंहोरात्रिलवोनवांशकइनांशास्त्रिंशदंशःक्रमाद्वर्गाःसन्शुभजःप
रैस्तुसुहृदैनाब्ध्यूनवर्गोतनुः॥३५॥ त्र्यष्टंतृतीयदशमराशं कोणंनवनवपंचमं।अब्धायुःचतुर्थाष्टमं।एतद्युग्मत्रयंक्रमे
णशनिगुरुभूपुत्राःशनिगुरुभौमाःपूर्णदृष्ट्यापश्यंति।शनिस्त्र्यष्टं।३।१०।पूर्णदृष्ट्यापश्यति।गुरुःकोणं।५।९।पूर्णदृष्ट्याप
श्यति।भूपुत्रः।अब्धायुः।४।८।पूर्णयादृष्ट्यापश्यति।तथाचैतद्युग्मत्रयंअन्येग्रहाश्चरणोत्तरंयथास्यात्तथापश्यंति।तद्यथा।
त्र्यष्टं।३।१०।एकपाददृष्ट्यापश्यंति।कोणं९।५।द्विपाददृष्ट्या।अब्धायुः।४।८।त्रिपाददृष्ट्यापश्यंति।सकलाग्रहाःद्युनंसप्तमं
पूर्णंपश्यंति।अथषड्वर्गसाधनंविवक्षुस्तावत्तन्यामान्याह॥ ॥भंहोरेति।भंगृहं।होराराश्यर्धं।त्रिलवोदृष्काणः।नवांशकः
प्रसिद्धः।इनांशोद्वादशांशः।त्रिंशदंशःप्रसिद्धः।क्रमादेतेवर्गाःप्रोक्ताः।शुभजःशुभग्रहजोवर्गःसन्शुभःप्रोक्तः।परैः
आचार्यैःसुहृदोमित्रस्य वर्गः सन् प्रोक्तः।अब्ध्येववर्गोनकं चतुर्थेवर्गोनं लग्नंनसद्प्रोक्तं।अथैषांसाधनमाह॥ ॥प्रोक्तं
प्राग्गृहमोजभेर्कशशिनोर्होरेसमेब्जार्कयोर्दृक्कूट्प्राकुसुत५धर्मेपो९नवलवःप्रोक्तःस्वतोर्कांशकः।शुक्रज्ञेज्ययमास्रजांशरमुनी
भार्थेषवोयुग्मभेत्रिंशांशाविषमेतएवगदिता व्यस्ताश्चषड्वर्गकः॥३६॥ गृहंयस्यग्रहस्ययद्गृहंतस्यप्रोक्तंभेशामंशतुचमित्या
दि।अथहोरासाधनमाह।ओजभेविषमराशौअर्कशशिनोर्होरेक्रमेणभवतः।प्रथमपंचदशभागेषुअर्कस्यहोरा।अपरपंचदश

भागेषुशशिनश्चंद्रस्यहोरास्यात्।अथसमराशौअब्जार्कयोर्होरेक्रमेणभवतः।प्रथमपंचदशभागेअब्जस्यचंद्रस्यहोरा।अपरपंचदश
भागेषुअर्कस्यहोरास्यात्।अथदृष्काणसाधनमाह।दृक्कूटेति।दृक्काणदृक्कूणः।त्रिविधोदशदशभागात्मकः।तस्यदृ
ईशःप्राकुसुतधर्मपोज्ञेयः।प्राक्लग्नं।सुतःपंचमं।धर्मोनवमं।तान्यातीतिप्राकुसुतधर्मपः।एतदुक्तंभवति।प्रथमदृक्काणस्वामीलग्न
पतिः।द्वितीयदृक्काणस्वामीपंचमपतिः।तृतीयदृक्काणस्वामीनवमपतिःस्यादिति।नवलवःप्रोक्तःप्रागेवशास्त्रोंशइत्यादि।अथ
द्वादशांशसाधनं।स्वतोर्कांशकःस्वस्मादितिस्वतः।लग्न तइत्यर्थः।अर्कांशकोद्वादशांशोज्ञेयः।तद्यथा।राशिभागास्त्रिंशत्।
३०।एतेद्वादशभिर्विभाजिताःलब्धंसार्धंभागद्वयं।२।३०।इ ईद्वादशमानं।तदेवंगणनीयं।सार्धंभागद्वयंलग्नस्यद्वाद
शांशः।तावदेवततसुरस्थस्येति।लग्नस्योत्पन्नभागावसानपर्यंतंगणयेत्।यस्मिन्राशौविश्रामतत्स्वामीद्वादशांशना
थःस्यात्।अथत्रिंशांशसाधनं।शुक्रेति।शुक्रःप्रसिद्धः।ज्ञोबुधः।ईज्योगुरुः।यमःशनिः।असृग्मंगलः।एषांपंचानांक्रमेणात्रशरमु
नीभार्थेषवस्युः।शराःपंच।मुनयःसप्त।इभाअष्टौ।अर्थाःपंच।इषवःपंच।भागाः।शुक्रादीनांस्युः।एतद्युग्मभेसमराशौज्ञेयं।एत
द्विलग्नोत्पन्नभागावसानपर्यंतंगणयेत्।यत्रविश्रांतिःसत्रिंशांशनाथः।विषमराशौतएवगदिताग्रहाःभागाश्चव्यस्ताविषमाज्ञेयाः
।इतिषड्वर्गोनिरूपितः॥ ॥अथइष्टकालसाधनं।विवक्षुस्तावत्सूर्यसाधनमाह।संक्रांत्यंतरहोत्हतात्दिनगणाद्दाप्तंभपूर्वोर
विर्भैषाद्यातभयुग्युतोयनलवैरात्रौसषड्भःसच।तद्रोग्यांशहतस्वभोदयवियत्प्राप्तंतथालग्नतोभुक्तांशाकलितंनयुग्विवर
गेःकालःस्फुटोभोदयैः॥३७॥अंतःअंतरालं।तत्रअहानिदिनानिसंक्रांत्योःअंतरहानि।संक्रांत्यंतरहानितैःहृतःभाजितःए
वंविधोदिनगणःसंक्रांतेःसकाशात्इष्टदिनसमूहः।तस्मात्यत्प्राप्तंलब्धंसभपूर्वोराशिभागकलादिकोरविःस्यात्।किंभूतः

मु०मा०टी० रविः मेषात्सकाशात्यातभयुक्तगतराशियुक्सूर्यभुक्तराशियुग्मित्यर्थः। सतात्कालिकोरविःस्यादित्यर्थः। अत्रोदाहरणं॥ तुलार
२४ श्चिकसंक्रांत्योरंतरदिनानि।२९।५४।० तथा तुलसंक्रांतेः इष्टदिनगणः।५।८।१०अस्माद्दिनगणात्संक्रांत्यंतरहोभिर्लब्धंरा
श्यादि।०।५।७।१।इदंसूर्यभुक्तराशियुतं।६।५।७।अयंतात्कालिकः सूर्यः। सूर्यअयनलवैर्युतःकार्यः। अयनांशाः ग्रंथांतरे
प्रसिद्धाः। खखतान्ध्यूनितेशाकेषष्ट्याप्ताअयनांशकाइति। सअयनयुक्तोरविः रात्रौरात्रीष्टकालसाधनविषयेसषड्भःकार्यः
।षड्राशियुक्तःकार्यः। तद्भोग्यांशनिजोदयाहतिखरामाप्तंकालःस्यात्। तस्यसायनांशस्यरवेः भोग्यांशाः तद्भोग्यांशाश्चनिजो
दयाश्चतेषांआहतिः गुणनं। तस्याःसकाशात्खरामाप्तंत्रिंशताल्लब्धंसस्सूर्यस्यभोग्यकालःस्यात्। निजोदयाः स्वदेशीयराश्युद
याः। तेचलंकोदयादिभ्योऽवगंतव्याः। कथंभूतःकालः। तथैवांगतोभुक्तांशाकलितेनयुक्। तथैवसूर्यस्यभोग्यकालसाधनरी
त्याअंगतः लग्नात्। भुक्तांशकलितेनभुक्तांशैर्भुक्तभागैः आकलितेनयुक्युक्तः। एतदुक्तंभवति। इष्टलग्नंअयनलवयुक्तंकृ
त्वातत्भुक्तांशैर्निजोदयागुणनीयाः त्रिंशता ३० भाज्याः लब्धंलग्नभुक्तकालः तेनकालेनसरविभुक्तकालोयुक्तःकार्यइत्यर्थः।
पुनःकथंभूतः विवरगैः भोदयैः युक्विवरंसूर्यलग्नांतरं। तत्रगतैभोदयैः राश्युदयैः युक्युक्तः। सपलमयः कालःस्फुटःस्यदिष्टकालः
स्यात्। षष्टिभक्तोघटिकात्मकः स्यादित्यवगंतव्यं॥ ॥अथकालसाधनेविशेषमाह। लग्नार्कौयदिचैकभंशविवरात्तीयो
दयाध्याहृत्यखरामाप्तःकालइनात्ततुर्यदिनतुःसूर्योदयात्प्रागसौ। कुंडेभःपरिपूरितेस्तघटिकामध्योदयास्तेन्यसेत्तस्तुलादिनत्र ३४
यवाद्युगानश्युमरासूर्णाग्निपंचस्वथ॥ ३८॥ लग्नार्कौलग्नसूर्यौयदिएकभेस्तदाअंशविवरात् लग्नार्कयोभोगांतरात्तीयो
स्त

मानागताहोराश्चतस्रःवर्तमानापंचमीहोरा। सागणनाक्रमेणघटितेःसकाशाद्गणनीया। जीवास्रजार्किगणनयाबुधहो
रावर्तमाना। अथलग्नेंद्वोः परमंजामित्रग्रहज्ञानार्थमुपयमाह। लग्नेंदुःस्मरगेशुभाशुभखगेस्तश्चाधिमृत्युस्ततोक्रौ
गोनात्कलत्तमौर्विकान्खखयुभेलेब्धंयदाब्धीषवः। सत्विष्टाश्चनिजांशभेस्तमखिलंपश्येदरिश्चायगेसर्वेवारख जला
घकोणगशुभैर्वाज्ञंपपरेयंन्नतत्॥३७॥ लग्नेंदुः स्मरगेसप्तमगेशुभाशुभखगेसतितदाआधिमृत्युस्तः। क्रूरभेसतिआ
धिर्मनस्तापोस्ति अशुभेसतिमृत्युरस्ति। तदाकदायदाततः स्मरगात्ग्रहान् आक्रौर्यगोनात् चंद्रलग्नोनात् चंद्रात्सप्तम
स्थश्चंद्रोनः। लग्नात्सप्तमस्थोलग्नोनइत्यर्थः। तस्मात्कलत्तमौर्विकान्कलकलिकान्खखयभैर्हृतेशात्याल्लब्धंअब्धीषवः५४
चतुःपंचाशत्स्यात्। तदेवआधिमृत्युस्तः। अन्यथानेत्यर्थः। तत्रोदाहरणं। पूर्वकल्पितमिदंलग्नं ४।१०।० तत्सप्तमगो
यंकश्चित्।१०।१०।७। अयंलग्नोनः।६।०।७। अयंकलत्तमौर्विकः।११०।८०।७। अस्मात्खखयभे।२००।लब्धं।५४। अथा
स्यभंगमाह। साज्ञीति। सनुसदृहः स्विष्टाश्चनिजांशभेवर्तमानः अस्तं अस्तभवनं अखिलंपूर्णंयदिपश्येत्तदातज्जामित्रं
नस्यात्। शोभनश्चासौदृष्टश्चस्विष्टःशुभमित्रं। स्विष्टश्च। उच्चंच। निजश्च। स्विष्टाश्चनिजाः। अंशश्चभंच अंशभं। स्विष्टश्चनिजानांअंशभुक्ति
ष्टाश्चनिजांशभं। तस्मिन्स्विष्टोश्चनिजांशभेस्विष्टस्यशुभमित्रस्यअंशेनवांशेभेराशौवावर्तमानः। अथवाउच्चस्यअंशेवा भे३
वर्तमानः। अथवानिजस्यस्वस्यअंशेभेवावर्तमानः। अस्तमखिलंपश्येत्तदातन्नेतिषड्भंगाः। वाइत्यथवाअर्केरवौअरिश्चायगेसति
तन्नेतितयोभंगाः। वाइत्यथवाखजलाद्यकोणगशुभैः। अब्जंचंद्रमसंपूर्णंयथास्यात्तथा। ईक्षेततदातन्नखंदशमं। जलंचतुर्थं।

अत्र कुगुरुयमाह स्त्रयुक्तं। नहि दोषो फलं भात्। अन्यैर्दोषा न त्याज्या इत्यर्थः॥ ६

मु॰मा॰टी॰ स्याद्विप्रमुखे तिसंकट इदं सद्योवनाढ्ये क्वचित॥ ३९॥ गोधूलमिति। गोधूलं लग्नं सायंकाललग्नं। प्रदुर्जातिकेहीन जातो शुभक
३५ रैरोक्तं। न पूर्ववर्णानां। कुरूपं चांगके विवाहे क्रूपं चांगे। अत्र पंचांग शुद्धिर्मुख्या। तत्रकालप्रमाणं विशेषद्वारेनोह। कथं मूलं गो
धूलं। अर्धास्तात्सकाशात प्राकूपरतो र्धनाडिकं अर्धनाडिका यस्मिन्नित्यर्धनाडिकं प्राकूपंचदशपलानि। परतः पंचदशपलानि
। एवमर्धनाडिकमित्यर्थः। अत्र त्याज्यमाह। इहास्मिन् गोधूले लग्ने षष्ठा ६ ष्टगं ८ इंदुं चंद्रमसं जह्यात। पुनः किं किं जह्यादित्या
ह। सोग्रांगं। उग्रग्रह सहितं लग्नं। कुजं भौमं अष्टमं। गुरुयमाहः। गुरुशनि दिनं। पातं महापाते। सिद्धांतगम्यं। अर्कक्रमंस
यसंक्रांतिं जह्यात्। अन्यैर्दोषा न त्याज्या इत्यर्थः। गुरुदिने सूर्यास्तात्प्राकू यामार्धं। परतोयमर्घटः। शनिदिने अस्तमयात्प्रा
कूपरतश्च कुलिको। मार्तंडे रस्थतः स्मृतादिनपतेर्यामार्धनाथ ग्रहा मार्तंडात्म जभौमगउत्तर लवस्तज्ञैः शुभे कर्मणि। त्याज्यो सौ
कुलिक इत्यनेन शनौ अस्तात्प्राक् कुलिको भवति। इति हेतोर्गुरुशनिवारौ निंदितौ। अथ विप्रादीनामपि क्वचित्कार्यविशेषेण गो
रजो प्रशस्तिमाह। विप्रमुखे तिसंकट इदं सद्योवनाढ्ये क्वचिदिति। यौवनाढ्ये अतिसंकटे प्राप्ते सति क्वचिल्लग्न शुध्यभावे इदं
गोधूलं विप्रमुखे विप्रप्रभृतिवर्णत्रये सन्तु शुभं स्यात। अन्यथा नेत्यर्थे सिद्धं। तदुक्तं ज्योतिर्निबंधे। घटीलग्नं यदा नास्ति त
दा गोधूलिकं स्मृतं। शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन। लग्न शुद्धिर्यदा नस्याद्यौवने समुपस्थिते। तदा वै सर्ववर्णा
नां लग्नं गोधूलिकं शुभमिति॥ ॥ अथ द्वाहवेदीलक्षणमाह। वेदी प्राक्प्रवणा चतुर्वरकरा हस्तोछ्रिता त्र्यस्य दोर्जोद्विदं ३५

त्रियुगां २।३।४ गुलैरपंचितासौ क्ता बहिर्वामतः। मस्यां गंधर्दशोंगिनो गदितभे कुर्याद्विहोंदोर्बलं नालोक्यं तु विवाहतस्त्रीनि
वाह्निपाड् नकुर्यादिदं॥ ४०॥ प्राकूप्रवणा पूर्वनिम्ना। चतुर्वरकरा। चतुर्भिर्वरकरैः प्रमिता वरो वैवाह्यः। हस्तोछ्रिता हस्तप्रमाणे
नोन्नता। इयमग्न्यस्य ब्राह्मणस्योक्ता। सा वेदी दोर्जो दोः क्षत्रियादेः क्रमेण द्वि २ त्रि ३ युगां ४ गुलैरपंचिता हीना। अंगुलप्रमाणं
मार्कंडेयपुराणे उक्तं। परमाणुः परं सूक्ष्मं त्रसरेणुर्महीरजः। वालाग्रं चैव लिक्षा च यूका चाथ यवोदरं। क्रमादष्टगुणा नाहुर्य
वानामष्टतांगुलं। षडंगुलं पदं तत्र वितस्तिर्द्विपदं स्मृता। द्विवितस्तीनथा हस्तो मार्कंडेय मुनीरितः। आगमांतरेपि। कतुर्द
क्षिणहस्तस्य मध्यमांगुलिपर्वणः। मध्यमा दैर्ध्यमानेन मात्रांगुलमिनीरितमिति। अन्यत्रोक्तं। यंकं चित्योक्षायामवि
भज्य दशधा पुनः। एवं द्वादशधा भागं लब्धा निक्षिक मंगुलं। देहलब्धांगुलं नाम ज्ञानीयत्तस्य तत्सुनः। महात्मा नांगुल
रितिमात्रांगुलिरिहोदिता। प्रासादादीन्येतेनेव कुर्यान्मानांतरेण वा। वेदिकादीनि शिबिकारथादीनां विधिः पुनरित्यादि
अत्र वरकरग्रहणं तस्य होमकर्तृत्वात्। ननु कन्याया अपि लाजाहुतौ कर्तृत्वमस्ति तत्कर प्रमाणं किं नोक्तं। सत्यमल्पाव
यकाशस्थले कन्याकरप्रमाणमप्यंगीक्रियते। तथोक्तं देवयजन दीपिकायां। स्वल्पावकाशनिलये हीनं मानं समाश्रयेदि
१ ति। अथ नानाविध कर्माणां अंगं कस्मिन्नक्षत्रे कर्तव्यमित्याह। यस्यांगमिति। यस्य कर्मणः यदंगं अदः इदं अंगिनो मुख्य
स्य गदितभे उक्तनक्षत्रे कुर्यात्। इहास्मिन्नंगभूते कर्मणि इंदोर्बलं नालोक्यं न विचारणीयं। तत्र विवाहे विशेषमाह॥

विवाहतः विवाहदिनात्प्राक् ऋत्विग्वा क्लिन्नतीयषष्ठनवमे क्लि इदं अंगं विवाहांगं न कुर्यात्। विवाहांगानि यथा। दलनं कंडनं चैव व्यंज
नं मोदकानि च। प्रवौ परंडपो वेदी कुंकुमं वर्णकं तथेति॥ ॥अथ क्रमप्राप्तं वधूप्रवेशमाह। लग्नादष्टिदिनांतरः समसुनीषांक
युग्मूर्ध्वं त्वयुग्घस्रे मास्यपिहायने शरमिताद्वर्षात्परं स्वेच्छया। वैफामार्गसितेज्यगुः श्रुतियुगोद्वाह[illegible]र्क्षे चित्राश्विनी। [illegible]ज्यर्क्षे श्रवान
वमं दिने निशि वधूसंवेशमं गेस्थिरे॥४३॥ लग्नाद्विवाहतः सकाशादष्टिदिनांतरः षोडशदिनमध्ये समसुनीषांकेषुघस्रेषु।
समाः समसंख्याकाः मुनिः सप्तमः इषुः पंचमः अंको नवमः। एषु घस्रेषु दिवसेषु। अथोर्ध्वं षोडशदिनादूर्ध्वं अयुग्घस्रे विषम
दिने मास्यपि विषमे हायने वर्षे विषमे वधूसंप्रवेशं प्रवेशं जुगुरूचुः। एतदुक्तं भवति। षोडशदिनमध्ये समादिषु दिनेषु क
र्तव्यः। षोडशदिनातिक्रमे मासपर्यंतं विषमदिवसे वधूप्रवेशः कार्यः। प्रथममासातिक्रमे वर्षपर्यंतं विषममासि कर्त
व्यस्तदा विषमदिननियमोऽस्ति। ना। एवं प्रथमे वर्षे अतिक्रांते पंचमवर्षपर्यंतं विषमवर्षे कर्तव्यः। तदा विषममासानिय
मो नास्ति। पंचमाद्वर्षात्परं विषमवर्षनियमोऽपि नास्तीति। अथ विलंबितं वधूप्रवेशं कस्मिन्मासि पक्षे कर्तव्यमाह। वैफामा
र्गसिते। वै वैशाखः। फा फाल्गुनः। मार्गो मार्गशीर्षः। एषां सितः शुक्लपक्षस्तस्मिन्। कैः श्रुतियुगोद्वाहर्क्षे चित्राश्विनी ज्यर्क्षैः। श्रुतियु
गं श्रवणधनिष्ठा। उद्वाहर्क्षाणि विवाहनक्षत्राणि पूर्वोक्तानि। चित्राश्विनी प्रसिद्धे। ईज्यर्क्षं पुष्यः। तैः। अनवमं दिने जीर्णगृहे।
नवीनवधूदिरिकन्यां नवोढां न प्रवेशयेदिति निषेधादनवमं दिन इत्युक्तं। उक्तंच। वधूप्रवेशनं कार्यं पंचमे सप्तमे दिने। नवमे च शुभे वा
रे शुभलग्ने शशिनो बलेति। नारदः। आरभ्योद्वाहदिवसात्षष्ठे वाप्यष्टमे दिने। वधूप्रवेशः संपत्त्यै दशमेथ समे दिनेति। संग्रहे। ३६

स्यघातः। निजराशुदयगुणितानर्यासरामाप्तिः त्रिंशताललब्धिः सकलः स्यात्। तत्रापि विशेषमाह। इनात्तनुरिति। इनात्सूर्यात्तनु
र्लग्नं यावत्तनुः लब्धिः स्यात्तदासौ इष्टकालः सूर्योदयात्प्राक् पश्चेत्स्यात्। सोपि षष्ठ्या भक्तो घटिकात्मकः स्यात् इत्यवगंतव्यं॥
अथज्ञातेकालं यंत्रैर्विना साधितुं न शक्यते। अतो यंत्राणां मध्ये मुख्यस्य घटीयंत्रस्य स्थापनकालमाह। कुंडइति। अंभःपूरितेउ
दकपूर्णे कुंडे पात्रे घटिकामज्जनक्षमे। कुंडग्रहणं उत्तानपात्रव्युदासार्थं। तस्मात् कुंडरूपे पात्रे उदकपूरिते शुभघटिकां क्षिपेत्
शुभस्थाने न्यसेत् निक्षिपेत्। कस्मिन्सति। अर्धोदयास्तजाते सति। सूर्यस्य अर्धोदये अर्धास्तजाते सति। किं कृत्वा तु लाप्रा
र्थयित्वा। प्रार्थना ग्रंथांतरे उक्ता। यंत्राणां मुख्यरूपासि त्व[illegible]त्वणानिर्मिते घटि। दंपत्योः शुभकालाप्ति हेतवे भव शोभने इ
ति। अथ प्रतिष्ठितायां ना घटिकायां तद्भ्रमनफलमाह। सा प्रतिष्ठिता घटी अग्नित्रयवायुगा न शुभदा स्यात्। अग्नित्रयं आ
ग्नेयादि प्रदक्षिणक्रमेण दिशात्रयं वायुर्वायव्यादिशा इति दिक्चतुष्टयं प्रतिगता न शुभदा। अर्थादन्यदिग्गता तत्रैव स्थि
ता वा शुभदा स्यात्। तथा चोक्तं ग्रंथांतरे। संस्थुतैवं घटी तोये यां दिशि प्रतिगच्छति। पूर्वादि फलं कुर्यात् स्थिता मध्ये फलप्रदा। सौभाग्यं निर्ध
नं नार्या अपमृत्युरुजान्विता। भर्तृप्र[illegible]याचन्मान्या वित्तस्थानान्विता इति। एवं गमनमुक्त्वा पूर्णताफलमाह। पूर्णाग्निपंचसु
थेति। अग्निपंचसु आग्नेयादिपंचसु दिक्षु पूर्णा घटी न शुभदा। अर्थादन्यदिक्षु पूर्णा शुभा स्यात्। उक्तंच। उत्तरे शान्त्यपूर्वा
सु पूर्णा घटी शुभप्रदा। दिक्षु शेषासु कन्याया मग्ना वैधव्यदायिनी। अथ गोधूलिलग्नमाह॥ ॥ गोधूलं परजाति
के शुभकरं पंचांगशुद्ध्यो रवेरर्धास्तात्परपूर्वतो घटिकं नत्रेंदुमृत्यारिगं। सोग्न्यंगं कुजमष्टमं गुरुमथ प्राहुः पातमर्के क्रमंज

अर्कभादि स्वनुवर्तते। धृती अष्टादशं। ईशएकादशं। कृतश्चतुर्थं। तत्वं पंचविंशं। एतन्मितनक्षत्रे अर्कभादित
मितेइत्यर्थः। तत्र चतुष्टये साभिजितगणिते ऽत्ययोमृत्युः स्यात्। अर्थादन्येषु शुभं प्रोक्तमिति॥ ॥ अथनानाविधशास्त्रार्थो
नाह। मुक्तोयेवकृतामुपोषितनरो दद्याच्च सावित्रिकामारब्धोत्सवकेयदाजनिमृती स्यातांस्वगोत्रे क्वचित्। सांगंतं विदधीत वा
जमितरेस्मादारभेत्पूर्वतोयज्ञोद्वाहनचौलमौंजिकृमहः सुस्वर्ग २१ दिकू १० त्रि ३ त्रिद्वषु॥४४॥ उपोषितनरः मुक्त्वायत्कृतभो
जनार्थेवकृतां दद्यात्। चपरं उपोषितनरः भुक्त्वा येवचनेसावित्रिकां गायत्रीं दद्यात् तदुक्तं ज्योतिर्निबंधे। भुक्त्वासमुद्वहेत्कन्यांसावि
त्रीग्रहणंतथा। उपोषितःसुतां दद्यात् दत्तायवरायचेति। आरब्धोत्सवकेचयद्राजनिमृती स्यातांस्वगोत्रे क्वचित्। सांगंतं विदधीत वाज
मितरेद्दितिवाजं अन्नं। अपरे अमृगात्रिणः। विदधी तन्। वाजमन्नं गुरुद्धाजोवाजंपीवृषमुच्यतेइत्यनेकार्थध्वनिमंजर्यां। शेषंस्फुगमं।
उक्तंच। विवाहोत्सवयज्ञादावारब्धेसूतकं यदि। सांगं तत्कर्मकुर्वीत अन्नदानादिकं परोऽपि। अस्माद्दारभेत् पूर्वतोयज्ञोद्वाहनचौल
मौंजिकर्म अहः सुस्वर्गदिकूत्रित्रिषु। अस्मान्निश्चितदिनात् पूर्वतः प्रथमतः यज्ञोद्वाहे चौलमौंजिकं इत्येतत्कर्म चतुष्टयं क्रमात्॥ न
सर्गदिकूत्रित्रि अहःसु आरभेत। यज्ञेषु एकविंशतिदिनेषु। उद्वहनं विवाहं दिक्षु दशसंख्यदिनेषु। चौलं त्रिषु दिषु। मौंजिकं त्रिषु दिनेष्विति।
उक्तंच। एकविंशत्यहर्यज्ञे विवाहे दशवासराः। त्र्यहे चूडोपनयने नांदीश्राद्धं विधीयते। आरंभलक्षणं। आरंभोवरणंयज्ञेसंकल्पोव्रतस
त्रयोः। नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रियाइति॥ ॥ नोश्राद्धं क्षयदर्शनेत्यकमधीतिं शीतलाम्भप्लुतिं सीमासिं
ध्वतिपातमेक कुलजाः सत्यातिपातं क्वचित्। उत्थापावधि मंडपस्य सशरा ५ गा ७ क्लीविषष्ठेसमेस्युद्वाहोस्योनष्टहो ३७

द्वाहोसहजयोस्तुल्या क्रियाब्दांततः॥४५॥ क्षयदर्शनेत्यकं श्राद्धं। अधीतिंपठनं। शीतलाम्भः शीतलोदकेषु आप्लुतिं स्ना
नं। सीमासिंध्वतिपातं। सीमाप्रसिद्धा। सिंधुर्महानदी। सिंधुर्नदी समुद्रयोरित्यभिधानात् तयोरतिपातः उल्लंघनं। सत्या
तिपातं अपसव्यं इत्येतत्। एककुल जागोत्रिणः क्वचिन्नोकुर्युः। किमवधि। मंडपस्यउत्थापावधि। यावन्मंडपोत्थापनं स्यात्ता
वन्न कुर्युरित्यर्थः। उक्तंच। दर्शश्राद्धं क्षयश्राद्धं शीताद्भिःस्नानमेवच। प्राचीनावीतिकरणं नदीसीमातिपातनं। अन्यच्च। नित्य
श्राद्धमधीतिं च स्नानं च शिशिरे जले। सपिंडा नैव कुर्वीरन् मंडपोत्थापनावधीति। अथ मंडपोत्थापः कदाकार्य इत्याह। सशरागा स
प्तेति। शराः पंच। अगाः सप्त। तस्मिन्मिताङ्के दिनयोः पंचसप्तमे। विषष्ठेसमे। षष्ठरहिते समे क्लिसमदिने उद्वास्यः। उक्तंच।
मंडपोत्थापनं कार्यं समे वदिवसे बुधैः। षष्ठं च विषमं नेष्टं मुक्त्वा पंचैसप्तमाविति। अब्दांतर्वर्षमध्ये ग्रहोद्वाहो न कर्तव्यो। सहज म
योः। एकमातृजयोः। पुरुषयोः। पुरुषस्त्रियोः। स्त्रियोर्वातुल्या क्रियासमानं कर्म न कुर्यादित्यर्थः। भिन्नामातृजयोर्न दोष इत्य
र्थात्सिद्धं। तथा चोक्तं। एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः। नसमानक्रियां कु र्यान्मातृभेदे विधीयते ति। समानक्रियेतिद्व
यो श्रोते द्वयोर्व्रतबंधो। द्वयोर्विवाहो च। सहजयोरित्यनेन एवएकमातृजत्वं संभवति। उक्तंच। नेकस्मिन्वत्सरे कार्यौ व्रतोद्वाहौ
कथंचनेति॥ ॥ उद्वाहव्रतचूडके ब्ददलनतवडं १।६।३। तिलैस्तर्पणं श्राद्धं पिंडयुतं महालयथापित्र्यं विनाना चरेत्। पूर्वं
सप्तपरीविधेरधिगते दोषेवरेवाम्रलेदेयान्यत्रविवाहितापिचबलाद्याविद्धयोनिर्नचेत्॥४६॥ उद्वालेति। उद्वाहव्रतचूडकेत्र
मुहूर्तगणपतौ। मंडपोद्वासने षष्ठं हित्वा लग्नात्समेहनि। पंचमे सप्तमे वापि सुमर्से शुभवासरे॥१॥

स

मेण अब्द र लंतत खंडं। अब्दश्चदल चततखंडं च। उद्वाहे विवाहे कृते सति अब्दं वर्षपर्यंतं। व्रतेव्रतबंधे कृते सति दलं अब्दार्धं षण्मासपर्यंतं।
चूडके चूडाकरणे कृते सति ततखंडं तस्य दलस्यापि खंडं अर्धं त्रिमासपर्यंतमित्यर्थः। तिलैस्तर्पणं। पिंडयुतं श्राद्धं ना चरेत। किं विना।
महालयगयापित्र्यं विना। महालयं भाद्रपदापरपक्षः। गया प्रसिद्धा। पित्र्यं मातापित्रोः क्षयदिनं तत्रयत् श्राद्धं क्रियते तन्महालयगयापित्र्यं ... नहि
ना। उक्तं च। विवाहव्रतचूडासु ... वर्षम ... र्धं तदर्धकं। अतिलं तर्पणं कुर्यात् श्राद्धं कुर्यादपिंडकं। महालये गया श्राद्धे मातापित्रोः क्षयेहनि॥
कृतोद्वाहोपि कुर्वीत पिंडदानं यथाविधि इति। पूर्वमिति। सप्तपदीविधेः पूर्वं प्रथमतः अंधमूकादिके अधिगते ज्ञाते सति वाङ्दत्ता वा वरे मृते सति कन्या
अन्यत्र देया। अपि च। या कन्या बलाद्विवाहिता सापि तर्हि अन्यत्र देया। नहि कथं चेद्यदि विद्धयोनिर्न स्यात। विद्धायोनिर्यस्याः सा न तथा। पुरुषभुक्ते
त्यर्थः। उक्तं च ... याज्ञवल्क्येन। महादोषे सद्विज्ञाते पूर्वं सप्तपदीविधेः। मरणाद्दोषसमुत्पन्ने देयान्यस्मै न दोषभाक्। बलाद्दुद्वाहिता कन्या दातव्या
न्यवराय चेति। महादोषाः कारिकानिबंधे उक्ताः। अंधो मूकः क्रियाहीनश्चापस्मारी नपुंसकः। दूरस्थः पतितः कुष्ठी दीर्घरोगी वरो न सत्। पुरु
षनपुंसकलक्षणं। यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलं। पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु षंढकः। अपरीक्ष्य दाने दोषः। अपरीक्ष्य वरं कन्यां
निर्गुणाय यच्छति। कुलं तस्यैव तच्छोकसंतप्तो विनिकृंततीति॥ ॥अथ स्त्रीरहितानां विधिमाह। अस्त्रीकैः कुशहेमरौप्यरचिता ना स्त्री तु
विप्रादिभिर्भार्या वानिखिलैः स्ववर्णरचिता धर्माय धार्या बुधैः। मंदारार्के ... दिनं बुपाश्विफणिभं भद्रातिथिश्चेद्वेहाद्रूलसा विषकन्यका यत्र तनुगौ
सौम्यौ रिपुक्षेत्रगो॥८०॥ अस्त्रीकैः स्त्रीरहितैः विप्रादिभिर्विप्रक्षत्रियविट्शूद्रैः क्रमेण कुशहेमरौप्यरचिता स्त्री त्वं भार्या धर्माय धार्या अयमर्थः
। विप्रेण कुशरचिता भार्या धर्माय धार्या। क्षत्रियेण हेमरचिता। वैश्येन रौप्यरचिता। शूद्रेण ताम्री ना स्वरचिना भार्या धार्या। कथं भूतैः विप्रादिभिः
बुधैः स्वस्वधर्मनिरतैः। वा इत्यथवा निखिलैः सर्वैः विप्रादिभिः स्ववर्णरचिता भार्या धार्या। यतस्तया विना गृहस्थधर्मसाधनं स्यात्। तथा चोक्तं।

विवाहमारभ्य वधूप्रवेशो युग्मे तथा षोडशवासरांतात्। तदूर्ध्वमध्येयुजि पंचमांतादतः परस्तान्नियमो न चास्ति। तथा च नारदः। समे वर्षे स
मे मासि यदि नारी गृहं विशेत्। आयुष्यं हरते भर्तुः सा नारी मरणं व्रजेत्। भास्करव्यवहारे। रात्रौ विवाहे भेशस्तः सन्मुहूर्ते स्थिरोदये॥
वधूप्रवेशो नैवात्र प्रतिशुक्रादि कुर्यं विदुः। कृष्णे विवाहके शुक्लेर्दर्शे पत्योश्च गृहमप्रदे। वधूप्रवेशनं कार्यं पंचमेद्यकलं यदि। मार्गफाल्गुनवै
शाखेषु शुक्रपक्षे शुभे दिने। मूलपुष्यमृदुस्वाती स्थिराश्विश्रुतिवासवे। पित्र्यमे च करे नारी प्रविष्टा पुत्रिणी भवेदिति। इदानीं प्रथमाषा
ढादौ भर्त्रादिगृहे वासं निषेधमाह। उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात्तज्जननीं क्षये निज तनुं ज्येष्ठे पतिज्येष्ठकं।
पौषे च श्वशुरं सहपतिं च मलिने चैत्रे स्वपित्रालये। तिष्ठंती पितरं निहंति न भयं तेषामभावे भवेत॥८२॥ उद्वाहाद्विवाहादुपरि प्रथमशुचौ
आषाढे कन्यका यदि भर्तुर्गृहे वसेत्तदा तज्जननीं तस्य भर्तुर्जननीं हन्यादिति सुगमं॥ अथ पुनर्भूविवाहमाह। मृद्वांत्येषु पुनर्भू
वापरिणयः प्रोक्तो विवाहोक्तभैर्नालोक्यं तिथिमासवेधमृगुजेज्यास्तादि तत्राकिमात। त्रिघ्यर्क्षेषु मृतिर्धनं मृतिर्मृतीपुत्राम्मृतिर्दु
र्भगं श्रीरोन्नसमर्थोधृतीशाकृततत्त्व १८।१११४।२५। र्क्षेत्वयुः साभिजित॥८३॥ मृद्वः प्रसिद्धाः। अंत्याद्रजकादयः। तेषु पुनर्भव
परिणयः प्रोक्तः। केः विवाहोक्तभैः स्पष्टं। तत्र पुनर्भवापरिणये तिथिमासवेधगुरुशुक्रास्तादि न आलोक्यं। स्पष्टं। तथा चोक्तं ज्योति
र्निबंधे। नशुक्रास्तादिकं चिंत्यं शुद्धिर्वेधादिकं तथा। पुनर्भवा संवरणे न मासतिथिशोधनमिति॥ अथ ब्रह्मपट नक्षत्र शुद्धिमा
ह॥ अर्कभात् सूर्यनक्षत्रात् त्रिघ्यर्क्षेषु त्रिषु त्रिषु नक्षत्रेषु क्रमेण। मृतिर्मरणं प्रथम त्रिके। द्वितीये त्रिके धनं। तृतीये मृतिः। चतु
र्थे मृतिः। पंचमे पुत्राः। षष्ठे त्रिके मृतिः। सप्तमे दुर्भगं। अष्टमे लक्ष्मीः। नवमे त्रिके ओन्नसंप्राक्तं॥ अथ रुद्रपद शुद्धिमाह॥ ।

मु॰मा॰टी॰ मूलव्यालभवोद्देशेपोविवाहेयउदाहृतः।समौंजीबंधनादूर्ध्वंपुंसांनैवेतिकेचनेति।पैत्र्याद्येपिमघाया आद्यचरणेपिमूलवत्फलंस्या
३९ दितिकेचिद्वदंति।तथाचोक्तंनारदेन।पैत्र्यगंडोद्भवाकन्यास्वफलप्रदीतिकेचनेति।अथऋतुत्रयमध्येकिंकिंनकर्तव्यमित्याह।
नोद्वाहमिति।सहजातयोःएकोदरस मुत्पन्नयोःपुत्रयोःकन्ययोःकन्यापुत्रयोर्वाउद्वाहौविवाहौऋतुषुत्रयष्वृतेऋतवस्त्र्यृ
तवः।तेषुनकार्यौ।षण्मासाभ्यंतरेनकार्यावित्यर्थः।उक्तंचनारदेन।विवाहस्त्वेकजन्यानांषण्मासाभ्यंतरेयदि।असंशयंत्रि
भिर्वर्षैस्तत्रैकाविधवाभवेदिति।नोद्वाहाद्व्रतमिति।उद्वाहात्ऋतुषुव्रतंमौंजीनकार्यं।तथाचोक्तंनारदेन।पुत्रोद्वाहात्परं
पुत्रीविवाहेनऋतु[illegible]त्रये।नतयोर्व्रतमुद्वाहान्मंगलेनान्य[illegible]मंगलमिति।नोपुंसि[illegible]द्वाहात्स्त्र्युद्वहनमिति।पुमुद्वाहात्ऋतुषुस्त्र्यु मु
द्वहनंकन्याविवाहःनोकार्यं।पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रयेइति।नमंडनविधेर्मुंडइति।मंडनविधेर्विवाहात्ऋतुषुमुं
डंचौलंव्रतंवानकार्यं।अत्रकात्यायनः।कुलेऋतुत्रयादर्वाक्मंडनांनतुमुंडनमिति।त्रिशक्त्येषुनेति।एषुऋतुषुत्रिशक्तीनका
र्या।त्रयाणांशुभानांसमाहारस्त्रिशक्ती।मंगलत्रयमितियावत्।नकुर्यान्मंगलत्रमिति।कात्यायनवचनात्॥ ॥नोज्येष्ठा
ल्लघुकालकृत्यमऋतेकात्यायनोमुंडनंचौलंप्राहनमेखलेतुभयतःकार्याविवाहादियं।भेदेब्दस्यचसंकटेवितनुयात्पूर्वोदितंमंग
लंवेदाहांतरितेदिनव्यवहितेनयानगेनापिवा॥४०॥नोज्येष्ठाल्लघ्विति।ज्येष्ठान्मंगलाद्विवाहादेःऋतुषु लघुमंगलंनोकार्यं।य ३९
द्गृहिःशालायामुक्तंतज्ज्येष्ठमंगलं।तत्कार्यमित्यर्थः।कस्माद्धेतोः।कालकृत्यतऋते।कालेनकृत्यंकालकृत्यं।गर्भाधानपुंसवना
दि।तस्माद्धेतोर्विनेत्यर्थः।तथाचकात्यायनः।मातृयज्ञक्रियापूर्वंज्येष्ठंकृतातुमंगलं।लघुवागुरुवाकार्यंकार्यंनेष्यमिकंतुयदिति।

कात्यायनोमुनिःइतिप्राह।इतीतिकिं।व्रतंमुंडनंन।चौलमेवमुंडनं।मौंजीविवाहात्उभयतःकार्येति।तथाचतद्वाक्यं।मुंडनंचौलमित्यु
क्तंव्रतंनोद्वाहेतुमंगलं।चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परं।मौंजीचोभयतःकार्यायतोमौंजीनमुंडनमिति॥ ॥अथसंकटेप्रवृत्तिमाह।
भेदेब्दस्येति।संकटेदेशकालभयादौअब्दस्यसंवत्सरस्यभेदेपूर्वोदितं मंगलंवितनुयात्।निस्तारयेत्कुर्यादित्यर्थः।तथाचोक्तंसंहि
तासारावल्यां।फाल्गुनेचैत्रमासेपुत्रेनोद्वाहोपनायने।भेदाद्ब्दस्यकुर्वीतनर्तुत्रयविलंबनमिति।अथवावेदाहांतरितेचतुर्दिनांतरि
तेकालेमंगलंवितनुयात्।तथाचस्मृतिसारावल्यां।पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं।पुत्र्यंतरस्यकुर्वीतनोद्वाहमितिस्त्र्यइ
ति।अथवादिनांतरितकेएकदिनांतरितेकालेमंगलंकुर्वीत।तथाचोक्तं।एकोदरप्रसूतानामेकस्मिन्वासरेनरः।विवाहंनैवकुर्वीत
मंडनोपरिमुंडनमिति।अथवाएकाहेपिनद्यानगेनपर्वतेनअंतरितेदेशेमंगलंवितनुयात्।ज्योतिर्निबंधे।एकोदरयोर्वरयोरेकदि
नोद्वाहतोभवेन्नाशः।नद्यंतरएकदिनेकेप्याहुःसंकटेनतुशुभमिति।शार्ङ्गधरेपि।नद्यंतरेपिशकभेदंप्रथुशैलरोधेइति॥ ॥
एकाहेपिजनाश्रयांतरइतीदंतारतम्याद्बुधैर्योज्यं।नोयमयोर्निषिद्धमन्ययोरेकत्रकार्यंजगुः।नैकस्मैदुहितृद्वयंसहजयोर्नैको
द्वेकन्येकेदद्यात्द्वुहनंमिथोनतनुयात्कुर्यादसंपद्यतः॥४१॥एकाहेपीति।अथवाएकाहेपिजनाश्रयांतरेमंडपांतरेमंगलंवि
तनुयात्।मंडपोस्त्रीजनाश्रयइत्यमरः।उक्तंज्योतिर्विवरणे।नप्रतिषिद्धंलग्नंसंप्राप्तेसंकटेमहति।एकोदरसंभवयोरेकाहेभि
न्नमंडपेकालइति।अथैषांप्रस्ता[illegible]णांनिर्णयमाह।इदंतारतम्यादिति।इहेदमिति।इहास्मिन्विवाहादिविषयेइदंभेदेब्दस्ये
त्या[illegible]फलंबुधैस्तारतम्याद्योज्यं।संकटानुरूपंयोज्यमित्यर्थः।अथय[illegible]मलयोर्विशेषमाह।नोयमयोरिति।यमयो

यमलयोः इदंनोभिषिद्धं। अनयोर्यमलयोर्मंगलं एकवत्सरे एकवासरे एकमंडपे कार्यमिति मुनयो जगुः। उक्तंच। एकस्मिन्वत्सरे
चैववासरे मंडपे तथा। कर्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोरिति। अथ प्रत्युद्वाहनिषेधमाह। नैकस्मै इति। एकस्मै वराय
द दुहितृद्वयं न दद्यात्। एकोदरसंभवयोर्भ्रात्रोः एकोद्वहेत्कन्ये केन दद्यात्। तथा मिथः परस्परं उद्वहनं न कुर्यात्। अत्रापि संकटे प्रत्यु
त्रिमाह।। कुर्यादिति।। अदः नैकस्मै दद्यात् युग्मकं कर्तव्यं असंपदि अन्यवधूवरालाभे निकुर्यात्।। तथा च नारदः। प्रत्युद्वाहो नै स
व कार्यो नैकस्मै दुहितृद्वयं।। न चैकजन्ययोः पुंसोरेकजन्ये तु कन्यके दद्यादि।। अथ प्रतिकूलनिर्णयमाह।। नोद्वाहं
मतिनिश्चये पिजगदुः पित्रोः सपित्रोः स्त्रियाः सूनोः भ्रातुः रनूढितस्वसुरसत्क्रांतौ पितृव्यस्य च।। अन्येष्वान्वयजात्य
येपिजनकाब्दस्त्रीसुतान्यास्य। येब्दार्धार्धार्धदलांतरे ११६।३।४५।१३। विदधतेहेरंबशांत्याकीर्तित ॥५७॥ नोद्वाहमिति। निश्च
येपिसति। बुधा उद्वाहं न जगदुः। कस्यां सत्यां। पित्रोः असत्क्रांतौ सत्यां। माता च पिता च पितरौ तयोः असूनां प्राणानां। उत्क्रांतिः॥
उत्क्रमणं तस्यां सत्यामित्यर्थः। कथंभूतयोः पित्रोः सपित्रोः पितरौ च पितरौ च पितरः मातुः पितरौ। पितुः पितरौ। इत्यर्थः। तेऽस
ह वर्तमानौ सपितरौ तयोः सपित्रोः। पुनः कस्यां सत्यां। स्त्रियाः असत्क्रांतौ सत्यां। इदं द्वितीयविवाहादौ ज्ञेयं। एवं सूनोः पुत्रस्य।
भ्रातुः सहजस्य। अनूढितस्वसुः। अपरिणितभगिन्याः। पितृव्यस्य पितृभ्रातुः। असत्क्रांतौ सत्यां। एतदुक्तं भवति। पित्रादीनामु
क्तानां मध्ये अन्यतमस्मरणे सति विवाहं न कुर्यादित्यर्थः। तथा च वृद्धशौनकः। वरवध्वोः पिता माता पितृव्यश्च सहोदरः। एतेषां ४०
प्रतिकूलं चेन्महाविघ्नप्रदं भवेत्। अन्यच्च। पिता माता महश्चैव माता चैव पितामही। पितृव्यस्त्री सुतो भ्राता भगिनी वाविवाहिता

अपत्नीकैस्तु धर्मार्थं कौरी हेमी च राजती। ताम्री विप्रादिभिर्भार्या धार्या हेमी तथाखिले रिति।। अथ विषकन्यालक्षणमाह। मंदेति। मंदार्क
दिने। शन्यर्कभौमानामन्यतमस्य वारे। अंबुपाग्निफणिभं। शततारकाकृत्तिकाश्लेषाणामन्यतमं नक्षत्रं। [illegible]द्रातिथिर्द्वितीया[illegible]मी
द्वादशी। आसामन्यतमा चेत्स्यात्तदा योगः स्यात्। इहोद्भवा अत्र योगे कन्या जाता सा विषकन्यका। अथ योगांतरमाह। रिपुक्षेत्रगौ सौम्यौ
तनुगौ लग्नगतौ चेत्स्यातां। एकः क्रूरः रिपुक्षेत्रगस्तनुगश्चेत्स्यात्। इमौ द्वौ योगौ इहोद्भवापि विषकन्यका स्यात्।। ।।अथ योगांतरमा
ह। एकः क्रूर इहोद्भवाप्यथ तनौ सौरी रविः पुत्रगो धर्मस्थो धरणीसुतोऽथ परो योगोपि तज्जा विषं। मूलाद्यत्रिपदोद्भवश्वशुरमाद्यं त्रयं त्यर ता
न्तस्त्रियं ज्येष्ठांत्यपात्तिपूर्वजं द्विपचतुर्थे देवरं हंति च।।५८।। तनौ लग्ने सौरिः शनिः स्यात्। रविः सूर्यः पुत्रगः पंचगः स्यात्। धरणीसुतो भौमो धर्मस्थो न
वमस्थोऽपरा स्यात्। तदा अयं योगः स्यात्। तज्जापि कन्या विषं स्यात्। विषमिति। यथा विषस्वीकारान्मृत्युर्भवति तथा विषकन्यांगीकारान्मृत्युर्भवती
ति फलं सूचितं। तस्मात्परित्याज्येति भावः। अथ मूलजादीनां फलमाह। मूलेति। मूलस्याद्यत्रिपदोद्भवा प्रथमचरणत्रये जाता कन्या श्वशुरं हंति
मारयति। आश्लेषांत्यत्रये अहि आश्लेषा तस्या अंत्यत्रयं अंत्यचरणत्रयं तत्र जाता तत्स्त्रियं श्वश्रूं हंतीत्यर्थः। ज्येष्ठांत्ये ज्येष्ठायाश्चतुर्थचरणे जाता पति
पूर्वजं ज्येष्ठं हंति। द्विपचतुर्थे। द्वौ पौ पतीयस्य इति द्विपो विशाखा। तस्य चतुर्थचरणे जाता देवरं हंति। अथ तदन्यचरणजा शुभा। एवं [illegible] ना
।। ।।एवं नायुक्त नरभाव इह नो दोषो नुरेतत्फलं मौंज्यूर्ध्वं न वदंति केचिदपि पैत्र्याद्येफलं मूलवत्। नोद्वाहो सहजातयोः ऋतु पुनोद्वाह
९ द्वतं नो पुमुद्वाहात्समुद्वहनं न मंगलविधेर्मुंडं त्रिश्चयैश्रुन।।५९।। एकं तु केन नक्षत्रचरणजातो ना नरः युवतेः स्त्रियाः श्वशुरादीन् हंति
तथा च गर्गः। मूलजा श्वशुरं हंति सार्पजा च तदंगनां ज्येष्ठजा तु पतिं ज्येष्ठं देवरं तु द्विदैवजेति। तथा च कश्यपपद्धले। मूलांत्यपादजो श्वे
शीतथाश्लेषाद्यपादजो। द्विपांत्यपादजो देतथा ज्येष्ठांत्यपादजो। इत्यस्यापवादः। अभावे इह नो दोष इति। अभावे तेषां श्वशुरा
दीनां अभावे सति इह मूलादिजोद्वहने नो दोषः। केचिदाचार्याः तुः नरस्य मौंज्यूर्ध्वं मौंजीबंधनानंतरं एतत्फलं न वदंति। उक्तं च नारदेन।

यांपित्रोर्मरणेपिज्ञेयं। प्रतिकूलेपिप्रतिकूलाभावमाह॥ भयइत्यादि। भयेदुर्भिक्षराजभये। अतिसमये अतिकाले। पित्रोर्मातापित्रोः मृतेः संशयेसतिअ
न्येषांमातापितृभ्यामन्येषांमृतानांप्रातिकूल्यंनास्ति। तथाचोक्तंज्योतिःसागरे। दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये। प्रौढायामपिकन्यायांना
न्यकूलंप्रतीक्षते। विशेषांतरमाह॥ आमयीचिरस्काराद्दूतानामपिप्रातिकूल्यंनास्ति। आमयीरोगादीर्घरोगीयावत्। चिरस्कोगरुरादिभूद
सीनः। आराद्दूतोदूरगतःदेशांतरगतइतियावत्। आराद्दूरसमीपयोरित्यमरः। एषामपिमृतानांप्रातिकूल्यंनास्ति। तथाचोक्तंस्मृत्यंतरे।
दीर्घरोगाभिभूतस्यदूरदेशस्थितस्यच॥ उदासवर्तिनश्चैवप्रातिकूल्यंनविद्यतइति। अथान्यानपिशास्त्रार्थानाह॥ आतुर्येइति।
तुर्यश्चतुर्थः पुरुषः मूलपुरुषाच्चतुर्थइत्य...र्थः। तंमर्यादीकृत्यस्यैमृतेनरस्यक्रियायां अनभिभवेअभावेसतिकाचित्कारणा
नराक्रियायां मकृतायांनांदीमुखंनाचरेत्। एतत्स्वगोत्रविषयं। तथाचमेधातिथिः। प्रेतकर्माण्यनिर्हृत्यचरेन्नाभ्युदयक्रियां। आचतुर्थंत
तःपुंसीपंचमे...तुशुभंभवेदिति। नेकुर्यादिति। ज्वरितस्यमंगलंनेकुर्यात्। तथाचगर्गः। ज्वरस्योत्पादनंयस्यदृष्टंभनंतस्यन
कारयेत्। दोषानिर्गमनात्सर्वां स्त्रोधर्मंसमाचरेति। अनीति। अनित्यामूर्द्धकस्यचित्कुलजस्यशरीरे अतिदारुणज्वरेसति
निश्चयंनोकुर्यात्। प्रतिकूलभीत्या। रोगःपाप्माज्वरोव्याधिर्विकारोदुःखमामयइति। आदिवाग्भटेज्वरपर्यायनामानि। तथाच
गर्गः। केचिद्गुर्वर्हस्थस्यकस्यचिद्दारुणोज्वरः। तावन्मंगलकार्यंचनकार्यंनिश्चयंबुधैरिति॥ ॥अथमहत्संकटेकर्तव्य
सूतकेकर्माहितामाह॥ ॥चेत्स्यात्सूतकमुक्तपूर्वसमयेनारब्धकार्येबुधःकूष्मांडी। घृतहोममेतोहि जननाशौचेकपितासयेत। सिंहेज
नरकंभंहितंहरिलवोर्ध्वंगोतमीदक्षिणजाह्नव्युत्तरतःकाचसितमजेर्केतोत्रभीत्यादिशुभं॥ ५४॥ उक्तपूर्वसमयेपरिणोद्वा ४३

स्व

रुनचौलमौंजीक मित्यत्रोक्तिपूर्वकालेअनारब्धकार्येसतिकर्मणिअनारब्धेसतिसंकटेचप्राप्तेसतिकूष्मांडीघृतहोमतःकूष्मांडीभिः। यद्देवादेवहेळ
नामित्यादिऋग्भिर्ऋग्भिः घृतहोमःकूष्मांडीघृतहोमःतेनजननाशौचेदशाहातःजन्मदशाहमध्येकर्मआचरेत्। कूष्मांडीघृतहोमंशास्त्रोक्तं
सदक्षिणंकृत्वाकर्मकर्तव्यमित्यर्थः। तदुक्तंस्मृत्यंतरे। संकटेसमनुप्राप्तेसूतकेसमुपागते। कूष्मांडीभिर्घृतंहुत्वागांचदत्वापयस्विनी। चूडोपन
यनोद्वाहप्रतिष्ठादिकमाचरेत्। इतिस्मृत्यंतरे। अनारब्धविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं। गांदद्यात्संचगव्यासीततःशुद्ध्यतिसूतकीति॥
अथसिंहगुरौसतिमंगलनिषेधमाह॥ सिंहेज्यइति। सिंहेसिंहराशौईज्यः। सिंहेज्यः। तस्मिन्सति। शुभंनेत्यव्यतिरिक्तंनहितंस्यात्। इदंतुस्मैव
प्रपंचितं। तथाचकालनिर्णये। शांतिकंपौष्टिकंयात्राप्रतिष्ठोद्वाहपूर्वकं। नकुर्यात्सर्वमांगल्यं। सिंहस्थेचबृहस्पतौ। इतितथाच
मांडव्यः। इष्टापूर्तंचचौलादिसंस्कारान्वास्तुकर्मच। अन्यानिशुभकर्माणिनकुर्यात्सिंहगेगुरौइति। अथसंकटेप्रवृत्तिमाह। हरिल
वोर्ध्वमिति। कचित्संकटेदेशकालभयादौसिंहेज्येपिहरिलवादूर्ध्वंसिंहांशादूर्ध्वंगोतम्याःदक्षिणतःजाह्नव्याःभागिरथ्याः उत्तरतः
शुभंकर्माहितंस्यात्। तथाचज्योतिर्निबंधे। सिंहेगुरौसिंहनवांशकोर्ध्वंगोदावरीदक्षिणकूलजातैः। उद्वाहकालात्ययदोषभीतैः
कार्योविवाहस्त्वयनंनाब्रवीति। तथाचगर्गः। भागीरथ्युत्तरेतीरेगोदावर्याश्चदक्षिणे। व्रतोद्वाहादिकर्माणिसिंहसंस्थेनदुष्यतीति।
अर्थात्गोदावर्याउत्तरेभागीरथ्याःदक्षिणएवंद्वयोर्गोदाजाह्नव्योर्मध्येसंकटेपिशुभंनआचरेदितिसिद्धं। तथाचवसिष्ठः। गोदाव
र्युत्तरेतीरेभागीरथ्याश्चदक्षिणे। विवाहादिनकुर्वीतसिंहसंस्थेचवाक्पतौ। इति। अत्राप्यतिसंकटेप्रवृत्तिमाह। इनेति। अत्रभीत्या
दिशुरजोभयादिशुसत्सुअंतःगोदाजाह्नव्योर्मध्येहरिलवादूर्ध्वंसिंहेज्येसति अजेमेषेइनेसूर्येसतिशुभमाचरेत्। अजेइनेइत्ये
तद्विवाहविषयंअत्रभीत्यादिक्षिप्तेनेनपरेनलक्ष्यंते। तथाचशौनकः। मेषस्थेदिवसकरेसिंहस्थेचत्रपाणिसचिवेच। यस्याःपरिण

मनमसोमाध्वीकरसंपदोपेतेति।व्रतबंधस्तुमीनगेसूर्येसतिचैत्रेकर्तव्यइतिग्रंथकृताप्रागेवोक्तं।अनिमिषरविमध्येकार्यमिति।तथाच
मौंजीपट्टले।जन्ममादुष्टगेसिंहेनीचेवायत्रगुरौरवौ।मौंजीबंधःशुभाप्तोकोचैत्रेमीनगतेरवाविति।अथवाहनेत्र्यइसेतत्सर्वंसर्वशुभ
साधारणं।तथाचशौनकः।सिंहस्थेदेवगुरौमेषस्थेपिदिवाकरेसहस्रांशुः।मंगलकार्यंकुर्यादितिनारदपराशरौवदतेइति।अस्त्र
भीत्यादिखिलत्वादिशब्देनवृद्धपितृमरणशंकायांकर्त्रंतराभावादितिसंकटंज्ञेयं।अथनामराशिजन्मराश्योर्निर्णयमाह॥ ।
गृह देशग्रामेज्वरव्यवहृतिद्यूतेषुदानेमनोसेवाकाकिणिवर्गसंगरपुनर्भूमेलनेनामभं।जन्मसंपरतोवधूपुरुषयोर्जन्मर्क्षमेकस्य
चेवज्ञातंश्रुतिविमितोविलोक्यचतयोर्नामर्क्षयोर्मेलकः॥५५॥देशःप्रसिद्धः।ग्रामःप्रसिद्धः।गृहंप्रसिद्धं।ज्वरःप्रसिद्धः।इत्यादि
षुनामभंनामराशिःप्रधानंस्यात्।एतदुक्तंभवति।देशग्रामगृहेषुप्रवेशाद्यर्थंज्वरेचंद्राद्यवलोकनार्थं।व्यवहृतिर्व्यवहारः।
द्यूतंप्रसिद्धं।दानंतुलापुरुषादि।एतेषुचंद्रबलाद्यर्थं।मनोमंत्रेमेलनार्थंचराजादिसेवातत्रमेलाद्यर्थंकाकिण्यांकाकिण्यवलो
कनार्थं।वर्गेशुध्यर्थं।संगरेसंग्रामेचंद्रबलाद्यर्थंपुनर्भूमेलकेपुनर्भूमेलनायनामराशिरवलोकनीयइत्यर्थः।परतःएभ्योऽन्यत्र
विवाहयात्रादौजन्मर्क्षंजन्मराशिःप्रधानंस्यात्।तथाचज्योतिर्निबंधे।देशेग्रामेगृहेयुद्धेसेवायांव्यवहारके।नामराशेःप्रधान
त्वंजन्मराशिंनचिंतयेत्।इति।अन्यच्च।काकिण्यांवर्गशुद्धौचदानेद्यूतेज्वरेऽस्य्पे।मंत्रेपुनर्भूवरणेनामराशेःप्रधानतेति।विवा
हेसर्वमांगल्येयात्रादौग्रहगोचरे।जन्मराशेःप्रधानत्वंनामराशिंनचिंतयेदिति।अथवधूवरयोर्मध्येएकस्यजन्मर्क्षंज्ञातंएक
स्यनज्ञातंतदाश्रुतिविमेलनादिकंकथमवलोकनीयमित्याह।वधूपुरुषयोरिति।वधूपुरुषयोर्मध्येचेद्यदिएकस्यजन्मर्क्षंज्ञातं ५२

।एभिरेवविपन्नेश्वप्रतिकूलंबुधैःस्मृतं।अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेत्।इति।अथान्येषांमतमाह।अन्येइति।
अन्येबुधाःसान्वयजास्तथेपिस्वकुलजातमर्त्यनाशेपिउद्वाहंनविदधुः।तथाचभृगुः।वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः
।अथसंकटेप्रवृत्तिमाह।जनकांबास्त्रीति।जनकश्चअंबाचस्त्रीचअन्यश्च।अन्यःकुलजःप्रतिकूलाधिकारी।एषांअसयोनश्यः
व मरणमितियावत्।कस्मिन्नति।अब्दार्धार्धार्धदलांतरेहेरंबशांत्यागणेशशांत्याकश्चित्संकटेविदधेतबुधइत्यध्याहारः।एतदुक्तं
भवति।वरस्यवध्वावापितृनाशेअब्दांतरेवर्षांतरे।मातृनाशेअर्धांतरेषण्मासांतरे।स्त्रीनाशेऽर्धार्धांतरेत्रिमासांतरे।एवद्वितीया
दिविवाहेज्ञेयं।तथाचपुत्रनाशेअर्धांतरेसार्धमासांतरे।अन्यनाशेपितृमातृस्त्रीत्यादिभ्योन्यस्यकुलज स्यनाशेदलांतरेसा
र्धार्धमासस्यार्धांतरेत्रयोविंशतिदिनांतरेविदधतइत्यर्थः।अन्यमध्येभ्रातुर्विशेषमाह।भ्रातुश्चात्मजवद्भूयेतिसमयेपित्रोर्मृ
तेःसंशयेनान्येषांप्रतिकूलमामयिविरकारात्कृतानामपि।आतुर्योन्मत्तनक्रियान्भिवेन्नांदीमुखंनाचरे भोकुर्यात्क्वचिन्निस्यमंग
लमतिव्याप्युद्भवेन्निश्चयं॥५३॥भ्रातुश्चात्मजवदिति।भ्रातुर्नाशेपुत्रवत्पुत्रनाशवत्तज्ज्ञेयं।सार्धमासांतरेकर्तव्यमित्यर्थः।त
थाचस्मृतिसारावल्यां।पितुरब्दमिहाशौचंतदर्धंमातुरेवच।मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः।अन्येषांतुसपिंडानामा
शौचंमाससंमतं।तदानुशांतिकंकृत्वाततोलग्नंविधीयतेति।स्मृत्यंतरेप्युक्तं।संकटेसमनुप्राप्तेयाज्ञवल्क्येननयोगिना।शांति
रुक्तागणेशस्यकृत्वातांशुभमाचरेत्।अकृत्वाशांतिकंयस्तुनिषेधेसतिदारुणे।नकरोतिशुभंगर्वात्विघ्नस्तस्यपदेपदइति
।ज्योतिःप्रकाशे।प्रतिकूलेपिकर्तव्योविवाहोमासमंतरात्।शांतिंविधायगौर लावाग्दानादिवरेपुनरिस्येतसोढायांकन्या

मु०मा०टी० विनिपरस्परमिति। अन्यच्च। नमोक्ता उञ्भणावर्णानामादौसंतितेनहि। चेद्रुवंतिवराज्ञेयागजडास्तेयथाक्रममिति। यस्यबहूनिनामानित
४३ स्यकस्मान्नाम्नोभिज्ञेयमित्याकांक्षायामाह। यदभिधाबह्वोस्यनामांतिममिति। अस्यअभिधानानिबह्वोभवंति। अस्यांतिमंप
श्चाद्भवंनामग्राह्यं। तथाचस्वरशास्त्रे। बहूनियस्यनामानिनरस्यस्युःकथंचन। तस्यपश्चाद्भवंनामग्राह्यंस्वरविशारदैरिति।
अथजन्मनक्षत्रंयेषुयेषुशस्तंतान्याह। आर्याइति। नृदुद्वहनेपुरुषविवाहेजनुर्भंजन्मनक्षत्रंअमलंनिर्दूषणंजगुः। तथाप
ट्टस्यबंधेपट्टबंधे। गेहंगृहंकरणंप्रवेशनं। तथाग्रामेग्रामवरप्रवेशनं। नृपाभिषेकोराजाभिषेकः। कृषिःप्रसिद्धा। मौंजीप्रसिद्धा। अन्ना
शनंनवान्नप्राशनं। भूषणंभूषणधारणं। एषांसमाहारस्तस्मिन्जन्मर्क्षंशुभदंजगुः। तथाचज्योतिःप्रकाशे। जन्मर्क्षेकृषिनृपाभिषेच
नेभूषणेनगरगेहकर्मणि। आधिपत्यभुजिमौंजिबंधनेपुंविवाहउदितंशुभंबुधैरिति। राजमार्तंडे। वसंतसमयेरघात्कंगभीष्ममपिवा
मेरवलोजन्ममासेपिजन्मभेचतिथावपीति। नारदः। पट्टबंधनचौलान्नप्राशनेचोपनायने। शुभदंजन्मनक्षत्रमशुभंत्वन्यकर्मणीति॥ ॥
इतिस्वकृतमुहूर्तमार्तंडटीकायांमार्तंडवल्लभाख्यांविवाहप्रकरणं॥ ॥अथाग्न्याधानंवृत्तेनैकेनाह। अग्न्याधानमवादिदारसमये
दायाद्यकालेपरेद्वीशाग्निध्रुवशाक्रपूषभैर्मृगेज्यैर्व्यब्जलग्नांशयोः। जीवेंदर्ककुजैःस्मृतर्हि। ५।३।६।१०।११। नव२१केंद्रस्थे१।४।
७।१०।रनस्तंगतैःस्वोच्चेष्टर्क्षगतैःपरैरुपचये। ३।६।१०।११। विनाद्यु २।१। शुक्रोबुधैः॥१॥ अग्नेराधानंबहुभिर्बुधैर्दारकालेऽवादि।
कथितंचतुर्थीकर्मानंतरंदारकालः। परैराचार्यैर्दायाद्यकालेधनविभागकालेऽवादि। तथाचवृत्तशते। अग्न्याधानंदारकालेविधे
यंकैश्चित्प्रोक्तंतच्चदायाद्यकालेति। तथाचकात्यायनगृह्ये। आवसथ्याधानंदारकालेदायाद्यकालएकेषामिति। एतद्भाष्यकारैर्व
व्यवस्थापितं। अभ्रातृमतोदारकाले। भ्रातृमतोदायाद्यकालेप्रोक्तमिति। स्मृतिकुलतन्त्रस्याग्निनाविनाबहुदोषोदृश्यते। तथाहि। ४३

कृतदारोनैवतिष्ठेत्क्षणमप्यग्निनाविना। तिष्ठन्संचेद्द्विजोव्रात्यस्तथाचपतितोभवेत्। पितृपाकोपजीवीस्याद्भ्रातृपाकोपजीवकः। ज्ञानाध्य
यननिष्ठोवानदुष्टोवाग्निनाविना। योनग्निरुपसेवेतदारान्कामादृतावपि। पारदारीसविज्ञेयःस्वस्त्रीस्वीकरणादपि। यथास्नानंयथासंध्या
वेदस्याध्ययनंयथा। तथैवोपासनंदृष्टंतस्मिन्नित्यंप्रयोगवदित्यादि। तस्मात्सूत्रकारैःकात्यायनादिभिर्दारकालएवबाहुल्येनोक्तं। अ
भाष्य नेकैरेवव्यवस्थितं। अभ्रातृमतोदारकालेभ्रातृमतोदायाद्यकालएव॥ अग्न्याधाननक्षत्राण्याह। कैः। द्वीशाग्निध्रुवशाक्रपुष्यमृ
गपौष्णैः। द्वीशंविशाखा। अग्निःकृत्तिका। ध्रुवाणित्र्युत्तरारोहिण्यः। शाक्रंज्येष्ठा। पुष्यमृगौप्रसिद्धौ। पौष्णंरेवती। तैःकथं। व्यब्जल
तो ग्नांशयोःविगतः। अब्जायाभ्यांव्यब्जौ। व्यब्जौचतौलग्नांशौच। तथानयोः। अब्जंजलचरराशयः। मकरस्यपश्चिमार्द्धंकुंभोमीनः
कर्कटश्चैतेजलचराराशयः। चंद्रोपिजलजः। एतैरहितयोर्लग्ननवांशयोरित्यर्थः। तथाचवृत्तशते। कर्किनक्रेघटमीनविलग्ने
वारकेनतुगतेथतदीये। लग्नगेकुमुदिनीदयितेवानाशमेतिजनितोपिहुताशइति। कैः। जीवेंदर्ककुजैःस्मृतर्हिनचकेंद्रस्थैः। जीवोगुरुः। इंदुश्चं
द्रः। अर्कःसूर्यः। कुजोभौमः। तैःस्मृतःपंचमत्रिहृत्युपचयभवनानित्रिषडेकादशदशभवनानि। गुरुर्नवमं। केंद्राणिप्रथमचतुर्थसप्तमद
शमानि। १।४।७।१०।३।६।१०।११। एतत्स्थानगतैः कथंभूतैः अनस्तंगतैःसूर्यकिरणालुप्तैः पुनःकथंभूतैः स्वोच्चेष्टर्क्षगतैः। स्वस्यउच्चानिचदृष्टान्य
एषांचक्षाणिराशयस्तद्गतैः। स्वराश्युच्चराशिमित्रराशिगतैरित्यर्थः। परैरुक्तेभ्योन्येर्ग्रहैरुपचयेत्रिषडेकादशदशमे। कस्यांस्थ्यांवित्ताद्युस्थोसस्तो
वित्तंद्वितीयं। आद्यंलग्नं। तयोःशुभैःक्रूररहितं। तस्यांसत्यां। शेषंपूर्ववत्। प्रायश्चंद्रमितुक्तमवलोक्यं। तथाचरत्नशते। केंद्रस्थोपचयत्रिको
र णभगताःसूर्यौजीवेंदवःशेषाश्चोपचयास्थितायदितदाग्न्याधानमुक्तंशुभं। चंद्रेनैवधनव्ययेत्रियतेयुवतीभौमेपुमान्नष्टमेरोगैश्चग्रहयुतेरु
जावसहितोग्न्याधानकर्ताभवेत्। नोकुर्यात्सुतभुक्परिग्रहमिहस्वापुत्रजीवेंदुभिर्नीचस्थैर्विजितैरिपोर्भवनगैरस्तंगतैर्वाद्विजइति॥
तथाचसंहितांतरे। अग्न्याधानंकुर्वीतकर्किनक्रत्रयेविधौ। लग्नेगेधनगेपापेतथालग्नेग्रहान्वितइति॥ ॥इतिमुहूर्तमार्तंडटीकायामग्न्या
धानप्रकरणं॥ ॥अथग्रहप्रकरणंविवक्षुस्तावत्ग्रामविचारमाह॥ॐ॥नामर्क्षाद्द्युकृतांकदिग्भवगतो २।५।९।१०।११। ग्रामःशुभोन्यो

 न्यथातत्कोणेसनुवांश्च भंनिवसतांदोषाः परेषामलं। कन्याकर्किधनुस्तुलाऽक्रियघटाकोष्वांजोयाम्यतोमध्येन्येनवर्गःस्यथेंद्रकु
 भोवर्गाः स्युरोजास्विनः॥१॥ नामर्क्षात्नामराशेः सकाशात्द्विरक्षतां ५ करे दिक्१० भव ११ गतोग्रामः शुभः स्यात्। अन्यउक्तवि
परीतोग्रामः। अन्यथास्यादशुभः स्यादित्यर्थः। तदुक्तं ज्योतिःसागरे। एकमेसप्तमेग्रामेवैरं हानिस्त्रिषष्ठगे। तुर्ये ४ष्टद्वाद
शेरोगः शेषस्थानेशुभं भवेदिति। एवंग्रामशुभाशुभत्वमभिधायइदानींग्रामद्विड्युमाह। तत्कोणेति। तत्कोणेतस्यग्रामस्यको
णे अंत्यभुवांरजकचर्मकारादीनांनिवसतांवसतिं कुर्वतांशुभंस्यात्। रजकश्चर्मकृत्श्चैवनटोबुरुड एवच। कैवर्तमेद भिल्लाश्च
सप्तेते अंत्यजाः स्मृताः। इत्यादीनांग्रामकोणे शुभंस्यादित्यर्थः। तत्कोणेनिवसतां परेषांवर्णानां अलं अत्यर्थंदोषाःस्युः अशुभा
निस्युरित्यर्थः। तथाच ज्योतिर्निबंधे। भवनपुरग्रामाणांयेकोणास्तेषुनिवसतांदोषाः। श्वपचादयोंत्यजाद्यास्तेषुवरस्थिमायांति
ति। एवंजातीनांशुभाशुभमुक्तिरिक्षिभागमुक्तराशिपरत्वेनदिक्षुनिवसतिमाह। कन्येति। यमाशादितः दक्षिणायाः सकाशात्क्रमेणाष्टासुदि शा
सु कन्याकर्किधनुरादयोराशयोनवसंति। अन्येउर्वरिता। मध्येनवसंति। एतदुक्तंभवति। अभीष्टग्रामंनवभागंपरिकल्प्यमध्यभा
गाद्दक्षिणभागेकन्यानवसतिकन्याराशिनादक्षिणभागेगृहंनकार्यमित्यर्थः। तथैवनैर्ऋतेकर्कः। पश्चिमेधनुः। वायव्येतुला। उत्तरेअजोम
षः। ईशान्यांघटःकुंभः। पूर्वेको———वृश्चिकः। आग्नेय्यांअंत्योमीनोनवसति। अन्येरुषमिथुनसिंहमकरामध्येमध्यभागेनवसंति।
म एवंराशिपरत्वेनदिग्द्वियममुक्त्वेदानींवर्गपरत्वेनदिग्द्वियमाह॥ ॥अथेति॥ इंद्रककुभः सकाशात्अष्टसुदिक्षु अप्रमुखा अष्टौवर्गाः
अकचटतपयशाइत्येतेप्रसिद्धाः। ओजस्विनोबलवंतः स्युरित्युत्तरश्लोकेनान्वयः॥ ॥अष्टावप्रमुखाः स्वपंचमपराद्विषः स्ववर्गेन्य
युक्तप्टः काकिणिकागजेभैथइभायस्याधिकाः सोधर्दः। श्वेतारक्तपीतकृष्णवस्कधात्वादुः कटुस्तिक्तकाषायाघ्रतशोणितान्न
मदिरागंधाः शुभाविप्रतः॥२॥ एतदुक्तंभवति। अआइईउऊइत्यादिकः षोडशाक्षरोवर्गःपूर्वस्यांबली। कादिकःपंचाक्षरः आग्नेय्यां। ५५

कृ

तदाइतः ज्ञाताजन्मर्क्षादेकस्यशुद्धिंगुर्वादिशुद्धिंविलोक्यतयोर्वधूवरयोः नामर्क्षयोः मेलकोवर्णवश्यादिकः पूर्वोक्तोविलोक्यः। अर्थात्
द्वयोरप्यज्ञानेनामर्क्षादिवसर्वंविलोक्यं। तथाच शार्ङ्गधरः। विवाहघटनंचैवलग्नजंग्रहजंबलं। नामभाचिंतयेत्सर्वंजन्मनज्ञायते
यदीति। अथमेलकार्थंनाम्नोनक्षत्रज्ञानमाह॥ ॥भंनामादिमवर्णतोवकहडाद्युज्यादिवर्णाद्बवौतुल्यावत्रशसौखषौयदभि
धावह्यौस्यनामांतिमं। आर्यान्नुद्वहनेजनुर्भममलंपट्टस्यबंधेजगुर्गेहग्रामनृपाभिषेकरुषिमौंज्यन्नाशने भूषणे॥ ५५॥
नामादिवर्णोनामाद्याक्षरं। तस्मात्। अवकहडंशतपदचक्रं। यस्माचकात्। चुचेचोलापदेषाद्युइत्यादयः। श्लोकानिबद्धास्त
स्माचक्राद्भंनक्षत्रंज्ञेयं। तद्यथा। चूडामणीतिनाम्नः। आद्यक्षराचकारात्चुचेचोलाइत्यादिनाअश्विनीनक्षत्रंतत्रप्रथमचरणइति
इ ज्ञेयमित्यर्थः। तथादीपिकायां। जन्मनज्ञायतेयेषांतेषांनाम्नोगवेक्षते। चक्रेवकहडेभांशोतन्नाडीकेश्चिदग्निभादिति। तन्नाडीस
त्यार्थः। तदानाम्नोनक्षत्रंगवेष्यंततराअग्निभात्कृत्तिकानक्षत्रान्नाडीविलोक्येतिकेचिदुक्तं। केचिदितितन्मतमग्राह्यं। तस्मादश्विन्यादि
निकंव्यस्तमितिन्यायेननाड्यवलोकनंबहुसंमतमितिभावः। अथनामादौयोगाक्षरेसतिकिंकर्तव्यमित्यपेक्षायामाह॥ युज्यादिवर्णादिति। यु
जियुक्तेऽक्षरेसंयुक्ताक्षरेप्रद्युम्नेनाम्निप्रथमवर्णः प्रस्तत्राप्याद्यःपकारस्तस्माद्भंज्ञेयमित्यर्थः। प्रियवचादत्तादौपिकारएवग्राह्यः। द्रुपदइत्या
दौदुकारएवग्राह्यइत्यादि। तथाचस्वरशास्त्रे। संयोगाक्षरजेनाम्निज्ञेयंतत्रादिमाक्षरमिति। अथावकहडचक्रेनामा——यदासंभवतितिकिं
कर्तव्यमित्यपेक्षायामाह। बवौतुल्यावत्रशसौखषौइति। अत्रावकहडचक्रेबवौइमिइमौवर्णौतुल्यौसदृशौज्ञेयौ। बकारस्थानेवकारः। बका
रस्थानेबकारः। इत्यर्थः। तत्राचशसौवर्णौतुल्यौ। तथाचखषौ। अत्रोदाहरणं। शिवदत्तिनाम्निसतिअवकहडचक्रेशकारस्याभावा
त्। सकारंगीकाराद्भंज्ञेयमितिभावः। एवमेवशसौतथाचखषौपरस्परसवर्णौज्ञातव्यौभंज्ञेयं। तथाचस्वरशास्त्रे। खषौशसौबवौचैवद्वया

मु०मा०टी० वक्रयोश्चैवग्रहतत्स्वानोरपि। परस्परंमित्रयोश्चएनाडीप्रशस्यतेति। अथांशसाधनार्थंगृहाणितन्नामाक्षरसंख्यांचाह। एकादीनिगृहमुखा
४९ तत्क्रमात्दिक्षुचतसृषुदिक्षुएकादिद्विगुणोत्तरा अंकाःस्युः। एतदुक्तंभवति। द्वारदिशिएकः। तस्मात्द्वितीयदिशिद्वौ। तृतीय[illegible]
दिशिचत्वारः। चतुर्थदिशिअष्टौ। एवंभवंतीत्यर्थः। शालाशांकयुतिः। शालादिकुअंकयुतिः। कुयुकएकयुतासतीध्रुवमुखानिध्रुवादिकानिशास्त्रो
दितानिगृहाणिस्फुटंसंतिसंभवंति। तानियथा। ध्रुवंधान्यंजयंनंदंखरंकांतंमनोरमं। सुमुखंदुर्मुखंक्रूरंक्षयपक्षंधनदंक्षयं। आक्रंदंविपुलंचैववि
जयंचेतिषोडशं॥ ॥नामाक्षरसंख्यामाह॥ ॥आषष्ठाद्दशमित्रयोदशमिमेद्धूम्र[illegible]र्णाःपरेऽक्षराः षष्ठांत्यंचतुरक्षरंखलुगृहंस्युःषोडशे सप्ताख्यं
नंगृहाः। गेहक्ष्माफलयुक्व्ययोगृहभवे[illegible]र्नामाक्षरैःसंयुतस्तष्टोवह्निभिरंशकानसफभदंपस्त्यंद्वितीयांशकं॥१२॥ षष्ठंमयादिक्ष्वेत्याष
ष्ठंतस्मात्प्रथमद्वितीयतृतीयचतुर्थपंचमषष्ठानि। दशमं। त्रयोदशं। इमेअष्टगृहाः। धूम्रवर्णाः। न्येक्षराः। षष्ठांत्यं। सप्तमंगृहंचतुरक्षरं।
यस्मिन् चत्वारि अक्षराणितत्तथा। अन्येगृहाख्याक्षराः एवंषोडशगृहाःस्युः। गृहाःपुंसिचभम्न्येवनिकाय्यानिलयालयाद्दसमरः। अथांशकसाधनमाह
गेहक्ष्मेति। गेहक्ष्माफलयुग्व्ययः। गृहक्षेत्रफलयुक्तः। पूर्वानीतोव्ययः। गृहभवैर्नामाक्षरैः संयुक्तःवह्निभिस्त्रिभिस्तष्टःशेषितःसन्अंशकाः
स्युः। इंद्रोयमोराजेतितन्नामानिग्रंथांतरेउक्तानि। तत्रद्वितीयांशकंपस्त्यंगृहंनसफभदं। अथोत्तमतृतीयांशकंशफभदमित्यर्थः। निशांतपस्त्यं
सदनेभवनागारमंदिरमित्यमरः॥ अथगुणविचारमाह॥ ॥ यावद्भूरिगुणंहृदिस्फुरतितत्तावद्विचार्यंकरैश्चैतैर्नोननुयाद्विहांगुलमुखंक्षि
प्त्वाविहायाथवा। श्रीगोपीपतिमिंगल्हालुगिमुखैरायासविच्छित्तयेस्वेष्टायर्क्षफलंनिबध्यमिहतत्ज्ञात्वास्थलंसाधयेत॥१३॥ यावत्स्यं
तं करैःहस्तैः कृत्वाभूरिगुणंबहुगुणंगृहंहृदिअंतःकरणेस्फुरतितत्तावद्विचार्यं। वेदादितैः केवलैःकरैः बहुगुणंनस्फुरति। तदाअंगुलमुखं
अंगुलादिकंकरेषुक्षिप्त्वाथवाविहायतनुयात्। अथोपायांतरंक्षगमनमाह। श्रीगोपीपतीति। गोपीपतिर्गोपिराजः। मिंगमिंगनाथदैवज्ञः।
ल्हालुगिर्ल्हालुगिदैवज्ञः। एतन्मुखैःज्योतिर्विद्भिःआयासविच्छित्तयेयत्। स्वेष्टायर्क्षफलंनिबद्धं। तदिहास्मिन्गृहकरणवि[illegible]षयेज्ञात्वास्थलं ४९

स्थामीष्टस्थलंसाधयेत॥ ॥तथाचगोपिराजः॥ विष्णुंव्येकायगोभूः१९हतिभयुजिफलंगोपिराजोभ२७शेषात्सायंचेष्टाष्टिदृक्२१६घ्नाहयुतमहि८हता
ष्टकृ८प्रकृत्याख्य२३विश्वे१३बाणा५सिद्धा२४ष्टि१६नागो८द्रु२७तिधृति१९गिरिशा११त्र्या३कृती२२द्र१४र्तु६नला२५त्यष्ट्यं१७क९क्ष्मा१
नखै२०ना१२वर्ण४विकृति२३दिना१५ष्टा७धृती२६धृत्य१८ष्टाशा१०द्युनि३॥ अस्यार्थः। गोपिराजः। विष्णुंविष्णुनामानंशिष्यंप्रत्याहेत्सन्वयः॥

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७
२	२१	१३	५	२४	१६	८	२७	१९	११	३	२२	१४	६	२५	१७	९	१	२०	१२	४	२३	१५	७	२६	१८	१०

किमाह॥ हेविष्णोव्येकायगोभूः१९हतिभयुजिभ२७शेषात्अहि८हतात्ष्टकृत्सरुत्सादयःफलंस्यात्॥ विगतःएकोयस्मात्सव्येकः॥ सचासौआ
यश्चव्येकायः॥ व्येकायश्चगोभूश्चअनयोर्हतिःगुणनं। व्येकाय[illegible]गोभूहतिश्चभं च॥ व्येकायगोभूहतिभंतयोर्युक्योगः। तस्मिन्[illegible]भशेषा
त्सप्तविंशतितष्टशेषात्एकादिषुसप्तविंशतिपर्यंतेषुअहिहताःअष्टहताःष्टकृत्सरुत्सादयः॥ फलंक्षेत्रफलंस्यादित्यर्थः॥ कथंभूतंफलं॥ सायं।
आयेनसहवर्तमानंसायं॥ इष्टायसहितमित्यर्थः॥ एतत्स्वेष्टायनक्षत्रजंफलंभवति॥ न्यासः॥ वाइत्यथ[illegible]वा॥ तत्सायंफलंइष्टाष्टिदृक्॥
२१६घ्नायुतंसत्फलंस्यात॥ इष्टश्च॥ अष्टिदृक्च॥ इष्टोइष्टायःतयोर्घ्नीहतिस्तयायुतमित्यर्थः॥ इदमपिस्वेष्टायनक्षत्रजंफलं
भवतीति॥ अत्रांकन्यासएवव्याख्यानं॥ ॥तथाचमिंगनाथदैवज्ञस्यसूत्रं॥ इष्टभात्यष्टि१७घातयआयस्ततोनिंतिष्टकः॥
त्रिल्हल्पथ्यहताग्निश्वि२७युतेस्वेष्टायभंभवेदिति॥२॥ अस्यार्थः॥ इष्टभात्यष्टिघाते॥ इष्टभंचअत्यष्टिश्च॥ तयोर्घातोगुणनं
तस्मिन्स्थकस्थापितयआयस्तेनउनितेष्टकःआयःयदिउनोनभवतितदाअष्टौप्रक्षिप्यस्फोटनीयःऊनितष्टायक्त्रित्यत्॥ अष्टौ

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४
१६	[illegible]	१०४	४०	१५२	१२८	६४	२१६	१५२	८८	२४	२१६	११२	४८
१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	०
२००	१३६	७२	८	१६०	९६	३२	१७४	१२०	५६	२०८	१४४	८०	००

लब्धाहतागाश्विपुतेलब्धेन आहताश्चते अगाश्विनस्त्वतेः पृथक्स्थापितेइष्टभात्पाशिघातेयुतेसति इष्टाय भंक्षेत्रफलंभवेत्।आयश्चभंचआयभेइष्टे आयभेयस्मिन् तत्तथा। अत्रयदि त्रिभिर्निःशेषोभागोनगच्छतितदातत्तेनावशेषेणसेत्रैव्याः यथात्रिभिर्भागोगच्छतितथाकार्यं। तथाचलालुगिरेवज्रस्यसूत्रं॥ ॥ येकेष्टघ्रंहताद्विबाणशशिना १५२ न्यस्ता १७ युतास्तेपिचयेष्टांके यहतेकुनाग ८१ संहिताः षण्मूर्छैना २१६ भिर्हताः। शेषंक्षेत्रफलंभवेदभिमतस्वेष्टायनक्षत्रजंस्याद्दैर्घ्यंतदभीष्टविस्तृतिहृतेदैर्घ्योद्धृतेविस्तृतिरिति॥३॥स्पष्टार्थश्लोकः।

इत्यादिविचारणयाइष्टक्षेत्रफलंअवकाशानुरूपंहरिधृत्वास्थलंसाधयेदित्यर्थः॥ ॥अथस्थलसाधनायसूत्रमोटनमाह॥ ॥
द्विघ्नायामभितंद्विपाशमरजत्सूत्रंविधायांकयेत् व्यायामांघ्रिमितेचविस्तृतिदलेंतात्कर्षकोणाभिधौ।पाशौक्षेत्रविरामशंकुनिहितौकृत्वायमाकर्षयेत्कोणेशंकुरितीतरौविनियमाद्व्यंतयोश्चापरे॥१४॥अजरस्सूत्रंन तनसूत्रं।द्विघ्नायामभितंद्विपाशंचविधाय।अंतादेकस्मात्सूत्रांतादंकयेदित्यन्वयः।द्विघ्नश्चासौआयामश्चद्विघ्नायामः।आयामोदैर्घ्यंतेनमितं।द्विगुणितदैर्घ्यसमानमित्यर्थः।द्विपाशंद्वौपाशौयस्मिन्तत् द्विपाशं।एवंविधंसूत्रंविधायकृत्वाअंतात्सकाशात् अंकयेच्चिह्नयेत्।एतदुक्तंभवति।पूर्वकल्पितक्षेत्रस्यदैर्घ्यमितंक्षेत्रस्यदैर्घ्यमितंसूत्रं द्विगुणंविधाय।तदंतयोःपाशौचकृत्वाअंकयेत्।कुत्रकुत्रांकयेदित्याह।व्यायामांघ्रिमिते।चपरीविस्तृ

सत्स्यात्॥ ॥कोणाध्वभ्रमकूपकर्दमतरुद्वारास्तंभदेवेक्षितंसद्मोच्चाद्द्विगुणाधिकांतरभवेवेधेनदोषःकिल।अष्टघ्नेगृहभूफलेभविहृतेशेषंगृहर्क्षेभवेद्दक्षेसर्पहृतेव्ययोगृहभेसत्स्वल्पायभूरिव्ययं॥१०॥कोणोभित्तिकोणः।अध्वामार्गः।भ्रमोभ्रमयंत्रंघरट्टकुलालचक्रादि।कूपःप्रसिद्धः।कर्दमःस्नानादिजनितोनिरंतरः।तरुःप्रसिद्धः।द्वाःद्वारांतरंस्तंभःप्रसिद्धः।देवस्थावरः।एभिर्ईक्षितंविद्धंमुखंनसत्स्यादित्यर्थः।अथास्यापवादमाह।सद्मोच्चेति।सद्मो च्चाद्द्विगुणाधिकांतरभवेवेधेनदोषः।सद्मनोगृहस्यऔच्च्यं।तस्यापेक्षयाद्विगुणाधिकांतरभवेद्द्विगुणाधिकांतरजातवेधेकोणादिवेधेनदोषः।अर्थात्न्यूनेदोषःकिलेत्यागमनिश्चयेन।तथाचागमांतरेउक्तं।मार्गतरुकोणकूपकर्दमभ्रमविद्धमरुद्दारं।सद्मोच्छ्रायाद्द्विगुणात्यक्त्वाभूमिंनदोषायेति।कात्यायनगृह्यकारिकायामप्युक्तं।विद्धंकूपतरुस्तंभपथ्यपंकैःसदेवतैः।तद्वारमशुभंप्रोक्तमस्तुचनीचमेवचेति।अथगृहनक्षत्रानयनंव्ययानयनंचाह।अष्टघ्नेति।गृहभूफले।गृहनक्षेत्रफले।अष्टघ्ने अष्टगुणिते भविहृतेसप्तविंशतिहृतेसतिशेषंगृहर्क्षंगृहनक्षत्रंभवेत्।ऋक्षेसर्पहृते अष्टहृतेसतिशेषंव्ययोभवेत्।एवमायव्ययावभिधायाधुनातत्फलंविशेषणद्वाराह।गृहभसदिति।स्वल्पायभूरिव्ययंगृहंअसत्।अशुभंस्यात्।स्वल्पायश्चभूरिव्ययश्चतौयस्मिन्तत्तथा।अर्थात्बह्वायाल्पव्ययंशुभं।नक्षत्रज्ञातेराशिनिर्णयमाह॥ ॥मेषाश्विनित्रयंहरौत्रिपित्र्यंभंमूलत्रयंधन्विनिर्दिष्टेभिपरतोगृहेशघटितंप्राग्वत्तुनाड्यन्यथा।एकादिद्विगुणोत्तरागृहमुखाद्दिक्ष्वंककाःस्युःक्रमात्शालाशांकयुतिःकुयुक्ध्रुवमुखान्योकांक्षिसंतिस्फुटं॥११॥अश्विनित्रयंमेषेज्ञेयं।त्रिपित्र्यंभंमघात्रयंहरौसिंहेज्ञेयं।मूलत्रयंधनुषिज्ञेयं।अन्येषुराशिषुद्वेद्वेभेज्ञेये।तथाचगर्गः।अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयं।मूलादित्रितयंचापिशेषभेषुद्वयंद्वयमिति।अथगृहनस्वामिनाघटितुमाह।गृहेशेति।गृहंप्रसिद्धं।ईशःस्वामी।तयोर्घटितंप्राग्वद्विवाहवद्योज्यं।तत्रविशेषमाह।नाड्यन्यथेति।नाडीएकनाडीअन्यथायोज्या।विवाहवत्नयोज्येत्यर्थः।अत्रएकनाड्येवप्रशस्तेतिभावः।तथाचबृहद्गर्गः।प्रभुःपण्यांगनामित्रंदेशग्रामंपुरंगृहं।एकनाडीगतंभव्यंविरुद्धंवेधवर्जितंइति।तथाचज्योतिःसागरे।सिद्धसे

मु॰ मा॰ टी॰ भिः इनोनाभेः सकाशात्तवामेवामभागे लवमितं खनेन अनंतरं अश्मभिः पूरयेत्। तथा च ब्रह्मशंभुः। सूत्रभित्तिशिलान्यासः स्तंभस्यारोप
५९ णं सदा। पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपइति। तथा च नारदः। नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमं। पूर्वादिदिक्शिरा
वामपार्श्वशायी प्रदक्षिणमिति। तथा च शिल्पशास्त्रे। वास्तोः शिरसि पुच्छे च याम्या कुक्षौ च पृष्ठतः। आयुः कामखनेनैव वामकुक्षौ
खनिः शुभा। वास्तुक्षेत्रप्रमाणं चकल्पितास्य वामके। कुक्षौ खातं विधाया दोप्यावभिः पूरयेत्ततइति। तथा च लल्लः। स्यजेद्दशशि
रोभागे घ्ययेसप्तदशांशकान्। मध्येनाभिं विजानीयात्तत्र शंकुं प्रतिष्ठयेत्। अस्थिरस्य शिरस्यत्र वास्तोस्तद्गुणये त्करैः। दैर्घ्यं च
श्रि विस्तृतं तत्र भक्ताद्यंशमितांशकानिति॥ ॥अथ शंकुन्यासमाह॥ ॥नाकालेत्रनिधेयउक्ततरुजोग्याभितिस्थ २४ विंशाः
स्य १६ हस्तक्तन्१ संख्यांगुलकस्त्रिभागचतुरस्राष्टास्रकानस्रकः। कंबक्षस्थलमूरुपादयुगुलं संस्पृश्य विप्रादिकोरेखां सृत्र
वह्निजेनर चयेत्तद्व भित्तिः शिला॥१७॥ अत्र कुक्षिस्थलेनानरः शंकुः कालमुहूर्ते समये निधेयः सकियत्प्रमाणं माइस्यपेक्षायां
त्प्रमाणमाह। अग्न्यादिप्रासक्ता शालवर्णपरत्वेन सिंह्यविंशात्यहस्तकृत संख्यांगुलकः। निधेयः प्रतिष्ठापनीयः। एतदुक्तं भवति।
विप्रेण चतुर्विंशांगुलोनिधेयः। क्षत्रियेण विंशांगुलः। वैश्येन अष्टांगुलः षोडशांगुलः। शूद्रेण अहस्तकृतसंख्यांगुलो द्वादशांगुलो।
निधेयइत्यर्थः। किंलक्षणः। नाउक्ततरुजः शास्त्रोक्तवृक्षोद्भवः। पुनः किंलक्षणः त्रिभागे चतुरस्राष्टास्रकानस्रकः णियस्मिन्स
तथा। एतदुक्तं भवति। यथाप्रमाणं शंकुं त्रिधा विभज्य आद्यांशं चतुरस्रं। द्वितीयांशं अष्टास्रं। तृतीयांशं अनस्रं। वर्तुलं कुर्यादिति भा
वः। तथा च कश्यपोतरे। स्याच्चतुर्विंशविंशाष्टद्वादशांगुलकैः क्रमात्। विप्रादीनां शंकुमानं स्वर्णवस्त्राद्यलंकृतं। खदिरार्जुनशालोकं
ल युगपत्रतरूद्भवं। रक्तचंदनपालाशरक्तशालविशालजं। नीपकारं कुटजवेणवं बिल्वरक्षजं। शंकुं त्रिधा विभज्याद्यं चतुरस्रं ५९
ज
ततः परं। अष्टास्रं च तृतीयांशमनस्रमृजुमव्रणं। एवं लक्षणसंयुक्तं परिकल्प्य शुभेदिनइति। अथ रेखाकरणमाह। कमिति। अग्निजेनस
वर्णेन ब्राह्मणादिकः। कारिकं स्पृष्ट्वा सूत्रवद्रेखां च रचयेत्तत्र च वह्निति आग्नेयादिगृहप्रदक्षिणं कुर्यादित्यर्थः। एतदुक्तं भवति। ब्राह्मणः कंशि
रस्पृष्ट्वा तर्जन्या वा कृत्वा आग्नेयादिप्रदक्षिणा सृज्ञानुगतां रेखां कुर्यात्। तथैव क्षत्रियो वक्षस्थलं स्पृष्ट्वा रेखां कुर्यात्। वैश्यः ऊरु
युगलं स्पृष्ट्वा। शूद्रः पादयुगलं स्पृष्ट्वा रेखां कुर्यात्। तथा च लल्लः। कृत्वा सूत्रनिपातं मध्यांगुल्याथवा प्रदेशिन्या अंगुष्ठेन वा मणिनाक
क्षांतरजतमुक्ताभिः। रेखां कुर्यादिति। तथा च भृगुः। विप्रः शीर्षं नृपो वक्षो वैश्यश्चोरू परः पदे। स्पृष्ट्वा रेखां गृहारंभे कुर्यादग्नेः प्रदक्षिणमिति। अग्ने
रित्याग्नेय्याः। तथा च कारिकायां। अंगुष्ठकेन देशिन्या रेखां कुर्वीत सूत्रवत्। स्वर्णेन मणिना रूप्यमुक्ता दधिफलाक्षतैः। कुसुमैर्वा न श
स्त्रेण न लोहेन न भस्मना। काष्ठादिभिर्नोपसव्यां न वक्रां दोषदर्शनात्। शस्त्रेण शस्त्रमृत्युः स्यादित्यादि स्पष्टमीरितमिति। तथा च बृह
द्वास्तुपद्धतौ। शस्त्रेण शस्त्रमृत्युर्बंधो लोहेन भस्मनाग्निभयं। तस्करभयं तृणेन च लिखिता काष्ठेन राजभयं। वक्रा च पादलिखिताश
त्रुभयदा कुरदा विरूपा च। चर्मांगारादिकृता दतेन च कर्तुरशुभाय। वैरमपसव्यालिखिता प्रदक्षिणा संपदे विनिर्दिश्येति। अथ शिलान्यासमा
ह। भित्तेः शिला अपि सूत्रवद्दारचयेयुः। आग्नेयादिप्रदक्षिणं स्थापयेयुरित्यर्थः। तथा च वराहः। दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमं
। शेषाः प्रदक्षिणेन स्तंभाश्चैवं प्रतिष्ठाप्यइति। अथ भित्तिप्रसंगेन द्वारमाह॥ पूर्वादौ त्रिषड्र्थपं चमवले ३।६।५।७ द्वाः सव्यतोंकी ९ ध्रुवेदैर्घ्ये
श्रा र्ध्यं ऽसमुच्छ्रिताब्धि ४ लवकेसर्वास्फुरिस्फुटिता। स्तंभो गेर्दिशिपूजितः स्फसमये स्थाप्यः शिरश्छत्रभाग्विस्ताराष्टि १६ लवान्विते कृत ४ करैस्तुल्यं
गृहोच्चाविदुः॥१७॥ ॥पूर्वादावति। दैर्घ्ये गृहदैर्घ्ये अंकाप्तेन वभाजिते सति पूर्वादौ दिशि क्रमेण सव्यतो वामभागात् त्रिषड
र्थपंचमलवे द्वाः द्वारं उक्तं। मुनिभिरिति शेषः। त्रयश्च षट् च अर्थाश्च पंच च। एतेषां संख्यापूरणा त्रिषड्र्थपंचमास्ते च ते लवा
श्च तेषां समाहारस्तस्मिन्। एतदुक्तं भवति। गृहदैर्घ्यं नवभागं कृत्वा पूर्वाभिमुखगृहे क्रियमाणे वामभागात् अंशद्वयं त्यक्त्वा

तृतीयं शेद्वारं कर्त्तव्यं। दक्षिणाभिमुखे गृहे तथैवांशपंचकं त्यक्त्वा षष्ठे रोकार्यं। पश्चिमाभिमुखे तथैवांशचतुष्कं त्यक्त्वा पंचमांशे कार्यं। उदङ्मुखे पंचमांशे
मु॰मा॰टी॰ तृतीयं शेद्वारं कर्तव्यं। दक्षिणाभिमुखे गृहे तथैवांशपंचकं त्यक्त्वा षष्ठे रोकार्यं। ... किंलक्षणाद्वाः। द्वांशसमुच्छ्रिताः द्विभागाद्या। तथा च वराहः। दैर्घ्यं नवांशाः परम
५२ एतद्वारं कर्तव्यं। सर्वासु दिक्षु अष्टिलवके चतुर्थे भागे द्वारं दिता। किंलक्षणाद्वाः। ... तथा च च्यवनः। मानाधिकोन दिग्भागे
सव्यात् द्वारं स्यात्। प्राक् त्रि चतुर्थे भागे। चतुर्थषष्ठे दिशि दक्षिणस्यां पश्चात् चतुः पंचमकेत थोदगिति। तथा च च्यवनः। मानाधिकोन दिग्भागे
द्वारे नीचेस्कृत्वक्षयद्वृति। अथ निष्पन्नास्कंभिनिमुस्तंभप्रतिष्ठामाह। स्तंभो ग्नेदिशीति। अग्नेर्दिशि आग्नेय्यां स्कसमये पूर्वोदिते स्तंभः
स्थाप्यः। अत्राप्युक्तरुद्वइत्यनुवर्तते। किंलक्षणः स्तंभः पूजितः। स्रक्‌चंदनाद्यर्चितः। पुनः किंलक्षणः शिर[illegible] छत्रभाक्। शिरसि छ
त्रं त्रंभजतइतितथा। छत्तुकाकादिपक्ष्युपवेशनभयात्तत्तंभो परिक्रियते। तथा च वराहः। छत्रस्रग्बंधयुतः कृतधूपविलेपनः समुत्थाप्यः
।स्तंभस्तथैव कार्यो द्वारे छ्रायः प्रयत्नेनेति। तथा चोसलः। स्तंभोपरि यदा लूककाकगृध्रादिपक्षिणः। व्यालादयश्चातिष्ठंति तदा कर्तुर्न शोभनं
तस्मात्तंभोपरिछत्रं शारवां फलवतीं नुवा। धारयेदथवा वस्त्रं बुधैर[illegible]त्वादि निक्षिपेदिति। गुर्जरदेशे केचित्कालसर्पमथलोक्य तत्छन्न्यदिशि
प्रथमं स्तंभप्रतिष्ठां कुर्वंति तदसत्। यतस्तदव[illegible]लोकनं विवाहवेद्यां कोणेषु शृंगारार्थं स्तंभारोपयं तिनद्विषयं। तदप्येकदेशीयं न बहु[illegible]सं
मतं। कालसर्पस्तु यथा। ईशानतः सर्पति कालसर्पो विहाय सृष्टिं गणयेद्विदिक्षु। पश्चाद्गतिस्तन्मुखमध्यपुछे त्रिकं त्रिकं वैरपसंक्रमादेः। अहेः
फणायां मरणं वरस्य मध्ये कुमार्याः स्वजनस्य पुछे। विधेयमेकं किल शल्यदेशे विवाहवेद्यां निखने च कीलमिति। गृहस्तंभप्रतिष्ठापनं बहुभिर्ग्रं
थांतरेराग्नेय्यामेवाभिहितं। तथा च व[illegible]शंभुः सूत्रभिन्निशिलान्यासं स्तंभस्यारोपणं तथा। पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपः। तथा च
शार्ङ्गधरः। प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा। आग्नेय्यां प्रथमं स्तंभं स्थापयेत्तद्विधानतः। तथा च वराहमिहराचार्यः। दक्षिणपूर्वे कोणे कृत्वा पू
पूजां शिलान्यसेत् प्रथमं। शेषाः प्रादक्षिण्येन स्तंभाश्चैवं प्रतिष्ठाप्या इति। कात्यायनगृह्यकारिकायामप्युक्तं। एकैकमुच्छ्रयेत्तत्र [illegible]मंत्रै ५२
रेतैः शिलातले। ध्रियां वामानइत्येतैरिमामित्यादिभिर्गृही। आग्नेयादिकोणेषु मंत्रैरेतैः शिलान्यसेदिति। गृहहरिहरभाष्ये शालाप

नितले अंकयेत्। यत्रेशाने आयामांघ्रवश्चा। तेन तथा तैर्मितं तस्मिन्। एतदुक्तं भवति। क्षेत्रदैर्घ्यं चतुर्भिर्भक्त्वा लब्धं अंघ्रिप्रमाणं। एकस्मादंतादं
घ्रित्रयं मित्वा चिह्नयेत्। तस्मादेवांनातात विस्तीर्णतले। क्षेत्रस्य विस्तारार्धमिते अंकयेत्। तौ अंकौ कर्षकोणाभिधौ स्तः। अंघ्रित्रये कृतः कर्षा
ख्यः। विस्तीर्णतले कृतोंकः। कोणाख्यः। एवं सूत्रमोटनमुक्त्वा स्थलसाधनमाह। पाशादिति। पाशो क्षेत्रविरामशंकु निहितौ कृत्वा आद्यं अंकं
आकर्षयेदित्यन्वयः। क्षेत्रस्य विरामो अंतौ तयोः शंकू। तयोर्निहितौ निक्षिप्तौ कृत्वा आद्यं अंकं कर्षाख्यं आकर्षयेत्। एतदुक्तं भवति। क्षेत्रस्यम
ध्यभागसाधितदिक्‌सूत्रोपरि दृष्ट दैर्घ्यमितं सूत्रं प्रासार्य तदंतयोः शंकू निखायतयोः शंकोः मोटितसूत्रांतपाशौ निधाय कर्षाख्यं चिह्नं धृत्वा
एकस्यां दिशि आकर्षयेद्यथो भयशंकुगतारज्जुः समानाकर्षा स्यात्। तया आकर्षयेदित्यर्थः। कोणशंकुरिति। कोणे कोणाख्ये चिह्ने यत्र कोण
चिह्नं आगतं तत्र भुवि शंकुर्निखेय इत्यध्याहारः। इत्यमुना प्रकारेणद्वितरः शंकुर्निखेयः। एतदुक्तं भवति। तदेव कर्षचिह्नं अन्यस्यां दिशि आ
कृष्य कोणे शंकुर्निखेयः। एवं कोणद्वयसाधनमभिधाय अन्यकोणद्वयसाधनमाह। विनियमादिति। रज्ज्वंतयोर्विनियमाद्विपरीतधार
णात् अपरौ कोणशंकू निखेयौ। एतदुक्तं भवति। रज्ज्वंतौ विपरीतौ धृत्वा पूर्ववत्कर्षाकर्षणं कृत्वा कोणयोः शंकू निखेयौ॥ ॥एवं क्षेत्रसा
धनमुक्त्वा सूत्रन्यासमाह॥ ॥आग्नेयादि दृढं प्रदक्षिणगतं सूत्रं समासादयेन्मध्ये वामकपार्श्वकं प्रपुरुषं ध्यालातमुत्तानकं। अष्टाश्व्यं १८
शमगेंदु १७ संमितलवान् पुछाद्विहायाग्रगो भागोनाभिरितः स्वनेलुवमितं वामैरमभिः पूरयेत्॥ १५॥ आग्नेय्यादि दृढं प्रदक्षिणग
तं सूत्रं आसादयेत्। मध्ये क्षेत्रमध्ये वामकपार्श्वकं प्रपुरुषं प्रागुक्तं शिरस्कं ध्यालातं ध्यातमुत्तानं ध्यायेत्। कथंभूतं अष्टाश्व्यंशं
अष्टाश्विनो अंशा भागा यस्मिन् स तथा तं। अयमर्थः। क्षेत्रप्रमाणं षट्कलासरूपं वास्तुपुरुषं प्रकल्प्य ततोष्टाविंशतिधा कुर्यात्।
शं एवं अष्टाश्व्यं[illegible]प्रकल्प्य पुछात् सकाशात् अंगेंदुसंमितलवान् सप्तदश भागान् विहाय स्थितो अग्रगस्तदग्रगो भागो ना

मु०मा०टी० ऽमूत्रकं। आलेशक्तिभुवोर्यथारुचिपरेगेहस्पदस्तेघरट्टंचूलूखलतुल्लिकापित्तपदप्रक्षालनान्यूचिरे॥१८॥ स्नानेति। स्नानंप्रसि
५३ द्धं। अग्निःप्रसिद्धः। स्वपिःशयनं। वस्त्राणिप्रसिद्धानि। भोजनंप्रसिद्धं [illegible]। पशवोगवादयः। द्रव्याणिरूप्यवर्णादीनि। अमरादेवाः
।एषुंओकांसिगृहाणि। तेषांस्थितिःस्थापनं। पूर्वादिदिशिक्रमेणकार्यमित्यध्याहारः। तथाचनारदः। स्नानागारंदिशिप्राच्या
माग्नेय्यांपावकालयं। याम्यायांशयनागारंनैरृत्यांवस्त्रमंदिरं। प्रतीच्यांभोजनागारंवायव्यांपशुमंदिरं। भांडकोशंतूत्तर
स्यामीशान्यांदेवमंदिरमिति। अथजलस्थापनमाह। ईशितुरी[illegible]शानस्यदिशिजलंकार्यं। नान्यत्र। तथाचलल्लः। प्राच्यादिरिक्तेस
लिलेसुतहानिःशिखिभयंरिपुभयंच। स्त्रीक[illegible]हलंस्त्रीदोष्यंनैस्व्यंवित्तात्मजविवृद्धिरिति। अथान्यदप्याह। पुरमिति। पुरंअ
भुक्तंपराथंजातंवायोर्दिशिकार्यं। अन्यानिमारुत्यामिति। लल्लोक्तत्वात्। अपाक्दक्षिणस्यांदिशिमूत्रकं। मूत्रमेवसूत्रकंकार्यं।
स्थलसंकोचेसतिएतदुक्तंतद्गृहलग्नेबाह्यतश्चैवमवस्था नेनारतम्यंनयोज्यं। अथशक्तिभुवोःसंकोचेसतिकर्तव्यमाह।
आलेइति। शक्तिभुवोरालेसतियथारुचिकार्यं। गेहस्पदस्तेपरेआचार्याघरट्टादिकंऊचिरे। घरट्टःपिष्टयंत्रं। अंबुउदकं। उलूखलादि दू
प्रसिद्धं। तथाचोक्तंग्रंथांतरे। उलूखलंपिष्टयंत्रमग्निस्थानंजलाश्रयं। वेश्मनोदक्षिणेपार्श्वेपितॄणांपादशौचनमिति॥ ॥
अथकेषुकेषुगृहेषुआयादिकंभाव्यंकेषुनभाव्यमित्याह। द्वात्रिंशाधिकहस्तमब्धि४वदनंतार्णंत्वलिंदादिकंनेष्वायादिकमीरितंतृणगृहंसर्वे
षुमासुस्मृतं। छन्नंवश्यकपाटमर्चितमंवेश्मोक्तरीत्याविशेदारंभोदितमासुनारदमतान्माघोर्जशक्रेषुतु॥१९॥ ३। १९। द्वात्रिंशेभ्यः
अधिकाहस्तायस्मिन्गृहेप्रमाणंतद्द्वात्रिंशाधिकहस्तं। अब्धिवदनंचतुर्मुखं। तार्णंतृणगृहं। अलिंदादिकं। अलिंदःप्रहशालेतिलो
केप्रसिद्धं। आदिशब्देननिर्व्यूहादिगृहभूषणंगृह्यते। एषुआयादिकंनईरितंनोक्तं। तथा[illegible]चंद्रेवज्रवल्लभे। अलिंदनिर्व्यूहविनिर्ग
माद्यास्तुर्दिशंयेगृहभूषणाय। आयादिकंतेषुनचिंतनीयंयतोनतेवास्तुपरिग्रहस्युरिति। तथाचचिंतामणौ। यच्चंदैर्घ्यंगृहादीनांद्वात्रिंश ५३

त्पसननोधिकं। नतत्रचिंतयेद्धीमानगणनानक्ष्यादिकानिति। तथाचराजमार्तंडे। आयव्ययौमासशुद्धिंचिंतयेन्नतृणालयेइति। तथाचवसिष्ठः।
एकादशप्रभृत्यूर्ध्वंयावद्द्वात्रिंशहस्तकं॥ तावदायादिकंचिंत्यंतदूर्ध्वं[illegible]नेवचिंतयेदिति। अथतृणगृहेविशेषमाह। तृणगृहंसर्वेषुमासुमासेषुउ
दितंसर्वेमासेकर्तव्यमित्यर्थः। अथनिष्पन्नेगृहेतत्प्रवेशमाह। छन्नमिति। आरंभोदितमासुशास्त्ररीत्यावेशमविशेत्। आरंभेयेउदिताः
प्रोक्तास्तेचतेमासाश्चतेषुसूत्रायुक्तविधिनागृहंप्रविशेत्स्वामीत्यर्थः। कथंभूतंवेश्मछन्नंकुड्यैराच्छादितं। पुनःकिंलक्षणंवश्यकपा
टं। वश्यंकपाटंअधीनंकपाटंयस्येतितत्। वश्यमितिपिहितेउद्घाटितेवातथैवस्थिरंभवति। पुनःकिंलक्षणं। अर्चितंत[illegible]मं। तोरणमा
लाद्यलंकृतं। तथाचनारदः। अकपाटमनाछन्नमदत्तबलि[illegible]भोजनं। गृहंनप्रवेश[illegible]देवविपदामाकरंहितदिति। तथाचच्यवनः। स्वयमु
द्घाटितेरोगःपिहितेचकुलक्षयः। मानाधिकेनदिग्भागेद्वारेनीचेसुखक्षयइति। अथप्रवेशेमासविशेषमाह। नारद[illegible]तात्माघोर्जश म
क्रेषुगृहंविशेत्। माघःप्रसिद्धः। ऊर्जःकार्तिकः। शुक्रःज्येष्ठः। एष्वित्यर्थः। आरंभोदितमाः सि[illegible]त्यनेनतृणगृहस्यसर्वमासेषुविहित
त्वात्। प्रवेशोपिसर्वमासेषुविहितः। नारदः। प्रवेशोमध्यमोज्ञेयःसौम्यकार्तिकमासयोः। माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनइति। तथाचज्यो
तिःप्रकाशे। गृहारंभोदितेमासेधिष्ण्येपूर्वोदितेविशेद्गृहमिति। तथाचग्रंथांतरे। विशेत्सौम्यायनेहर्म्यंतृणागारंतुसर्वदेति। तथाचव्यवहारसारे॥
सौम्यायनेश्रावणमार्गपौषेज[illegible]मर्कलग्नेपचतुर्थादशांशे। वामंगतेर्केगृहवास्तुपूजांकृत्वाविशेद्वेश्मभकूटशुद्धमिति॥ ॥इदानीमपूर्वादिप्र कलवास्तु
वेशानाह॥ प्रारंभोदितभैःप्रवेशउदितोऽपूर्वःसपूर्वःस्थिरेभैत्रैश्चान्युतमूलदस्रसहितैर्द्वारंभमैद्ध्यालिकः। लग्नंवेश्मभवंदिवैवविहितंरात्रौप्रवेशः गतिः१
कोनलयस्रोदिभपंचकमनुभिता॥१९॥ दप्रवेशोनसन्॥२०॥ प्रारंभोदितभैःगृहप्रारंभोदितनक्षत्रैःअपूर्वःप्रवेशउदितःमुनीद्रैरित्यध्याहारः। अत्रप्रारंभो ष्टानि४
दितभैरित्युपलक्षणं। तेनप्रारंभोदिततिथिभादिकंसर्वंग्राह्यं। अपूर्वोनामनूतनगृहेप्रथमःप्रवेशउच्यते। स्थिरेभैत्रैश्चानसंज्ञैःसपूर्वःप्रवेशउदितः। सपूर्वो भनं४
नामयात्रावसानेयःक्रियते। तथाचज्योतिःप्रकाशे। अपूर्वःप्रवेशोगृहारंभतुल्योधिष्ण्यैर्विधेयःकरोमध्यमोन्नौनिकेत। सपूर्वःस्थिरैर्मिश्रभैरेवकार्यस्त्वरैतोन्यै श्राः४
रश्विमूलाच्युतारंभाधिष्ण्यैः। अपूर्वसंज्ञंप्रथमप्रवेशंयात्रावसानेचसपूर्वसंज्ञं। द्वंद्वाह्वयंचाग्निभयादिजातंगृहप्रवेशंत्रिविधंवदंतीति। अथगृहकृत्ये वेर४
दिनरात्रिविशेषनिर्णयमाह। लग्नंवेश्मभवमिति। वेश्मभवंगृहसंबंधियत्किंचित्कृत्यंतद्दिवाविहितंउक्तंनरात्रौ। किंतुदिवामुहूर्ताभावेसतिरात्रौप्रवेशो दुःख४

स्थिरता३
सुखं३
२०/८३

मु॰मा॰टी॰ विहितः। नान्यत्। तथा च वसिष्ठः। दिवा प्रवेशः शुभदः सपुत्रपौत्राभिवृद्ध्यै निशि भास्करेंदौ। बलेन मत्स्यध्वजवासरस्य रात्रिं विना सूर्यतिथिश्च रात्रिमिति।
अथ कलशवास्तुनक्षत्ररूपत्वमाह। सूर्यर्क्षादिति। सूर्यनक्षत्रादिभपंचकं नक्षत्रपंचकं तथा सूर्यर्क्षादिमनुमिताच्चतुर्दशमितान्नक्षत्रादष्टनक्ष-
५४ त्राष्टकं प्रवेशे न सत्। न शुभं स्यात्। अन्यानि शुभानीत्यर्थः सिद्धं। अथ पूर्वोक्तानां नक्षत्राणां शुभाशुभं ज्ञातव्यं॥ ॥अथ प्रवेशे लग्न[..]शुद्धिमाह।
लग्ने चोपचयस्थिरे रविमुखे भार्गं भवत्संस्थिते सूर्ये वामगते स्वदिग्वदनभैर्वेश्मप्रवेशः शुभः। रंध्रे शुद्धिभवे व्यय ८।५।१२।११। आक्रूतगतः सूर्यो यदा
स्यात्तदा पूर्वाद्याननमालयं प्रविशतां स्याद्वामगोसौ क्रमात्। २३। उपचयस्थिरे लग्ने जन्मर्क्षे लग्नाभ्यां उपचयावहे स्थिरे लग्ने वेश्मप्रवेशः शुभः स्यात्।
केः र विमुखेः सूर्यादेः। प्रारं भवत्संस्थिते: गृहारंभार्थमुक्तं। प्रारंभं स्थिरतनौ कुर्यात्केंद्राष्टमइति प्रकरणपठितं विशेषं ज्ञात्वा साधारणलग्न च
वामार्कः लपठितं प्राप्य श्चिंद्रं सजेत्साद्यूक्तं तद्वत्संस्थिते तोरित्यर्थः। कस्मिन् सतीति सूर्ये वामगते सति पुनः कैः स्वदिग्वदनभैः यद्दिङ्मुखं गृहं तद्दिङ्मुखैः प्रवेशो
[illegible] दिते नक्षत्रैरित्यर्थः। अथ वामगतसूर्यलक्षणमाह॥ रंध्रेइति। रंध्रे शुद्धिभवे व्ययः लग्नात् अष्टमपंचमद्वितीयैकादशेभ्यः सकाशात्। आक्रूतगतः सू
र्यो मर्यादीकृत्येत्यासक्तं आपं[.] चमगतः सूर्यो यदा स्यात्तदा पूर्वाद्याननमालयं पूर्वादिमुखं गृहं प्रविशतां [.] मनुष्याणां असौ सूर्यः क्रमाद्वामगः स्यात्।
एतदुक्तं भवति। अष्टमात्संचक्रवर्तमानः सूर्यः पूर्वाभिमुखे प्रविशतां वामो भवति। पंचमात्संचक्रगतो दक्षिणाभिमुखे गृहे वामो भवति। द्वितीयात्संचक्रव
र्तमानः सूर्यः पश्चिमाभिमुखे गृहे प्रविशतां वामो भवति। एकादशात्पंचकगतः उत्तराभिमुखगृहप्रवेशे वामो भवतीत्यर्थः। इति स्वोक्तमुहूर्त
मार्तंडटीकायां मार्तंडवल्लभायां वास्तुप्रकरणं॥ ॥अथ यात्राप्रकरणं व्याख्यायते॥ तत्रादौ कस्मिन्काले यात्रा कर्तव्येत्याह। वोरेचापव
यावहस्यस्रुद्रशास्विष्टं प्रयाणं जगुः क[.]र्णात्सादितिनो द्विकेषु मृगमैत्रार्केषु नो जन्मभे। सार्पाद्राग्निमघाजपादपितृधुत्वाष्ट्रत्रये चारुभं रिक्ता
।९।१४। पर्व १५।३०। शुहाष्टमी ६।८। हरि १२ सितास्ये युग्मशुक्रोन्मुखं॥३॥ स्फूटशास्कूशो भूनदशांतर्दशाविदशोपदूशास्कृ उपचयावहस्यग्र
हस्यवारे गोचराष्टकवर्गादेशुभफलस्य गृहस्यवारे प्रयाणे शुभं इष्टं जगुराचार्याः। केषु कर्णात्सादितिनो द्विकेषु। कर्णः श्रवणः। अंत्यं रेवती॥
वक्रे भे १ रविभालवेशासमये कुंभोग्निदाहः कृताः ४ प्राच्यामुद्वसनं कृता ४ यमगलालाभः कृता: ४ पश्चिमे। श्रीवेशः ४ कलिकृत्तरेषु गर्भिता ४ गर्भे विनाशो गुदेस ५४
मे: ३ स्थैर्यमस्थितलमनव्लाः ३ कंठे भवेत्सर्वदा॥ ६॥

इति [..]थ्येवमेवोक्तमित्यलमतिप्रसंगेन। उक्तलरुजइत्युक्तला छग्रत्रां नराणां काष्ठान्यवर्गत्व्यानि। तथा च वास्तुशास्त्रे। श्रीपर्णी रोहिणी
शाकसज्ञोश्च सरलाः शुभाः। पतंगरोध्रशालाख्यास्तालार्जुनकशिंशिपाः। चंदनाशोककबरीमधुकाश्चिकटंबकाः। प्रशस्ता[..]श्च श
मीनिंबबिल्ववज्रे गृहानि मे। गृहे काष्ठं समं श्रेष्ठमलिंदे विषमं शुभमिति। नारदः। प्लक्षोदुंबरचूताख्यानिंबस्नुहि[..]बिभीतकाः। दग्धाः
णी कंटकिनो रक्षावटाश्वत्थकपित्थकाः। अगस्तिशिग्रुतालाख्यातिंतिडीकाश्च निंदिताः। अन्ये च गृहनिर्माणे योजनीया सदा बुधाः
ति। तथा च वराहः। पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः। चैत्यसरित्संगमसंभवा[..]श्च घटतोयसिक्ताश्च। कुब्जानव जाति
कुं निपीडितानज्जमरुतापहताः। स्वपतितहस्तिनिपीडितमुष्काग्निपुष्पमधुलयाः। ४नि४ तरवो वर्जयितव्याः शुभदाः स्युः स्निग्धपत्रकु
सुमफलाः। करदारु चंदनसमामधुकतरवः शुभा द्विजातीनां। क्षत्रस्यारिष्टाश्वत्थखदिरबिल्वार्ध्यिकराः। वैश्यानां जीवकखदिरकसि
दुकस्यंदनाश्च शुभफलदाः। तिंदुककेसरसरलार्जुनोथ शालाश्च शूद्राणां। सर्वेषां वा शस्ताः सर्वे रक्षाश्च निंदिताये वेति। व्यासोपि।
अन्यवेश्मास्थितं दारु नैवान्यस्मिन्प्रयोजयेत्। न तत्र वसते कर्ता वसन्नपि न जीवति। समरसंग्रहे। इष्टिकालोष्टपाषाणमृत्तिकाजीर्ण
मायसं। तृणपर्णबुधैः प्रोक्तं दारु नूतनं गृहार्थं वै इति। शार्ङ्गधरः। नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते। जीर्णे च नूतनं काष्ठं नो जीर्णे नू
तनं शुभमिति। रत्नछेदसार्थेनाग्रे ग्रंथांतरे उक्तौ। यानीह भूतानि वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तं। अन्यत्र वासं परिकल्पयं
तु क्षमंतु तान्यत्र नमोस्तु तेभ्य इति। अथ स्तंभप्रसंगेन गृहोच्चतामाह। विस्तारेति। विस्तारस्य गृहविस्तारस्य अष्टिलवः षोडशां
शस्तेन अन्वितैर्युक्तैः करैः चतुर्हस्तैस्तुल्यं समानं गृहोच्च्यं विदुर्मुनय इत्यध्याहारः। तथा रत्नकोशे। विस्तारषोडशांशः सचतु
र्हस्तो भवेद्गृहोच्छ्राय इति। तथा च लल्लः। नातुच्छितं नातिनीचं कुड्योत्सेधं यथारुचीति। अथ मुख्यगृहात्कस्य गृहकस्य
दिशि कर्तव्यमित्याह॥ ॥स्नानाग्निसपिवस्त्रभोजनपशुद्रव्यामरौकस्थितिं पूर्वादौ जलमीशितुर्दिशि परं वायोर्प

भगणे। तदुक्तं भवति। सप्तशलाकाचक्रं निष्पाद्य सर्वगनाकृत सप्तकरेखासु ईशानतः कृत्तिकादीनि सप्तनक्षत्राणि न्यसेत्। तत्पुरस्तानि सप्त दक्षिणग
तरेखासु न्य[?]सेत्। एवं पश्चिमोत्तररेखासु क्रमेण न्यसेत्। ततो वायव्याग्नेयदिग्गतां रेखां कुर्यात्। अस्याः परिघ इति संज्ञा। एवं निष्पादिते चक्रे वा
य्वग्निकाष्ठास्थित इति वायुः अग्निः अनयोः काष्ठे दिशौ वायव्याग्नेय्यौ तत्र स्थितपरिघो नोल्लंघ्यः। अथान्यल्लयोजनमाह। अपागिति। अपाक्दू
क्षिणस्यां वरुणभैः प्रतीच्यां नक्षत्रैर्न व्रजेत्। प्राच्यां नक्षत्रैः उदकु उत्तरस्यां न व्रजेत्। सर्वासु सर्वदिक्षु शशीज्यमित्रतुरगैर्यायात्। रविर्हस्तः। ईज्यः पुष्यः।
मित्रमनुराधा। तुरगोऽश्विनी। एभिर्नक्षत्रैः सर्वदिक्षु यानं शुभमित्यर्थः। अथावश्यके कृत्ये अस्यापवादमाह। अथावश्यके कृत्ये सति निंद्यैः अ
निष्टैः यद्दिक्षु यानि निंदितानि तानि तैः पूर्वोक्तैर्नक्षत्रैः तस्यां दिशि तदा व्रजेत्। तदा कदा यदा। यदि निजाशेष्टांगलब्धिर्व्रजेत्। निजाशायां
निजगमनदिशायां इष्टांगलब्धिः इष्टलग्नलाभः स्यात्। इष्टलग्नं वक्ष्यमाणलक्षणं। तद्यथोक्तं गुणसंपन्नं यदा स्यात्तदा गच्छेदित्यर्थः। नो चेन्न
त्यर्थसिद्ध्यै। किं कृत्वा। शूलभं हित्वा पूर्वोक्तं शूलनक्षत्रं त्यक्त्वा। शूलनक्षत्रे सति निजाशेष्टांगलब्धौ अपि न गच्छेदित्यर्थः॥ ॥अथान्यदाह।
मिश्राख्यध्रुवभैर्दिनादिमलवे तीक्ष्णैर्द्वितीयांतिमे क्षिप्रैर्नैक्रमशोऽम्बुदृग्गचरभैः [?] रात्रित्रिभागेषु यायात्। श्रुत्यर्केज्यमृगेषु यं न नियमो वैश्वांत्यपा
दः श्रवणस्य तिथ्यंशश्चाभिजित्सुभे सफलदो याम्यां विनापि क्षणः॥ ४॥ दिनादिमलवे त्रिधा विभक्तदिनस्याद्यंशे मिश्राख्यैः साधारणैर्नक्षत्रैः ध्रुव
भैश्च न इयात्। न गच्छेत्। द्वितीये भागे तीक्ष्णैः। अंतिमे तृतीये भागे क्षिप्रैरिति। रात्रिः प्रथमे भागे मृदुभिः। द्वितीये उग्रैः। तृतीये चरभैरिति। अत्रविशे
षमाह। श्रुतीति। श्रुत्यर्केज्यमृगेषु। अयं नियमो न। श्रुतिः श्रवणः। अर्को हस्तः। ईज्यः पुष्यः। मृगश्च एभिर्नक्षत्रैः सर्वभागेषु गंतव्यमिति भावः।
अथाभिजिल्लक्षणं [?] तत्फलमाह। वैश्वेति। वैश्वमुत्तराषाढा तस्याः अंत्यपादश्चतुर्थचरणः [?] श्रवणस्य आद्यतिथ्यंशः प्रथमतिथ्यं
शः प्रथमः पंचदशांशः एतत्प्रमा[?]णोऽभिजित्स्यात्। सोऽभिजिद्याम्यां दक्षिणदिशं विना सर्वदिक्षु फलदः। क्षणोऽपि अभिजिन्मुहूर्तोऽपि
याम्यां विना फलदः। यात्रिकाणामभीष्टफलदो भवेदित्यर्थः॥ ॥अथान्यदाह। एकार्केंद्वयनानुकूलमनिशं भेदे दिवारात्र्योर्भौमे प्राक् ५५

शनिचंद्रयोर्गतमपाक् पश्चात् इज्ञगुर्वोर्हितं। भृग्वर्कादुदगर्कभाद्युभमगे ७ त्त्वष्ट्रहिमपा २।७ डुलस्त्वंगाभ्यां ३।६। विडलोनयोर्न गमनं श्रीदे
वलोक्त्या हितं॥ ५॥ ॥एकार्केंद्वयनानुकूलमिति। अर्कश्च इंदुश्च तयोरयनं अर्केंद्वयनं एकं चेत्तत्। अर्केंद्वयनं चेत्तत्र यातस्यानुकूलं गतं गम
नं अनिशं हितं स्यात्। भेदे सति दिवारात्र्योः क्रमेण शस्तं स्यात्। अयमर्थः। सूर्यो दिनस्वामी। चंद्रो रात्रिःस्वामी। द्वौ चेदुत्तरायणे स्यातां तदाहर्निशं उदग्ग
मनं शस्तं। द्वौ चेद्दक्षिणायने भवतस्तदा अहर्निशं दक्षिणगमनं शस्तं। भेद इति। रविचंद्रयोः अयने भेदे सति दिवा सूर्याश्रितदिशं प्रति गमनं शस्तं। रात्रौ
चंद्रायनदिशं प्रति गमनं शस्तं स्यात्। अर्थादन्यथा न शस्तं स्यात्। अत्र प्राचीउत्तरसंबंधिनी। प्रतीचीदक्षिणसंबंधिनी ज्ञेया। तस्माद्य[?]दा उदग्गम
नं शस्तं तदा प्राग्गमनमपि शस्तं भवति। यदा दक्षिणदिग्गमनं शस्तं तदा प्रतीचीगमनमपि शस्तं स्यात्। तथा च रत्नकोशे। दिनकरमनयामकर
रयुत्तरां च पूर्वां च। याम्या च ककटादेर्याम्यामाशां प्रतीचीं च। भौमेति। भौमे प्राक् सर्वदिशि गमनं हितं स्यात्। शनिचंद्रयोरपाक् दक्षिणस्यां
ज्ञगुर्वोः पश्चात् पश्चिमस्यां। भृग्वर्कात् शुक्ररविदिने उदक् उत्तरस्यां गतं हितं स्यात्। अथाडलं विडलं चाह। अर्कभादिति। सूर्यनक्षत्रात्
धिष्ण्यं दिननक्षत्रं भगैः सप्तभिस्तष्टं शेषितं सत्। सप्त द्वे वा यदा भवति तदा डलः स्यात्। यदा त्रयः [?] षट् शेषं तदा विडलः स्यात्। अनयोः डलविडलयोः
न श्रीदेवलोक्त्यां देवर्षिवचनेन सहितं स्यात्। अथवा [?] दोहदानाह। आज्यं दुग्धं गुडं तिलान् दधि यवान् माषान्निनात्प्राश्य नो खलेऽयानमनिष्ट
मिंद्रककुभोयाज्यं तिलान्वं तिमीन्। दुग्धं प्राश्य च हस्त्यनोहयनरैर्योन्नं कृयानं तयोर्ध्यानाद्वा भ[?]वति ध्रुवे थ हरिज्जंतिथ्यादिलक्षाधिकं॥ ६॥
कृगमं। इनात् सूर्यात्प्रकाशात् आज्यादीनि प्राश्य प्राशयित्वा शूले वारशूले यायात् अ[?]नर्थकृन्नो भवति। अथ दोहदमाह। आज्यमिति। घृतादि
कं प्राश्य ऐंद्र्यादिषु हस्त्यादिभिर्यानं कृयानं भवति। हस्ती प्रसिद्धः। अनः शकटः। अश्वोऽश्वः। नराः शिबिकावाहकाः। एतदुक्तं भवति। घृतं प्राश्य
हस्तिना प्राग्गमनात्सिद्धिः। तिलौदनं प्राश्य रथेन दक्षिणगमनात्सिद्धिः। मत्स्यान्प्राश्य अश्वेन अश्वेन पश्चिमगमनात्सिद्धिः। दुग्धं प्राश्य
नरैः उदग्गमनात्सिद्धिः स्यादित्यर्थः। असतिसंभवे अभावे वा निर्णयमाह। तयोरिति। भक्ष्यवाहनयोः ध्यानाद्वा यानं कृयानं भवति। ध्रुवेथह

द्विजमिति। हरिर्जलं लग्न वनिं। कथंभूतं तिथ्यादिलक्षादिकं। तिथ्यादिभ्यो लक्षाधिकं बलिष्ठमित्यर्थः॥ ॥स्वर्क्षानधिघटास्तभान्नजुग
हान्वष्ठरिसौम्यादनक स्वर्क्षागेशरिपुं खलं जनिबलस्य कंनथासांप्रतं। यात्रालग्नगतं त्यजेदथ दिशामीशोर्कशुक्रौ कुजो राहुर्मंदशशी
केसौम्यगुरवः। केंद्रे दिगीशे व्रजेत्॥ ७॥ स्वर्क्षानधिघटादिकं यात्रालग्नगतं त्यजेत्। स्वर्क्षं स्वराशिः। अनधिः स्वराशेः अनुपचयभवनं घटः कुंभः॥
अस्तभं अस्तंगतग्रहस्य राशिः। अनृजुग्रहं वक्रिग्रहस्य राशिः एतान् रिपोर्भात् वैरिराशेः षष्ठं अनृजुषष्ठोदयं। गोजाश्विकर्कि मिथुनाः समृगा निशाख्याः
पृष्ठोदया विमिथुनाः कथितास्त एव शीर्षोदयं लग्नजातकात् ज्ञेयं। स्वर्क्षगेशरिपुं। ऋक्षं च अंगं च ऋक्षांगं। तस्येशः स्वामी तस्य रिपुं खलं। जनिबलं
सर्वं जन्मनि बलहीनग्रहं। तथा सांप्रतं प्रस्तुतं अब लविधुर्क्कं। इत्युक्तं सर्वं यात्रालग्नगतं त्यजेत्। अथ दिक्पतीनाह। दिशामिति। दिशां पूर्वा
दीनामीशाः स्वामिनः। अर्कशुक्रादयः प्रतयः क्रमात्स्युः। केंद्रे १।४।७।१०। दिगीशे सति व्रजेत्। यस्मिन् केंद्रे ललाटगो भवति तत्केंद्रं वर्जयित्वा अन्य
केंद्रे दिगीशे सति गच्छेत्। इदमग्रिमश्लोकेन वक्ष्यति। अथ दिक्पतौ ललाटगे सति तत्दिग्गमननिषेध॥ ॥ललाटगलक्षणं चाह। दिश्येन प्रव
वेल्लुलग्ने इनः प्राच्यां तनौ लाभगः स्यात्सप्त्वान्मदने ७ के जो बुग ४ बुधः सौम्यां खगो १० पाकुजः ऐश्यां द्वित्रि २।३। गतो गुरुर्ज्वलनदिश्याय व्ययस्थो
११।१२। भृगुर्वायौ षट्स्थ ६।५। गो विधुर्निऋतिदिश्यष्टांकसंस्थे ८।९ तमः॥ ८॥ दिक्पे ललाटगे सति न प्रवसेत्। प्रवासं न कुर्यात्। तनौ लग्ने वर्तमा
नइनः प्राक्प्राच्यां लाभगः ललाटः स्थितः स्यात्। मदने सप्तमे वर्तमानो र्कजः शनिः पश्चात्। अंबुगबुधश्चतुर्थगतो बुधः सौम्यामुत्तरस्यां। खंद
शमं तद्गतः कुजः अपाक् दक्षिणस्यां ललाटस्थितः स्यात्। द्वित्रिगतो गुरुः ऐश्यामीशान्यां ललाटगः। आयव्ययस्थो भृगुः ज्वलनदिश्याग्ने
य्यां ललाटगः। षट्स्थगतो विधुः वायौ वायव्यां ललाटगः। अष्टांकसंस्थे तमः राहुर्निऋतौ नैऋत्यदिशि ललाटगः स्यात्॥ ॥वक्री केंद्रगतस्तदी
यदिवसो लग्नेस्य वर्गोपि वा यातुर्नाशकरः शुभोपि न तु गो जन्मर्क्षलग्ने द्विरिपुः ईशः स्वं व्रजभाग्यभानि गुरुभं योस्तांत के सापि भं जन्मक्षी
णिरवेकुपूर्वभगः खेटस्तनो हानिकृत्॥ २॥ वक्रीग्रहः केंद्रगतः सन् यातुर्गमनकर्तुर्नाशकरः स्यात्। तदीयदिवसोपि वक्रीग्रहवारः यातुर्ना
शकरः [illegible] जन्मर्क्षलग्ने द्विरिपुः शुभोपि न तु गोयातुर्नाशकरः। जन्मराशि जन्मलग्नयोः ईशो तयोः रिपुः। अथ स्पष्टार्थान्नाज्जन्मनक्ष
त्राण्याह। द्वीशेति अर्कतः ग्रहाणां द्वीशादीनि जन्मनक्षत्राणि स्युः। द्वीशं विशाखा सूर्यस्य। अग्निः कृत्तिका चंद्रस्य। अंबु पूर्वा भौमस्य॥ ५६

२ लग्नेस्य वर्गोपि नाशकरः स्यात्।

अदितिभं पुनर्वसुः। एष्यः इंद्रिका। श्रवणधनिष्ठे रेवत्यश्विन्यौ पुनर्वसुपुष्यौ। एष्वित्यर्थः। पुनः के पुष्यमृगमैत्रार्कबुधै। मैत्रमनुराधा। अर्को हस्तः।
एषु नवनक्षत्रेषु प्रयाणं शुभमित्यर्थः। तत्र विशेषमाह। नो जन्मभे इति। जन्मनक्षत्रे श्रवणाद्यन्यतमेपि शुभं नो जगुः। अथ येषु अशुभं तान्या
ह। सार्पेति। सार्पं आश्लेषा। आर्द्रा। अग्निः कृत्तिका। यमो भरणी। अजैकपात् पूर्भा। पितरो मघा। त्र्यङ्कत्रये पि चित्रात्रये च एषु नवसु यानं अ
शुभं जगुः। अन्यानि नवनक्षत्राणि मध्यमानीत्यर्थः सिद्धं। अथ यासु तिथिषु अशुभं तदाह। रिक्तेति। रिक्ताः पर्वणि पूर्णिमामावास्ये। गुहः ष
ष्ठी। अष्टमी। हरिर्द्वादशी। सितास्यं शुक्लप्रतिपत्। एषु यानं अशुभं। अथोदन्यासु शुभं। अन्यत्तु दुष्टमाह। ज्ञेति। ज्ञो बुधः शुक्रस्तयोः उन्मुखं
सन्मुखं तु क्षपितिथि नक्षत्रादिषु यानं अशुभं। बुधशुक्रसन्मुखं न गंतव्यमित्यर्थः। अथ शूलान्याह॥ ॥प्राक् चंद्रासितशाक्रभं वसु
पराधात्संच मैज्यानपाक् पश्चात्कार्कसितानुदक् कुजबुधार्यम्णस्यं जेच्छूलकान्। त्रिंशाष्टो नवभूमयोग्निगिरिशा विश्वेषवोर्काब्धयः षट्
शक्रास्तिथि पर्वता दश दशोप्येतांस्तिथी नैशनः॥ २॥ प्राक्पूर्वस्यां दिशि चंद्रासितशाक्रभं त्यजेत्। असितः शनिवारः। शक्रभं ज्येष्ठा। त्यजेदि
ति सर्वत्र संबंधः। अपाक् दक्षिणस्यां वसुपराधात् धनिष्ठोत्तराधात् पंचनक्षत्राणि। ईज्यो गुरुवारः। एतान्। पश्चात्पश्चिमस्यां। कः रोहि
णी अर्कः रविवारः। सितः शुक्रकुजबुधार्यम्णः अर्यमोत्तराफल्गुनी। एतान् शूलकानुत्तरस्यां। शूलप्रदस्य प्रत्येकं संबंधः। ॥अथ
योगिनीराह। त्रिंशाष्टेति। एतान् प्रत्येकं पदगतान् तिथीन् ईशतः ईशान्यात् सकाशात् त्यजेत्। एते। के। त्रिंशाष्टौ। ३०।८। ईशान्यां। नवभू
मयः ९।१। प्राच्यां। अग्निगिरिशाः ३।११। आग्नेय्यां। विश्वेषवः १३।५। दक्षिणस्यां। अर्काब्धयः १२।४। नैऋत्यां। षट्शक्राः ६।१४
पश्चिमायां। तिथिपर्वताः १५।७। वायव्यां। दशदशः २।१२। उत्तरस्यां। अत्राकेन्यासु एव वध्याख्यान॥ अथान्यत्र नियमा
ह॥ ऐंद्र्यामग्निभ सप्त सप्तभगणे वायव्याग्निकाष्ठा स्थिता नो लंघ्यः परिघस्त्वपाग्नरुणभैः प्राच्येरुद्र[illegible] व्रजेत्। सर्वाशासु
वीज्यमित्रतुरगैर्यायाद्यथावश्यके हिताश्च लग्ने निष्टभैर्यदि निजाशेष्टांगलाभैर्व्रजेत्॥ ३॥ ऐंद्र्यादिषु दिक्षु अग्निभात् कृत्तिकायाः सकाशात् सप्तसप्त

मु॰ मार्त॰ टी॰ नीत्यर्थः। अन्यस्थानगताः उक्तेभ्योन्यस्थानगताः संतः तद्राजयात्रार्थकृतवशाः स्युः। तदा कदाचेत्पुरोकं स्याज्ज्यं नस्यात्॥ ॥अथप्रतिबुध
५७ कृत्कापवादमाह। स्वग्रामेकपुरात्मसद्मकृत चतुर्वक्त्रे चतुःशालकेतूद्वाहे नवधूप्रवेशनृपभीदुर्भिक्षपीडासुच। तीर्थस्वामिनीदेशयोर्भृगु
वसिष्ठात्र्यंगिरःकश्यपेभारद्वाजवात्स्ययोर्हितकरंयानंसितज्ञोन्मुखं॥१२॥ स्वग्रामः। एकपुरं। आत्मसद्मं आत्मगृहं। चतुर्वक्त्रे चतुर्मुखे। चतुःशालकंग
हं। उद्वाहः विवाहः ब्राह्म्यादयः। तेषुवधूप्रवेशः। नववधूप्रवेशः। नृपभीः राजभयं। दुर्भिक्षंपीडाः तासु। तीर्थस्वामिनि देशयोः। तीर्थंतीर्थगमनं। स्वामि
निदेशः स्वाम्याज्ञा। तयोः। भृगुवसिष्ठात्र्यंगिरः कश्यपेभृग्वादिगोत्रसमूहे। भारद्वाजवात्स्ययोः गोत्रयोः एषूक्तेषु सितज्ञोन्मुखंशुक्रबुधसंमुखंयानं
गमनं हितकरं स्यात्। अत्रवधूप्रवेशंप्रतिप्रतिशुक्रदोषोनोक्तः। नतु भर्त्रा सहगमनविषयं। भर्त्रा विनागमने दोषोदृश्यते। नवोढायास्तुवंध्यत्वंयद्युक्तंसंमुखेभृगौ। तदत्रविबुधैर्ज्ञेयं केवलं
नवीमपराक्रमे। स्वामिनानीयमानायां प्रतिशुक्रोन विद्यतइति। तथा वचनांतरं। नवोढायास्तुवंध्यत्वंयद्युक्तंसंमुखेभृगौ। तदत्रविबुधैर्ज्ञेयं केवलं
हिद्विरागमनेइति। तथा वल्लभः। स्वश्रुवनपुरप्रवेशे देशानां विग्रहे तथोद्वाहे। नववध्वागृहगमने प्रतिशुक्रविचारणानास्तीति। तथाचमत्स्यपुराणे
। चतुःशालं चतुर्द्वारं [illegible] देः सर्वतोयुतं। नाम्नातत्सर्वतोभद्रं नतत्रप्रतिशुक्रतेति। तथाचवसिष्ठः। काश्यपेषुवसिष्ठेषुभृग्वत्र्यंगिरसेषुच।
भारद्वाजेषुवात्स्येषुप्रतिशुक्रोनविद्यतइति॥ ॥अथान्यचापवादमाह। चंद्रेपूषभमेषगेसतिसितोंधः स्यात्तदासन्मुखंयानंसत्सुरपूर्वयोः
सितविपर्यासात्तदावश्यके। राजा तर्पितवह्निभूसुरसहृत्स्नेहानुरक्तिं त्यजन् तृप्तः कायमनात्रजेत्रिदिवसे रेकाब्धिषट्१४।६। क्रोशकान्॥१३॥
चंद्रेपूषभमे [illegible] षगेसतिसितः शुक्रः अंधः स्यात्। तदा तस्मिन्काले सन्मुखंयानं सत्शुभं स्यात्। तथा गर्गः। पौष्ण्यादिवह्निभार्द्धं यावत्तिष्ठति चं
द्रमाः। तावदंधो भवेच्छुक्रः प्रवेशे निर्गमेशुभइति। अथावश्यकेप्रवृत्तिमाह। परपूर्वयोरिति। पश्चिमपूर्वयोः सितविपर्यासात् आवश्यके सतियानं श्यके ५
सत्स्यात्। एतदुक्तं भवति। शुक्रे पूर्वकपालगते सति पश्चिमांगछेत्। पश्चिमकपालेगते सति पूर्वां गच्छेत्। तथा च ज्योतिः प्रकाशे। अत्युत्सुकेषुयात्रा
स्तो॰ ३ [illegible]कपालैर्भृगुर्भवेत्। तावत्साशिदिशंगछेत्राचीं प्रत्यक् स्थितस्तथेति। अथप्रयाणविधिमाह। राजेति। राजात्रिदिवसैः एकाब्धिषट् क्रोशका
नव्रजेत्। एतदुक्तं भवति। प्रथमदिवसे क्रोशंगछेत्। द्वितीयेचतुः क्रोशान्। तृतीये षट्क्रोशान्। अर्थात्सरतोयथेछंगछेत्। कथंभूतोराजा।
तर्पितवह्निभूसुरसुहृत्। वह्निः अग्निः भूसुराः ब्राह्मणाः सुहृदोबांधवाः। तर्पिता वह्निभूसुरसुहृदो येन सः तथा। अत्रायंभावः। समिच्चरुतिला ५७

दिनावह्निंदक्षिणान्नादिभिर्भूमिसुरान्वस्त्रालंकारादिभिः सुहृदः कलत्रादीन्तर्पयित्वाव्रजेदिति। किंकुर्वन् स्नेहानुरक्तिं त्यजन्तंतं। स्नेहेन अनुरक्तिः पुन
र्गृहागमनं। अयंभावः। यात्रार्थंबहिर्गत्वा पुत्रादिस्नेहवशात्तत्रवलोकनार्थं गृहंनागछेदितिपुनः कथंभूतः तृप्तः बुभुक्षितोनगछेदितिभावः। पुनः
कथंभूतः कायमनाः। कार्यायउत्कंठितांतःकरणः। तथाचरत्नावल्यां। स्वनिकेतान्सुरभवात्प्रधानादाश्रयाद्गुरुगृहाद्वापि। यायात्ल्ताग्निकार्यः प्रा
प्य हविष्यं द्विजानुमतमिति। तथाचबृहस्पतिः। देवज्ञंपूजयित्वातुविदुषंपूज्यशक्तितः। प्रदक्षिणमिमान्कृत्वा तिष्ठंध्यायेदुमापतिमिति। तथाज्यो
तिःप्रकाशे। संतोष्यस्वांगनांविप्रान् ज्ञात्वाप्रतिरथादिकं। कृत्वा शुक्लांबरोष्णीषौ मौनस्तुष्टःस्वमनाव्रजेदिति। तथा कश्यपः। यात्रासमये स्वस्थानपुर
गेप्यहणस्यवेश्मनि। गोभूहिरण्यवस्त्रैः संपूज्यश्रद्धयाचदेवज्ञमिति। वृहद्यात्रायां। स्नातोभुक्तोनुलिप्तश्चसर्वालंकारभूषितः। शुक्लांबरधरः
श्रीमान्ध्वगः सुतमेधत इति। भूपालवल्लभे। ब्राह्मणान्नावमन्येतकोपयेन्नवनिजांगनां। यात्रां कृत्वागृहंनैवसिद्धिकामोविशेद्गृहे मिति। उल्लू
यात्रायांप्रस्थितोयश्चब्राह्मणान्नावमन्यते। तदंतंजीवितंतस्यनासौप्रतिनिवर्ततइति। वृहद्यात्रायां। यस्तुसंप्रस्थितोयात्रांस्वभार्यां नाभिनंदति
भार्यायोनाभिनंदेतनास्यप्रतिनिवर्तनमिति। तथाचरत्नावल्यां। क्रोशं वाप्यर्धं प्रथमेहनिशस्यते। द्वितीयेयोजनं गत्वानिवसेत्तम
हीपतिः। तृतीयेयोजनंसार्धंवसेदाक्रम्यदूरतः। ततः परं यथेछंतुयायान्मार्गंमहीश्वरइति॥ ॥अथयात्रकस्यनियमानाह। क्रोध
क्षौररतिश्रमामिषगुडघृताश्रुदुग्धासवक्षाराभ्यंगभयासितांबरवमीतैलंकटूडुंबरं द्रुमे। क्षीरक्षौररतीः क्रमात्त्रिशरसप्ताहं ३।५।७। परंतद्दि
नेरोगंस्यात्तवकंसितान्यतिलकंप्रस्थानकेपीतिच॥१४॥ क्रोधं। क्षौरं। रतिर्मैथुनं। श्रमः। आमिषंमांसं। गुडः। द्यूतं द्यूतमरणं। अश्रु अश्रुमो
क्षणं। दुग्धं। आसवंमद्यं। क्षारंक्षारधान्यं माषादि। अभ्यंगंतैलाभ्यंगं। भयंशंकितरिपुभयमित्यर्थः। असितांबराणि अशुभवस्त्राणि कृष्ण
रक्तादीनि वमिर्वमनं। तैलं। कटूमरीचादि इत्यादिकं गमनेउज्झेत्। अथउक्तेषु किं किं कतिदिनं त्यजेदित्याह। क्षीरेति। क्षीरं। क्षौरं रतिं क्र
धं मात्। त्रिशरसप्ताहं त्यजेत्। क्षीरंदुग्धं त्र्यहं। क्षौरंशराहं पंचाहं। रतिंसप्ताहंत्यजेदित्यर्थः। परंतद्दिनेतु [illegible] नेप्रयाणदिनेत्यजेत्। रोगंव्याधिं द्वि
यावद्वा [illegible] त्यजेत्। स्यात्तवकं बीजरानपर्यंतं। सितान्यतिलकं श्वेतव्यतिरिक्ततिलकं। पीतकौसुमादि तद्दिनेत्यजेत्। प्रस्थानकेपित्यजेत्। प्रस्थान

मु०भा०टी० कंनाममुहूर्तसंयोगेऽपि विरभीष्टवस्तुचालनं। तदुक्तं रत्नमालायां। छत्रायुधाद्यं मनसस्त्वभीष्टं प्रचालयेद्वै जयिकं जयार्थीति। एतत्तु कार्यवशात्कि
५८ यते प्रस्थाने संपूर्णफलं नास्ति। तथा रत्नकोशे। कार्यवशात्स्वयंगमने भूभर्तुः केचिदाचार्याः। छत्रायुधाद्यभीष्टं वै जयिकं निर्गमे कुर्युरिति। न
थाचगर्गः। स्वशरीरेण यः कश्चिन्निर्गंतुं न शक्नुयान्वितः। तस्य यात्राफलं सर्वसंपूर्णं पार्थिव सिध्यतीति। न त्वालनाविधिर्ग्रंथांतरात्।
गृहाद्गृहांतरं गच्छेदाहसीमांतरं भृगुः। शरक्षेपाद्वरं द्वा जो वसिष्ठो नगराद्बहिरिति। एवं प्रस्थाने कृतेऽपि स्वयमन्यस्मिंस्तु दिने गच्छेत्। तथा च
ज्योतिःप्रकाशे। प्रस्थानेऽपि कृते यायान्महादोषान्विते दिने। गर्भयोगं विना कालं दृष्ट्वा दोषावस्तुतथेति। रत्नमालायां। वसेन्नचैकत्र दशास्तितीशो
ऽरिनानि नोसप्तवमंडलीकः। पः प्राकृतः सोऽपि न पंचरात्रं भद्रेण यात्रापरतः प्रयोज्येति। एवंविधे प्रस्थानेऽपि क्रोधक्षौररत्यादीन्वर्जयेदित्यर्थः।
गर्गः। क्रोधं क्षौरं तथा वांतं तैलाभ्यंगाश्रुमोक्षणं। द्यूतं मांसं गुडं तैलं यानेमद्यं परित्यजेदिति। रत्नकोशे। कालीयकं हिंगुलकं कुंकुमं रक्तचंद
नं। पीतरक्तं च वसनं यातुर्नेष्टा च लक्षणादिति। बृहद्यात्रायां। कटुतैलं गुडं क्षारपक्वमांसाशनं तथा। भुक्त्वा यो याति मोहनव्याधितः स निवर्त
न तइति। लल्लः। श्रमतो व्याधितो भीतः श्रांतः शुष्को बुभुक्षितः। अध्वानं प्रपद्येत क्लीबं सप्तस्तथैव च। रत्नावल्यां। स्वकीयां परकीयां वा स्त्रियं
पुरुषमेव वा। ताडयित्वा तु योगच्छेत्तदंतं तस्य नीवतमिति। भृगुः। निरात्रं वर्जयेत्क्षीरं पंचाहं क्षौरकर्म च। तदहश्चावरोषाणि सप्ताहं मैथुनं त्य
जेत्। यात्रायां गमनलक्षणं गर्गोक्तं ज्ञेयं। मुहूर्ते समये प्राप्ते हंसवारां घ्रिणा व्रजेत्। देवज्ञामात्यविप्राद्यपुरोगैः स्वजनैर्वृतः। पूर्वदक्षिणमु
द्रस्य पादमात्रं नराधिपः। द्वात्रिंशत्पदं गत्वा यानमारुह्य संव्रजेत्। ततो निरीक्षयेत्सम्यक् शकुनांश्च शुभाशुभान्। तथैव सदसच्छब्दानुनि
मितानि वसन्व्रजेदिति॥ ॥ इदानीं शकुनानाह। वस्त्रालंकरणानि पूर्णकलशस्तोयध्वनिः पुत्रवान् शंखादर्शनृपाश्वदंतिसुरभिस्त्रीपु
ष्पधान्यादि च। दोलादीपविधूमवह्निकरभिद्रव्याणि शुभ्रोक्षवेश्याछत्रवितानवामकुमार्यो मीनगोरोचने॥१८॥ वस्त्राणि श्वेतवस्त्रा
णि। अन्यान्यपशकुनमध्ये पठितानि। अलंकरणानि स्वर्णनिर्मितानि। पूर्णकलशः। तोयध्वनिर्वाद्यध्वनिः। पुत्रवान्वर्धमानः पुरुषः। शंखः ५८
आदर्शो मुकुरः। नृपो राजन्यः। अश्वः। दंती हस्ती। सुरभिर्गौः। स्त्री सौभाग्यवती। पुष्पाणि श्वेतानि। धान्यान्यक्षतानि। कृष्णानीत्यपशकुनमध्ये। आदि

अजः श्रवणो बुधस्य। भाग्यसं पूफा गुरोः। गुरुः पुष्यः शुक्रस्य। पौष्णं रेवती शनेः। याम्यं भरणी राहोः। सार्पमाश्लेषा केतोः। यदीयसंयस्य
ग्रहस्यास्तं जन्मनक्षत्रं हतं त्रिधोया तदु तंस्याद्दसौ ग्रहो लग्नस्थितो हानिकृत्स्यात्॥ ॥ वेशिः सौम्ययुतः स्तनो जनुषि ये सद्
कौ युताराशयो जन्मा[...]पचयस्थिता ३।६।१०।११। अपि तनोः स्वर्क्षे च मित्रक्षेगाः। पापा अप्यतिशोभनास्तनुगता जन्मेश्वरोऽङ्गं द्
गोस्वारासन्नि तनोः शुभोनफलदोऽसित्राग्निपापोऽर्थदः॥१०॥ स्यर्याद्द्वितीयो राशिः वेशिः। ससौम्ययुतसन्। तनो अंगगो लग्नगोऽ
तिशोभनः स्यात्। जनुषिजन्मकाले सद्भिर्ग्रहैर्युताये राशयः तेत्तनुगताः अतिशोभनास्युः॥ जन्मा ओपचयस्थिताः। जन्मा ओप
न्मचंद्रः। तस्मादुपचयानि त्रिषडेकादशदशमानि ते सुस्थिता ग्रहास्ते तनुगता अतिशोभनाः। तनोरपि जन्मलग्नात् पितुपद्
यस्थालग्नगताः अतिशोभना स्युः। स्वर्क्षे च मित्रक्षेत्रगाः। जन्मनि ये स्वर्क्षगाः स्वर्गाः। मित्रक्षेगाः। ते पापा अपि तनुगा अतिशो
भनाः स्युः। जन्मेश्वरो जन्मराशिजन्मलग्नस्वामिनौ केंद्रगो अतिशोभनो स्यातां। स्वारात्सन्निस्वे वैरिवारे शुभः शफलग्रहः तनो लग्ने वर्तमानो
नफलदो भवति। मित्राग्निपापः तनो वर्तमानोऽर्थदः स्यात्। तथा च यवनः। रक्षकावर्धकश्चैवयेस्युर्जन्मनिनायकाः। तान्पापानपि निःशंको
यात्राकाले नियोजयेत्। इति॥ ॥ अथ यात्रालग्ने इष्टानिष्टांश्चाह। आयायेन्यगताः खलाः खइनजो ज्ञोत्याद्यषष्ठाष्टगो भूसुतोऽप
पितोऽस्तरवाबुस्कगेते शुक्रोस्तई ज्योमृतो। नष्टज्ञो व्ययगोग्रहान्वितशशी यातुर्महाविघ्नदा अन्यस्थानगता जयार्थसुखदास्स्या
ज्यंपुरोक्तं न चेत्॥११॥ आयार्थान्यगताः खलाः आयारिष्यः अन्यानि १।२।४।५।७।८।९।१०।१२ तत्रगताः खलाः पापग्रहाः। खे दशमे इनजः
शनिः। आयार्थान्यगताः खलाः इत्यनेनैव प्रसिद्धेऽपि विशेषदुष्टफलज्ञापनार्थं खइनजइत्युक्तं। अंत्याद्यषष्ठाष्टगो १२।१।६।८। ज्ञश्चंद्रः भूयःपु
नःसः चंद्रः अपि चितः क्षीणचंद्रः कृष्णपक्षे चंद्रः अस्तरवाबुस्कतगतः ७।१०।४।५। अस्ते ७ शुक्रः। ईज्योगुरुर्मृतौ ८। नष्टज्ञोऽस्तमितबुधोव्य
यगतः १२ ग्रहान्वितशशी। येनकेनापि ग्रहेण ग्रहाणां ग्रहैर्वा युक्तश्चंद्रमाः। एते प्रत्येकं यातुर्महाविघ्नदाः स्युः। नानाप्रकारेण भंगादीन्ददत

नरद्वामेप्रकुर्वन्व्रजेद्रस्मास्थीधनविट्तुषाश्मलवणोपानत्तृणायस्करा:।पिण्याकौषधकृष्णधान्यरुदनंतक्रंसधूमानल:कार्पासारुणपुष्पच
र्मवगुडस्तैलायसीकर्दम:।।१७।। एतत्अनंतरो कंसन्शुभंदक्षिणत: दक्षिणभागेकुर्वन्सन् इतरत अशुभंवक्ष्यमाणंवामेकुर्वन्सन्
व्रजेत।अथा०शकुनमाह।भस्मेति।भस्म।अस्थि।इंधनं।विट्विष्ठा।तुषधान्यादीनांत्वक्फल्गु।अश्मापाषाण:।लवणंसामुद्रिकं।उपानहौ।तृणं।अय
स्करोलोहकार:।पिण्याकंमर्दिततिला:।औषधं।कृष्णधान्यंमाषादि।रुदनंतक्रं।सधूमानल: धूमसहितोग्नि:।कार्पास:।अरुणपुष्पं।रक्तपुष्पं।
चर्म।गुडं।तैलं।अयसी।लोहकार:।कर्दम:।। ।।मत्तोवांतबुभुक्षितांतकस्खलमुंडीजटीव्याधित:खंजव्यंगदिगंबरायतिररि:काषायिमुक्त
लको।चौराभ्यक्तमलाविलाश्वपतित:पाश्यर्गली गुर्विणीबंध्याकृष्णस्वपाहिभेकसरटागोधावराह:शश:।।१८।। मत्त: उन्मत्त:।वांत:वमि
त:।बुभुक्षितोरंक:।अंतक:प्राणिहिंसक:।खलोदुर्जन:।मुंडीमुंडित:।जटीजटिल:।व्याधितोरोगी।खंज:पादहीन:।व्यंग:।अंगहीन:। शिर:
दिगंबरोनग्न:।यति:सन्यासी।अरि:वैरी।काषायी गैरि कलंजितवस्त्र:।मुक्तालकोमुक्तकेश:।चौर:।अभ्यक्तस्तैलाभ्यक्त:।मलाविलोमलि
न:।पतितोजातिभ्रष्ट:।पाशीप्राणिबंधनार्थंपाशवान्।अर्गलीअर्गलावान्।गुर्विणीसगर्भा।बंध्यानिरपत्या।कृष्णस्वप:।अहि:सर्प:।भेकोमं
डक:।शरट:।गोधा।पल्लीवराह:।शश:।। ।।जाहोत्सुमहिष: खरोष्ट्रमहिषारूढाश्वरिक्तोघट:छिक्काप्राणिशिरोंगकंपपदवीबंधा:कु
वागाहवो।पातोयानपलायनंस्वकलह:षंढक्षुतंगोज्वलद्दर्शनमिति प्रतिबंधका:कुशकुनाश्छिक्काधिकामृत्युदा:।।१९।।जाह:भंड
लीलोकेसेहलीतप्रसिद्ध:।जाहकोगात्रसंकोचीमंडली बबुधे:स्पष्टइतिहलायुध:।आतुमोजोर:।महिष:। खरोष्ट्रमहिषारूढा:।
रिक्तंघट:।छिक्काक्षुतं।प्राणिशिरोंगकंप:।प्राणिनांगो श्वश्वादीनांशिरोझाटनं अंगझाटनंवा।पदवीबंधोमार्गबंध:केर्णनाभादि
भिमार्गोबध्यते।कुवाककुत्सितवाकश्रवणं।आहव:संग्राम।विडालमहिषादीनां।पात:पतनं।वस्त्रादीनांस्खलनं।यानमश्वादित
स्यपलायनं।स्वकलह:स्वानांकलह:।षंढनपुंसकं।गो:क्षुतं।ज्वलद्देश्मज्वलद्गृहदर्शनं।इत्येतेअपशकुना:।प्रतिबंधका:कार्यप्र ५९

ति बंधका:स्यु:।छिक्कादिकाअपशकुना:मृत्युदा:स्यु:।तथोक्तं आगमांतरे।तृणतैलादिकार्पासभस्मचर्मतुषौषधी।सामुद्रंगुडपंकाहिम
तंवांतबुभुक्षितभिक्षादि।अथशकुनांतरमाह।। ।।भंगाल्युष्ट्रपठत्शुकाश्वनरखिन:स्त्रीसंज्ञकावामत:कालीकुक्कुटपुंप्रथाश्वसु
रभिर्दक्षेमनोभीष्टदा:।भारद्वाजशिखंडिचाषनकुलाहंसोजएतेदृशंयाताइष्टफलास्युरासभरवोवामेपिपृष्ठेर्थद:।।२०।।भंगोभ्रम
र:।अलिर्वृश्चिक:।उष्ट्र:।पठच्छुक:शब्दंकुर्वाणाराजभुक:।नरखिन:।श्वानादय:।स्त्रीसंज्ञका:।चीरिकादय:।एतेवामत:म
नोभीष्टदास्यु:।काली।महिषी।कुक्कुटश्च।पुंप्रथा:पुरुषसंज्ञका:।काकादय:।सुरभिर्गौ:।एतेदक्षिणेमनोभीष्टदास्यु:।भारद्वाज:
शिखंडीमयूर:।चाष:।नकुल:बभ्रु:।हंस:।अजोबस्त:।एतेभारद्वाजादय:।दृशंयाता:संत:इष्टफलदा:स्यु:।अयमर्थ:।भा
रद्वाजादयोवामेदक्षेवाग्रेवादृष्टमात्राइष्टफलदा:अभीष्टफलदाभवंतीति।रासभरवोगर्दभध्वनिर्वामेपृष्ठेपिअर्थद:अभीष्टार्थदो
भवति।। ।।अथयेषुयेषुकृत्येषुविपरीतशकुना:शुभास्तान्याह।नद्युत्तारभयप्रवेशसमरद्यूतेषुनष्टेक्षणेव्याधौस्यु:शुभदाविलो
मशकुनानाड्याइडार्योभरे।।आद्येदु:शकुनेनिरस्यचशुभविभूतान्धा।८ सायमंस्त्वियार्थपरेषि।१६वारमपरेद्दृताश्चवर्णेव्रजेत।।२१।।नद्युत्ता
रोनद्युत्तरणं।भयंनृपादीनां।प्रवेशोग्रामादे:।समर:संग्राम:।द्यूतंदेवानां।नष्टेक्षणंनष्टवस्तुनोऽवलोकनं।व्याधौरोगोपचारे।एषुविलोमशकु ते
नाविपरीतशकुना:शुभा:स्यु:।अयमर्थ:।गमनेयेअपशकुनास्तेनद्युत्तारादिषुशुभदाइति।तथाइडाख्याड्यांरिभेपूर्णतातेपिलोमशकुना: याम
शुभदा:स्यु:।तथाचवसंत:।रवौपिङ्गलायांपरिपूरितायांसर्वेपिवाम:[illegible]शन:प्रशस्त:।स्याक्लिंगलायांपरिपूरितायांसर्वेपसव्य:शकुन:प्रशस्त:।संगरण
९ कर्मणिचप्रवेशेशुभकुर्यादहर्निवेलोकनेच।व्याधौसरिद्दुर्गवनादिकेषुशस्त:प्रमाणाद्विपरीतभावइति।अन्यत्र।नद्युत्तारेभयेयुद्धेप्रवेशेनष्ट
वीक्षणे।शकुनाव्यस्तगा:शस्तान्नपालोकप्रयाणवदिति। अथप्रथमेअपशकुनेजातेसतिकर्त्तव्यमाह।आद्येइति।आद्ये प्रथमेदु:शकुनेजातेसति

निवृत्तनिवर्तनं कृत्वा तत्र शुचौ देशे उपविश्य कृतचिः प्रक्षालितपाणिपादः आचांतः कृताचमनः असवः प्राणास्तेषां आयामः प्राणायामः। अष्टधा अष्टवारं
कृत्वा इष्टं यात् गच्छेत्। चेत्पुनः दुःशकुनः स्यात्तदा निवृत्य कृतचिः आचांतोष्टवारं षोडशवारं असून् नियम्य यात्। अपरे तृतीये दुःशकुने जाते सति
सुवर्णं दत्वा गच्छेत्। एतदावश्यके गमनविषयं। प्राणायामानधिकारी तावत्कालं स्थित्वा गच्छेत्। तथा च ज्योतिर्निबंधे। विरुद्धे शकुने पूर्णप्राणायामाष्टकं
चरेत्। द्वितीये द्विगुणान् कुर्यात् तृतीये न व्रजेत् क्वचिदिति। तथा च वसंतराजः। जाते विरुद्धे शकुनेऽप्यभीतो द्विजाचनिं कृत्वा करपादशौचं। आचम्य स
क्षीरतरोरधस्तात्तिष्ठन्स्वपृष्ठे कुर्वां नराणीति। तथा च आर्ष्टिषेणिः। यद्यपशकुनं परस्य द्विपरीतमुपस्थितः। स पूतं कांचनं दत्वा निर्विशंकः स्वं व्रजेदिति
॥ ॥इतिश्रीमुहूर्तमार्तंडटीकायां मार्तंडवल्लभायां यात्राप्रकरणं॥ ॥अथ मिश्रप्रकरणं विवक्षुस्तावद्राजाभिषेकमाह॥ ॐ ॥ ॥
जन्मांगर्क्षदशेशसद्ग्रहकुजैः सार्कैर्बलिष्ठैर्मृदुक्षिप्रेंद्रध्रुवभैः स्थिरर्धिन्नतनौ व्याराह्नि भूपस्थितिः। स्वस्वर्क्षैः समृदुध्रुवर्क्षचरभैः क्षिप्रैः स्व
५ रस्थापनं प्रोचुर्मोघयुगे नरोयुगले व्यारेह्नि पूर्वाह्णिके॥१॥ जन्मांगर्क्षदशेशादिभिः बलिष्ठैः तथा मृदुक्षिप्रैः। स्थिरर्धिन्नतनौ व्याराह्नि भूपस्थि
तिः शस्तास्यादित्यध्याहारः। अंगं च ऋक्षं च अंगर्क्षे। जन्मनि अंगर्क्षे जन्मांगर्क्षे। जन्मलग्नजन्मराशी ते च। दशानजन्मांगर्क्षदशाः दशाव
र्तमाना। तासां ईशाः जन्मांगर्क्षदशेशाः सद्ग्रहकुजश्च सार्काः तैस्तथा। तैर्बलिष्ठैः स्थानादिबलसमन्वितैः। मृदुक्षिप्रेंद्रध्रुवभैः। स्पष्टं। स्थि
रर्धिन्नतनौ ऋद्धिगतान्नतनुः स्थिरा चासौ ऋद्धिन्नतनुश्च सा तथा तस्यां। जन्मराशिजन्मल... ग्नाभ्यामष्टमोपचयतनौ लग्ने व्याराह्नि॥ २
भौमरहितदिने। भूपस्थितिः। राजप्रतिष्ठा शस्ता भास्यादित्यर्थः। लग्नबलं प्राग्वत्। प्रायश्चेंद्रमित्रादिवत् लोकनीयं। अथ देवस्थापनमाह। स्वस्वर्क्षै
रिति। स्वस्वर्क्षैः यस्य देवस्य प्रतिष्ठा क्रियते तस्य नक्षत्रैः शेषं स्पष्टं। लग्नबलं प्राग्वत्॥ ॥अथ वस्त्रपरिधानं तस्य क्षालनं तुंदुरादिभक्षि
तफलं चाह। धार्यं वस्त्रदितिनपंचक ५ गुरुभ्यां श्च ध्रुवे ध्रुवे तत्र येज्ञो नेक्षात्यमिहाम्बुभुक्षितमसन्मध्यात्रिभगैर्वरं। स्त्रीरक्तांबरभूषणे त्र
विभ्याद्यादित्यपुष्यध्रुवैः श्वेतोक्षोरुणरुक्ममयोः कुजरवौ लिंदूराणिः शस्यते॥२॥ वसुधनिष्ठा। अदितिः पुनर्वसुः। इनपंचहस्तपंचकं॥ ६०

ऋत्विन्नतनुः ५

उल्लोलपटः

शब्देन सुवर्णादिधातवः। शैलाः प्रसिद्धाः। दीपः। विधूमवह्निः। धूमरहितोऽग्निः। सुरभिद्रव्याणि सुगंधद्रव्याणि कर्पूरचंदनादीनि। स्त्रीत्रोवृषः। श्वेतवृषभः
वेश्या पण्यस्त्री। छत्रं प्रसिद्धं। वितानं श्वेतं द्रवतं। चामरं। कुमारी। मीनामत्स्याजलादुद्धृताः। गोरोचनं॥ ॥अथ संकोचेनाह॥ यद्यत्स्वांत
नितांततोषकरणं कोरुद्धृतं गोमयं स्वांभोर्थं घटान्वितः सहचरो धौतांबरो मौत्रकः। दूर्वा दर्भरथाः पलाक्रमदिरावर्णी गुरुर्दैवविद्वि प्रो मित्रं मृगा
वरोदनवैरो सिद्धार्थं दुग्धादि च॥१६॥ यद्यत्स्वांतनितांततोषकरणस्य। स्वीनं अंतःकरणं तस्य नितांतं अतिशयितं तोषकरणं संतोषजनकं। तत्तत्सं
बहुनोक्तेन। एवं संकोचेनो केदानीं येषु संतोषासंतोषाभावः। पूर्वाचार्यैः शकुनमध्ये पठितानि तान्याह। कोरुद्धृतं गोमयं। कोः पृथिव्याः उ
द्धृतं गोमयं। मस्त्रा। पृथिव्या उद्धृता। अंभोर्थं घटान्वितः सहचरः। उदकार्थं कुंभयुक्तो जनः सनसहरीतीति सहचरः जलार्थी। रिक्तकुंभस्तु प
थिकेन सह न व्रजेत्। निवर्तनं यथा पूर्णः कृतार्थः। पथिकस्तस्थैव स्यात्। धौतांबरो मौत्रकः। धूतवस्त्रो रजकः। दूर्वा। दर्भाः। पूर्वादर्भो। रथि अपि शुभे
। अपशकुनमध्ये यत्तृणं पठितं तदेतद्व्यतिरिक्तं। रथः। पलं मांसं। अस्त्रं रक्तं। मदिरा मद्यं। वर्णी ब्रह्मचारी। गुरुः। दैवविज्ज्योतिषी। विप्रो द्वौ ब्राह्मणौ
। मित्रं इष्टः। मृगः। अरोदनरावरोदनवर्जितं प्रेतं। सिद्धार्थाः गौरसर्षपाः। दुग्धादि दुग्धदध्याज्यं। ननु यद्यत्स्वांतनितांततोषकरणं इत्यनेनदु
ग्धं कृष्णता सिद्धं। पुनः किमुक्तं। दुग्धमिति सत्यं। दुग्धभक्षणं निषेधितं तत्संदेहो निरस्तः दुग्धपठनं नास्ति दोषः। एवमेवमन्यत्राविचा
णीयं। तथा च वसंतः। दध्यात्पदूर्वाक्षितपूर्णकुंभसिद्धान्नसिद्धार्थकचंदनानि। आदर्शशंखामिषमीनमधा गोरोचनागोमयमधुघृतक्षौ
रिति। भरद्वाजः। राजा विप्रो सुहृद्वेश्या सपुत्रा स्त्री कुमारिका। अभिरूपा नरस्त्री वा गजा वाजी वृषः सुतः। रक्ता च फलान्यन्नवर्णो गो सवु
त्साच विशेषतः। उद्धृतं गोमयं मीनं मृत्तिका चोद्धृता तथा। रजको धौतवस्त्रश्च वेश्या नीयांत्रिकस्य निः। जयमंगलशब्दाश्च
चामरं शांतिपाठः प्रदीपकः। दीपो वा प्रज्वलद्वह्निः पूर्णकुंभनृपासवं। मद्यं मांसं च रुधिरं भक्ष्याणि विविधानि च। दृष्टो मधु तांबूलं वस्त्रालंकरणानि च। वीणांता
म्रमणिं स्वर्णं द्रव्यं दर्पणमक्षता। वितानं चारु छत्रं च दूर्वा वधोपनं द्विजः। चंदनानि सुगंधीनि तथा पुष्पाणि रोचना। घृतं दधिपयः पेयासि
द्धमंनं वचः शुभाः। देवज्ञः सुगुरुर्देवश्चितो हास्यकराणि च। दृष्ट्वैतानि नरो यायात्सर्वार्थान् लभते तु सहेति॥ ॥कुर्वन्दक्षिणतः संदेवादि

मु०मा०टी० वस्त्रादिनीलत्रो के अगे अंगे स्थिरलग्ने २।५।८।११॥ नुः नरस्य अलंकृति अलंकरणं हितं स्यात्। किंलक्षणे: वस्त्रोक्तैः व्यानिलद्वयाश्विभिः अ
६१ निलद्वयं स्वातीद्वयं। स्वाती विशाखे। अश्विनी विगता अनिलद्वयाश्विन्यो येभ्यस्तानि तथा। स्वातिविशाखवारहितैरित्यर्थः। अथ विशेषमा
ह। विप्राज्ञेति। विप्राज्ञा ब्राह्मणाज्ञा। उत्सवो विवाहादिकः लब्धि लोभः। आस्कुरत्स्व अनुक्तेपि भादौ धारणं वस्त्रादिधारणं इष्टं स्यात्।
तथा चोक्तं व्यासेन। ऊर्ध्वं राजप्रसादेन विप्रादेशात्करग्रहे। प्रीत्यादत्ते तु सर्ववस्त्रं धार्यं निंद्येपि भादिकइति। अथ पिण्यानां क्रयविक्रय
माह। मित्रेति। मैत्रं अनुराधा। शेषं सुगमं। घटः कुंभः तस्मात् परमंन्यतमं तत् चूतं तत् ऋध्यंगं च ऋध्यंगं तु पचयलग्नं तस्मिन् कुंभव्यतिरिक्तो
गी६ पचयलग्ने पण्यानां पूगफलखर्जुरादीनां क्रयविक्रयो न तनुविस्तारयकुर्वीत्यर्थः। कस्यांसत्यां। स्वशत्रुधौसत्यां। स्वधनभावेः तस्य शुद्धिः
पापरहितत्वं। शेषं प्राग्वत्। तथा चोक्तं। दशमैकादशे लग्ने वित्तकेंद्रत्रिकोणगेः। शुभैः पुण्य … स्य कर्मोक्तं वर्जयित्वा घटोदयमिति॥ ॥अ
थधनिष्ठापंचकेवर्ज्यमाह। प्रेतज्वालनशय्यकावितनने स्तंभोच्छ्रितं याम्यदिग्यानं काष्ठतृणोच्चयं परिहरेत्कुंभद्वयस्थे विधौ। सेवेष्टा ध्रुववा
रुणांत्यवसुभैः स्वायै १०।११। रवौ वा कुजे सन्यासा स्थिरभे खगे गतबलेः षष्ठान्त्यगे ६।१२। भार्गवे॥ ५॥ प्रेतज्वालनेत्यादि। कुंभद्वयस्थेवि
धौ सति कुंभमीनयोः चंद्रे सति परिहरेत् सर्वथा न कारयेत्। अथ सेवामाह। सेवेति। ध्रुवादिभिर्नक्षत्रैः सेवा इष्टा स्यात्। सुगमं। कस्मिन्स
ति। स्वाये रवौ वा सति वा अथवा कुजे सति स्वं दशमं। आय एकादश। अ…ने योरन्यतमे रविभौमयोः अन्यतमे सतीत्यर्थः। यस्मिन्ल
ग्ने सेवा क्रियते तस्माल्लग्नात् दशमे एकादशे च रवौ भौमे वा सति सेवा इष्टा हितकारी स्यादित्यर्थः। अथ सन्यासमाह। सन्यास इति। स्थिरभेस्थि
रनक्षत्रे स्थिरलग्ने च सन्यासः इष्टः स्यात्। केः खगे गतबलेः पापग्रहे हीनबले इत्यर्थः। सप्तम्यर्थे तृतीया। कस्मिन्सति भार्गवे शुक्रे षष्ठान्त्य
गे सति। लग्नबलं प्राग्वत्। उक्तं च। त्रिषडेकादशे सौरिर्व्यये षष्ठे च भार्गवः। सबले धर्मपे जीवे केंद्रे दीक्षा विरक्तिकृदिति॥ ॥अथव ६३
धिकमाह। उद्वाहर्क्षचरद्विपेंद्रलघुभैस्त्वाष्ट्रे शुभास्यात्कृषिर्व्योर्किज्ञारखगाद्रियुग्मझषगोकन्याविलग्ने तिथौ। व्यंकोजे सदिशि १।३।५।७।११।
१३।१५।३०।

प्रणम्य खगप्रमुखान्सिताच्छादनः स्वर्णोद्धृष्टहलं समुष्कवृषभैः सोमीं पटुस्त्रिर्नयेत्॥ ५॥ उद्वाहर्क्षाणि पूर्वोक्तानि मूलांत्यार्केंद्रा सा
णि एकादशसंख्यानि चराणि च द्विपं विशाखा। ऐंद्रो ज्येष्ठा। लघुभानि च। त्वाष्ट्रे चित्रा तैः। व्योर्किज्ञारखगाद्रि। आर्किः शनिः। ज्ञो बुधः। आरः
भौमः। विगताः आर्किज्ञारा येभ्यस्ते तथा। ते च ते खगाश्च तेषां अहः दिनं तस्मिन् शनिबुधरहितवारे इत्यर्थः। युग्मझषगोकन्याविलग्ने
। युग्मं मिथुनं। झषो मीनः। गोर्वृषः। कन्या। एषामन्यतमे विलग्ने। तिथौ व्यंकोजे। विगताः अंकः नवमी यस्मात्सो व्यंकः। स चासौ ओजश्च
। ओजो विषमस्तस्मिन् नवमीव्यतिरिक्तविषमतिथावित्यर्थः। किंलक्षणे व्यंकौजे तिथौ सदिशि। दिक् दशमी तया सह वर्तमाने। कृषिः
शुभा स्यात्। तथा चोक्तं। चंद्रे स्थुभे शुभतिथौ सुभवारयोगवारे गुरौ शशिजशुक्रगभास्तिवारे। लग्ने वृषे मिथुनके झषकन्यकायां श
स्तं कृषिप्रकरणं प्रवदेनिधानइति। अन्यच्च। दशम्येकादशी चैव तृतीया च त्रयोदशी। सप्तमी पंचमी चैव प्रतिपच्च शुभावहा। हंत्यष्टमी ब
लीवर्द्दान् नवमी सस्यघातिनी। चतुर्थी कीटजननी पतिं हंति चतुर्दशी। रवौ बृहस्पतौ चंद्रे शुक्रे कुर्यात् … शेषतः। बुधार्किभूमिपुत्राश्च न
भवंति फलप्रदा इति। अथ विधिमाह। सिताच्छादनः श्वेतवस्त्रधरः। पटुकुशलः कर्षक खगप्रमुखान्देवान्। कुलोरं भेषूत्रोक्तः सीतायज्ञः
क्रियते। तत्र पूजितान् खगमुख्यान् गृहभस्य गमाद्रिप्रदक्षिणापूर्वकं प्रणम्य। मनोवाक्कायकर्मभिर्नमस्कृत्वा। स्वर्णोद्धृष्टहलं सुवर्णेन
घृष्टाग्रं हलं समुष्कवृषभैः मुष्काः वृषणास्तैः सहवर्तमानाः समुष्काः शोभनास्तथा तैः हलं सोमीं उत्तरां दिशं प्रति त्रिवारं नयेत्। हलेन
पद्धतीं कुर्यादिति भावः। उत्तरादिशं प्रति त्रिवारनयनेन पंचरेखा उत्पद्यंते। तद्यथा। प्रथमगमनेनैका आवर्तनेन द्वितीया। पुनरुत्तराप्रति
तृतीयगमनेन पंचमीरेखा उत्पद्यते। अधिकानकार्या इति भावः। सोमीं पटुस्त्रिर्नयेदित्यत्र पटुपदग्रहणं अखंडऋजुरेखाकरणार्थं। तथा चो
क्तं। शस्ताः कचंद्रताराश्च शुचिः शुक्लेन वाससा। स्नात्वा गंधैश्च पुष्पैश्च संपूजयित्वा विशेषतः। पृथिवीं गृहसंयुक्तां पूजयित्वा प्रजापतिं।
अग्निं प्रदक्षिणीकृत्य दातव्या चैव दक्षिणा। हले वृषौ नियोक्तव्यौ नवीनौ सुयुतौ नवा। हेमघृष्टहलाग्रेण अछिन्नरेखान कारयेत्। उत्तराभि
मुखो भूत्वा सीरेणार्घ्यं प्रदापयेत्। विबलं छिन्नलांगूलं पंककपिलं वृषभं त्यजेत्। हलप्रवाहनं कार्यं न कृष्णे वृषके कृषके। हलादिभिर्देहेः क्षेमं

मु॰ मा॰ टी॰
६२

कुद्देरक्षभंभवेत्। रथभार्यादिशल्योयुत्तस्यांविघ्नंसदाभवेत्। तस्यसर्वप्रकारेणनिर्विघ्नंकारयेत्तदा। एकाजयकरीरेखात्तृतीयाचार्थसिद्धिदा।
पंचमीचभवेद्रेखाबहुसस्यफलप्रदा। अतऊर्ध्वंनकर्तव्यामहादोषस्ततोभवेत्। मर्तव्यासवः शुक्रः पृथुनामासचंद्रमाः। पराशरोहलीचैवसर्व
विघ्नोपशांतयइति। अत्रदुर्निमित्तानितंत्रेचोक्तानि। हलेप्रवाह्यमानेतुकर्मउत्पद्यतेयदि। गृहिणोमृतयेतस्यततोरोगश्चभूयंभवेत्। ईषा
भंगोयदाकष्टःसंशयोजीवितस्यच। सुतनाशोयुगेभग्नेसमानेभ्रियतेकः शिं। योकुद्देतुव्यासंगःहस्यहानिश्चजायते। हलेप्रवा[illegible]समाने
युगेरेकः प्रपतेयदि। प्रपतेद्धूक्मात्रस्तुबंधनंचभयच्छति। जरातिसाररोगेणकृषिभंगविनिर्दिशेत्। प्रवहेल्कमेमात्रस्तुततोगोः खनतेय
दि। नहेनयुक्तमात्रस्तुतदासस्यंचतुर्गुणमिति॥ ॥अथकृषिविषयेलांगलचक्रमाह। त्रित्रित्रीषनलार्थे[illegible]रामहुनभुक्। ३।३।
३।५।३।५।३।३। भेषकेभुक्तादसत्सद्वयः कृषिभेविवारुणहरीन्द्रैर्बीजवापः शुभः। सूर्यर्क्षादित्रतीमती ३।४।५।६।७।८।९।१०। निधृति
त१९।२०।२१।२२।२३।२४।२५।२६। भ्वाष्टाष्टभैः सत्सल। प्रोक्तोन्येः फणिसप्तमाद्द्रविभितेस्तच्छेदनंवापभैः॥६॥ अर्केभुक्तात्तृयेभु
क्तान्नक्षत्रात्सकाशात्त्रिष्वादिषुषट्छानाष्टकक्षितिषुनक्षत्रेषुअसत्सत्तद्दूत्येननफलद्वयंभूयः वारंवारंस्यात्। एतदुक्तंभवति। सू
र्याक्रांतनक्षत्रस्यआदिमान्नक्षत्रात्सकाशात्त्रिषुअसत्दुष्टफलं। तदनंतरंत्रिषुशुभफलं। ततस्त्रिषुअशुभं। ततः पुनः पुनस्त्रिषुशुभं
स्यादित्यर्थः। अथ बीजोप्तिमाह। कृषिभैरिति। कृषिनक्षत्रैः उद्गाहसंयुतैः द्विपेस्यादिभिः बीजवापः शुभः प्रोक्तः। किंलक्षणैः विवारुणहरीन्द्रैः
वारुणंशततारका। हरिः श्रवणः। इंद्रो ज्येष्ठा। विगतावारुणहरीन्द्रायेभ्यस्तानितथा। शततारकाश्रवणधनिष्ठारहितैरित्यर्थः। कृषिभैरित्यु
पलक्षणं। तस्मात्कृष्युक्तंसर्वंतिथिवारादिकंज्ञेयं। तथाचोक्तं। मूषकानांभयंभौमदे शलभकीटयोः नवापयेत्तिथौरिक्ते हीनेसोमेविशेषतः।
वृषलग्नेथवामीनेकन्यायांमिथुनेतथा। वापयेत्सर्वसस्यानिमेषेरीछे सस्यसंपदइत्यादि। लग्नबलंप्राग्वत्। सूर्यर्क्षादिरिति। सूर्येयुक्त
नक्षत्रादित्रतीयंतस्मात् ३।४।५।६।७।८।९।१०। अतिधृतिरिति कोनविंशतस्मात्। १९।२०।२१।२२।२३।२४।२५।२६। अष्टाष्ट
भिः नक्षत्रैः बीजवापः सत्सलः। अथद्वितीयभेदमाह। अन्येरिति। अन्यैः आचार्यैः फणिसप्तमाद्राहुसक्तमात्सकाशात् ७।८।९। ६२
१०।११।१२।१३।१४।१५।१६।१७।१८। रविमितैर्द्वादशभिर्नक्षत्रैर्बीजवापः शुभः प्रोक्तः। एतदुक्तंभवति। राहुर्यस्मिन्नक्षत्रेभवति

प्र

गुरुभंपुष्यः। अश्विनोअश्विनी। अंत्यंरेवती। ध्रुवाणिपूर्वोक्तानि। एतैर्नक्षत्रैः। तत्रयेबुधगुरुशुक्रवारे अंबरंवस्त्रंधार्यं। नान्यत्र। यतउक्तं। रवौजी
र्णंविधौस्तोकजलादिदुःखरंकुजे। बुधेधनंगुरौज्ञानंशुक्रेसौख्यंशनौमलमिति। लग्नबलंप्राग्वत्। अथक्षालनमाह। इहास्मिन्वस्त्रधा
रणोक्तेनक्षत्रादौक्षाल्यंप्रक्षालनीयं। कथंभूतेइह। हीनेबुधरहिते। उक्तंच। वस्त्रहेमाद्यलंकारधारणोक्तेश्वभादिभिः। क्षसंहीनेच
निर्माणंविदध्यात्क्षालनादिकमिति। यद्यपिपस्यांगेयदर्दोगिनेगदितभेकुर्यादितिपूर्वमेवअंगभूतंकथितंतथापिक्षालनेबुधवर्जनार्थं
हीनेइहसात्म्यमित्युक्तंबुधनिषेधश्रवणात्। उक्तंच। शनौसोमसुतेश्राद्धेषष्ठ्यमावास्ययोस्तथा। वस्त्रलाक्षालनंचैवदहत्यासप्तमंकुलमि
ति। अथोंदुरादिभक्षितफलमाह। आखुभक्षितमिति। आखुः उंदुरः तेनअंबरंमध्यात्रिभागेभक्षितंअसत्दुष्टफलंस्यात्। एतदुक्तंभवति
वस्त्रंत्रिगुणंकृत्वाग्रादिभक्षितभागोमध्यत्रिभागेपतति। तदानत्दुष्टमित्यर्थः। अखुरित्युपलक्षणं। तेनाग्निनगंगवादिभक्षितंमध्या
दिसंज्ञेयं। तथाचोक्तंरत्नराते। दग्धंचास्फुटितंचगोमयपमसीपं कौर्विलिप्तंतथादुष्टंमूषकघूस्कसेरशक्रभंदंमध्यत्रिभागेशुभमिति।
अथास्त्रियः रक्तवस्त्रधारणंभूषणधारणंअनुक्तग्रहगणांकुत्रकुत्रप्राशस्त्यंचाह। स्त्रीति। स्त्रीअत्रउक्तेवस्त्रधारणभादौअंबरंभूषणं
कृचर्णादिभूषणंबिभृयात्धारयेत्। कथंभूतेअत्र। व्यादित्यपुष्यध्रुवेविगतानिपुष्यध्रुवाणियस्मात्तत्तथातस्मिन्नुपतोत्रस्त्रियारक्त
वस्त्रभूषणधारणेदोषोदृश्यते। तथाचोक्तं। पुष्यादित्यध्रुवैर्धिष्ण्यैः स्वर्णरक्तांबरादिकं। नवंनभूषणंधार्यंनार्योदयतुरागयेछ्रति।
लग्न[illegible]प्राग्वत्। अथचंद्रादीनांप्राशस्त्यमाह। श्वेतेवस्त्रनिरोप्यमुक्ताफलादिकेअब्जश्चंद्रोहितः। सौमबरेश्वेतवस्तुधार्यमितिभावः।
कुजरवीअरुणरुक्मयोः शस्यते। शनिः कृष्णवस्तुनीलीवस्त्रादिकेशस्यतेशनौनीलत्यार्यमितिभावः। तत्रयेतुसर्वंधार्यमितिपुरेवोक्तं॥
अथनराणांभूषणमाह॥ ॥वस्त्रोक्तेभैनिलदृग्याश्विनिरुगेगेनुविभूषाहिताविप्राज्ञोत्सबलब्धिषूदितमुनुक्तेपीलुखधारणं॥
भेत्राकीनिलमूलरस्त्रहरिभेंद्रीज्याजपादित्रेपण्यानांक्रयविक्रयौघटपाराख्यंगे ३।६।१०।११। स्व २ [illegible] शुभ्रोन्नितु॥३॥ वस्त्रोक्तेभैरादिभिः

मु॰मा॰टी॰ श्री ... आग्रायणेन विनान भक्षणीयानि। वसंतसंभवानि यवाग्रयणेन विनान भक्षणीयानीति नियमादिकर्म ... शरद्वसंतयोः क्रियत इति। नव
अन्नप्राशनोदिनैस्तिथिभादिभिः मासेषष्ठेष्टमेवेत्यत्रोक्तैर्नवान्नकर्मकर्तव्यमित्यर्थः। नृत्तसंगीतमारंभमाह। मैत्रार्कोत्येति। मैत्रमनुराधा
६३ ।अर्कोहस्तः। अंत्यं रेवती। वसवो धनिष्ठा। उत्तरास्तिस्रः। ईड्यः पुष्यः। वरुणः शततारका। इंद्रो ज्येष्ठा। तैर्नृत्तं नमारभेत। संगीतकं च। कस्मि
न्सति। लग्ने वर्तमाने झे। गुरुवीक्षिते सति। केः हिबुकगेः सौम्यैश्चतुर्थस्थानस्थितैः। शेषं प्राग्वत्॥ ॥अथनानापशूनांकर्ममाह।
दीशार्केंद्वदितीज्यवासवशिवाश्व्यंत्याग्निपारींद्रभैः पूर्वाभिः शुभदाविसिंहभतनौनानापशूनांक्रिया। वारेष्वर्कचतुर्षु कोत्तरहरित्वाष्ट्रे
षमादिक्रियोरष्टम्यांनहितोदितास्वभगमेनस्याङ्द्दोषः किल॥ ८ ॥ दीशादिभिर्नक्षत्रैः विसिंहभतनौ सिंहरहितराशीनांमध्ये एकस्मि
न्लग्नेनानापशूनांक्रियाशुभदाउदिता। पशूनांक्रयविक्रयादिकर्मसुशुभंप्रोक्तमित्यर्थः। अथनृत्यमाह। अर्कचतुर्षुवारेषुरविचंद्रभौम
बुधवारेषु कोत्तरहरित्वाष्ट्रेषु कः रोहिणी उत्तरास्तिस्रः आसांसमाहारः कोत्तरं। हरिः श्रवणः। त्वाष्ट्रं चित्रा। एषुअमादिक्रियोः नानापशूनां
क्रियानुदिता। अपवादमाह। स्वभंगभेसतिभदोषः नक्षत्रदोषः क्वापि कर्मणि नस्यात्। लग्नबलंप्राग्वत्। उक्तंच। आदित्यद्विदस्रक सरक ७
आत्यार्केंद्रद्विशोक्रियादिगोः। दर्शंभूताष्टमीचित्राध्रुवक्रूरैर्गमाद्यसत्। सोमार्केवैधृतेपातेलग्नेपंचाननेबुधैः। भद्रासंक्रांतिरिक्तासुप
शुकर्मविवर्जयेत्। शुभग्रहोदयेशुद्धे निधनेस्वक्षयोनिषु। रक्षार्थंहि क्रियाशस्तापशूनांमुनिभिः स्मृतेति। तथाचागमांतरे। सोमेभौ
मेबुधेगावोनचाल्पास्तुरगाशनौविनि। अन्यत्र। पूर्वात्रयामृतमयूखबहूताशनेषु इंद्राग्निवाजिवसुवारुणशांकरेषु। एतेषुगोमहिषिदंति
तुरंगमादिनानाप्रकारपशुजातिगतिः प्रशस्तेति॥ ॥अथाश्वकर्माह। आदित्यद्विदस्रकस्थिराश्विभमृदुस्वात्यर्केमेज्ञेत्रयार्की
राङ्गीज्यभृगूदयेद्विकमदे ३।४।७। विद्दोक्रियाश्वीहिता। तत्राश्व्यर्कभतः क्रमात्तिथिमितैः पश्चात्रिभिः साभि जित्त्वस्तायान्त्समा ६३
तदुक्तमुखैः कार्यापरैर्निर्बुधैः॥ ९॥ आदित्यंपुनर्वसूपुष्यौ। द्विदस्रं धनिष्ठाशततारके। स्थिराणि। अश्विभंमृदूनि। स्वाती। अर्कोहस्तः।

तेः। ... तत्रयार्कोद्विः। तत्रयंबुधगुरुशुक्राः। अर्कः सूर्यः। आरोभौमः। एवंअहः दिनं। ईज्यभृगूदयेउदयेलग्नेउदयेईज्यभृगोदृतीज्यभृगूदयं। तस्मि
न्। गुरुशुक्रयुतेलग्नेइत्यर्थः। द्विक ३।४। मदेषु ७ इंदौ द्वितीयकं चतुर्थं मदः सप्तमं। एषु सतीत्यर्थः। आश्विक्रियाक्रयविक्रयादिकाहिताशुभक
र्त्रीस्यात्। अथाश्वचक्रमाह। तत्राश्वीति। तत्राद्यादित्यादिषु नक्षत्रेषु सत्स्वपि अर्कभतः सूर्यनक्षत्रात्तस्मात्क्रमात्तिथिमितैर्नक्षत्रैः पश्चा
दुक्रमतः त्रिभिर्नक्षत्रैः साभिजिद्यथातथा। आश्वीक्रियाशस्ताशोभनास्यात्। एवंसामान्यतोऽश्वकर्मोक्त्वेदानींविशेषमाह। येति। याअ
श्वीक्रियानृसमामनुष्यसदृशासाक्रियातदुक्तमुखैः कार्यातस्मैमनुष्याय उक्तानि भमुखानि नक्षत्रादीनि तैः कार्येत्यर्थः। परायान्त्समा
नभवतिसा एभिः सामान्यैः आदित्यादिभिर्बुधैः कार्येत्यर्थः। लग्नबलंप्राग्वत्। तथाचनारदः। विष्णौचचरभेक्षिप्रेमृदुभेचरभेषुच। वा
जिकर्माखिलं सूर्येवारेविशेषादित्यादि। तथाचोक्तं। घृताईचणकक्षीरतृणमुद्गादिभक्षणे। अन्नप्राशनवद्दिष्टं स्नानंसौम्यग्रहोदये॥
चौलोक्तंशुरकर्मोदोभेषुभेषजोदितं। गर्भाधानोक्तमश्वानां मैथुनेतुविलोकयेत्। गृहारंभोदितेकालेहस्तिशालाविधीयते। शिष्टाविद्यो
क्तकालेतुभूषणंभूषणोदिते। चर्मकर्मादिकंकार्यं जयोगेशुभोदये। एवंखरोष्ट्रादिकार्यंपूर्वोक्तेवाहनादिकमिति॥ ॥अथाभ्यंगनि
षिद्धकालमाह। भद्रासंक्रमपातवैधृतिसितेज्यार्कारषष्ठ्यादिषु श्राद्धाहेप्रतिपद्द्वयेपरिहरेद्धेतुंविनाभ्यंजनं। मांगल्यंविजयोत्सवेब्दि
वर्तनंदीपावलीहितवोऽभ्यंगस्यकथितादितैलमनघान्निंद्येद्विनित्यरिवले॥ १०॥ भद्रा। संक्रमः। पातोव्यतीपातः। वैधृतिः। सितः शुक्रवारः।
ईज्योगुरुवारः। अर्कोरविवारः। षष्ठ्यादयः सर्वास्तिथयस्तासु। ६।७।८।९।१०।११।१२।१३।१४।१५।३०। श्राद्धाहः श्राद्धदिनं। प्रतिपद्द्वयं।
प्रतिपत्द्वितीये। तस्मिन् हेतुकारणंविना अभ्यंजनमभ्यंगंपरिहरेत्त्यजेत्। कारणेसतिअवश्यंचरेदित्यर्थसिद्धं। तथाचोक्तं। सप्तम्यांनस्पृ
शेत्तैलंनवम्यांप्रतिपत्तिथौ। चतुर्दश्यांतथाष्टम्यांषष्ठ्यांचैवविशेषतः। ग्रंथांतरेपि। चतुर्दश्यष्टमीचैवपौर्णमास्यर्कसंक्रमः। तैलस्नानं
नकुर्वीतबंधु ... धनक्षयादिति। तथाचबृहन्मनुः। दर्शेस्नानंनकुर्वीतमातापित्रोस्तुजीवितोः। नवम्यां ... चनचेत्तत्रनिमित्तांतरसंभवः।

आरो भौमवारः ४

प्रतिपद्धनपक्षः स्यात्तृतीयायामपत्तिकः। दशम्यामधनस्नाने सर्वं हंति त्रयोदशी। रत्नमालायां। रविस्तापं कांतिं विनरति शशी भूमितनयो मृतिं लक्ष्मीं
चांद्रिः सुरपतिगुरुर्वित्तहरणं। विपत्तिं दैत्यानां गुरुरखिल भोगानुसंभवन्न नृणां तैलाभ्यंगात्सपदि कुरुते सूर्यतनयइति। अथाभ्यंगहेतूनाह॥
मांगल्ये विवाहादि। विजयोत्सवः आश्विनशुक्लदशम्यां क्रियते। अब्दवदनं संवत्सरप्रतिपत्। दीपावलिः प्रसिद्धा। एतेभ्यंगस्य हेतवः कार
णानि। एषु निषिद्धतिथ्यादावपि अभ्यंगः कर्तव्यः। तथाचोक्तं व्यवहारसारे। वत्सरादौ वसंतादौ सूतकांते महोत्सवे। दीपोत्सवचतुर्दश्याम
भ्यंगो नियमो न चेति। तथाचोक्तं स्कंदे विजयादशमीं वर्षं। निषिद्धमपि कर्तव्यं तैलाभ्यंजनमहरादिति। अथाभ्यंगनिषेधापवादमाह। कृ
थितादिति। निंद्येऽक्वथितादि तैलं अनसत् शुभं स्यात्। आदिग्रहणात्सार्षपसुगंधपुष्पवासितादि तैलं गृह्यते। एवं क्वथितादितैलं निंद्यदिनेपि शुभ
मित्यर्थः। उक्तंच। सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। द्रव्यांतरयुतं वापि न दुष्यति कदाचन। सूर्यशुक्रवारेषु निषिद्धापि तिथिष्वपि। पक्विवास्नाने
पक्वं तैलं न दुष्यति। रवौ पुष्पं गुरौ दूर्वां भौमवारे च मृत्तिकां। भार्गवे गोमयं क्षिप्त्वा तैलस्नानं करवावहमिति। अथ नित्याभ्यंगविशेषमाह। नित्ये
खलमिति। नित्याभ्यंगे अखिलं तैलं पक्वादिकं अंसत्। उक्तंच। नित्यस्नाने ... चकर्तव्ये तिथिदोषो न विद्यत इत्यादि॥ ॥अथप्रसंगेन ति
थामकस्नाने निषिद्धतिथीनाह। दिग्विश्वाद्रिदृगंकदर्शेतिषु स्नानं न धात्रीफलैः श्रीकामोथ बुधांबुपर्क्षेपितृभाभ्यंगा सतिध्यंगना। पुत्री
सोमदिने प्रसूर्यमपि लत्वाष्टें द्रमिश्रां बुपक्व्यादे स्वरभेकुपुत्रहरिजे स्नायान्निशास्वेपि न॥ ११॥ दिक् दशमी। विश्वे त्रयोदशी। अद्रिः
सप्तमी। दृक् द्वितीया। अंको नवमी। दर्शो अमावास्या। एषु तिथिषु श्रीकामः धात्रीफलैः आमलकीफलैः स्नानं न आचरेत्। तथाचो
क्तं। यः करोति दशम्यां च स्नानमामलकैः सह। पुत्रहानिर्भवेत्तस्य त्रयोदश्यां धनक्षयः। अर्थपुत्रक्षयस्तस्य द्वितीयायां न संशयः। अ
मायां च नवम्यां च सप्तम्यां च कुलक्षय इति। अथ स्त्रीणां बुधादिषु अभ्यंगनिषेधमाह। बुधो बुधवारः। अंबुपर्क्षे शततारका। पितृभं म
घा। तेषु अभ्यंगस्तस्मात्। अंगनास्त्री पतिघ्नी स्यात्। उक्तंच। स्नानं कुर्वंति या नार्यश्चंद्रे शतभिषग्गते। सप्तजन्म भवेयुस्ता विभु
गाद्दुर्भगा ध्रुवमिति। त्रिविक्रमशते। नार्यर्के शुक्रे च्याविष्टिसंक्रांतिपर्वसु। षष्ठ्यष्टद्विके त्रयोदश्यां स्त्रियस्तु ज्ञमघाबुधेः। अथ पुत्रवंतः सोमवार ६४

तस्माद्यत्सप्तमं नक्षत्रं तत्पूर्णिसप्तमुच्यते। तस्मात् द्वादशभिरित्यर्थः। राहोस्तु फणीति नाम ग्रंथांतरप्रसिद्धं। वराहमिहिराचार्येण राहुः
स्वरूपविकल्पा ग्रंथांतरोक्ता उद्घाटितास्वकृतसंहितायां। अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदं। प्राणैरपरित्यक्तं ग्रहतां
यातं वदंत्येके। इंद्वर्कमंडलाकृतिरसितत्वात्किल न दृश्यते गगने। अन्यत्र पर्वकालाद्वरप्रदानात्कमलयोनेः। मुखपुच्छविभक्तांगं भुजंगमा
कारमुपदिशंत्यन्ये। इति भुजंगमाकारकथनात्फणीत्यभिधानं प्रसिद्धं। रत्नमालायामपि। फणिभाद्वीजोप्तिकालेस्फुटमिति। तथान्य
ग्रंथांतरे। राहुभादष्टमे वह्नीनो मोपरिवर्तयेदिति। अथ धान्यछेदनमाह। तच्छेदनं वापभैरिति। तेषां धान्यानां छेदनं वापभैर्बीजवापभैर्नक्षत्रैः
प्रोक्तं। ननु पस्यांगं मरदोगिनो गदितभैकुर्याद्दितिपुरेवोक्तं तत्कथं पुनरुक्तं वच्छेदनं वापभैरिति। सत्यं। कृषिनक्षत्राणां बीजनक्षत्राणां च
किंचित् भेदोस्ति द्वयोः आप्तरूप्यत्वात् कैः कार्यमिति। संदेहनिवारणार्थं तच्छेदनं वापभैरित्युक्तं॥ ॥अथ निष्पन्नधान्यक्रमप्राप्तं
मेथीरोपणमाह। मेथीं क्षीरतरोरुफा ... नुरहिते रुद्वाहभैरोपयेदन्नप्राशनवद्वसंतशरदोः प्रोक्तं नवान्नं बुधैः। मैत्रार्कांत्यवसूत्तरेज्यव
रुणेः सेंदौ शुभैर्नर्तनं लग्ने ज्ञेगुरुवीक्षिते हिबुके ... सौम्येश्च संगीतकं॥ ७॥ क्षीरतरोः वटप्रक्षादेर्मेथीं उद्वाहभैर्मूलांत्यार्केत्यादि
भिरारोपयेन्निखनेत्। मेथिर्नाम खले धान्यमर्दनार्थं खपंक्तियोजनार्थं काष्ठमारोप्यते। मेथ्यंते संगम्यंते खपभा अस्मिन्निति मेथिः
पुंसि मेथिः। खले दारुन्यस्तं यत्पशुबंधनमित्यर्थः। किंलक्षणैः उद्वाहभैः उफानुरहितैः उफा उत्तराफाल्गुनी। अनुराधा। नाभ्यां हि
दैतैः। उक्तंच। रोहिणी रेवती मूलं स्वाती हस्तामृगस्तथा। वटश्च सप्तपर्णश्च भंगारीशाल्मलीतथा। औदुंबरीतथा धात्री या चान्या
क्षीरवाहिनी। स्त्रीनाम्नि कर्षके नित्यं मेथीकार्या फलप्रदेति। नवधान्यप्रसंगेन नवान्नकर्माह। तस्माद् अन्नप्राशनोक्तं तिथिवारा
दिकमपि ग्राह्यं। सान्निकस्य नवान्नकर्मणा विना व्रीह्यादीनां नवनवमितं नो धान्यानां भक्षणे दोषप्रसंगाद् आवश्यकं कर्मैतत्।
नवधान्यानीमानि। व्रीहयो नवगोधूमानी वाराः कंगुवेणवाः। शालयो मुद्गमाषाश्च नवनाद्यान्नवानि तु इति। एषां मध्ये शरत्संवानि धान्यानि

मु॰मा॰टी॰ वायुमूलजपौलेपांत्येंद्रहस्तांबुभेशांत्साजद्विपयोर्न्वपेनैदिवे नैरन्यत्र रुग्णो विरुक्. आदित्याह्यानिले ध्रुवांत्यपित्र्यभेश्रुक्रे दुर्वारेगदत्यक्तस्ना
नमनिष्टमिष्टमरु भेभाद्रो [illegible] खलास्त स्थिरे ॥१३॥ याम्यं भरणी। अहित्रयं आश्लेषात्रयं। वायुः स्वाती। मूलं। अजपः शततारा।
६५ उपांत्यं उभा २६ इंद्रो ज्येष्ठा। हस्तः। अंबु मं पूषा। २० अस्मिन् नक्षत्रगणे रुग्णः रोगी शांत्या यथोक्त शांतिके न रुक् ज्वरमुक्तो भवति। अजद्विप
योः श्रवणधनिष्ठयोः रुग्णः न्वपैः षोडशभिर्दिनैः विरुक् स्यात्। अन्यत्र अन्येषु नक्षत्रेषु रुग्णो नवदिनैर्विरुग्भवति। एतत् ज्योतिषार्काभि
प्रायं किंचिद्वलकौशाभिप्रायमुक्तं। तत्रयेषु नक्षत्रेषु ज्वरितस्य मृत्युरुक्तः। एषु चरल छेप च ब्रह्मभिर्दिनैर्ज्वरमुक्तिरुक्ता तत्फलमंत्रशांत्या
विरुगित्युक्तं। क्वचिदन्यथाफलदर्शनात्। तथायेषु नक्षत्रेषु सप्तभिर्नवभिरेकादशभिर्दिनैर्ज्वरान्निर्मो[illegible]चनमुक्तं तत्सलम[illegible] मध्यम
तेन नवभिर्दिनैर्विरुगित्युक्तं ग्रंथलाघवाय स्वल्पांतरत्वात्। तथाच ज्योतिषार्के। सप्ताहमृतिनं दशाद्विरुक् मृत्युनगाद्रिभिः। रुक्छूर
स्यमृतौ। शेश्वरु छे शव्य स्क नान्वपेरित्यादि। अथोक्तवर्त्यैन रोगमुक्तस्य स्नानमाह। आदित्येति। आदित्यं पुनर्वसुः। अहिरश्लेषा। अनि
लः स्वाती। ध्रुवाणि पूर्वोक्तानि। अंत्यं रेवती। पितृभं मघा। अस्मिन्नक्षत्रगणे शुक्रे दुर्वारे गदत्यक्तस्नानं अनिष्टं स्यात्। तर्हि कुत्र कर्तव्यमित्यत
आह। अरुभे भाद्रे इष्टं शुभं स्यात्। कस्मिन् सति। खलास्त स्थिरे सति। खलः पापग्रहः अस्तेयस्य तत्तस्य चलत्स्थिरं च तस्मिन् स्थिरल
ग्ने पापे सप्तमे सतीत्यर्थः। तथाचोक्तं। वैधृतौ व्यतीपाते च भद्रायां धिष्ण्यसंक्रमे। रोगमुक्तो नरः स्नायात्कुवारर्क्षे तिथिष्वपि। युतं पापयु
तं शस्तं दशमं च शुभान्वितं। सौम्यक्रूरयुतं चंद्रं रोगस्नाने विभं तथेति। चंद्रबलं सर्वत्र पोज्यं। क्रूतिथि भाद्रे मत्यनेन चंद्रादिबलविषये
मोहो माभूत्सदित्र चंद्रबलं सूचितं। यतः ग्रंथांतरे रोगमोक्षानेसदिदत्तविक्षुक्ते [illegible] तत्सर्वं कर्मसु ज्ञेयं। तथाचोक्तं स्पष्टं। स्नाया रोगविमुक्तस्तु रुफल
योश्चंद्रतारयोरिति॥ ॥अथ द्रव्यव्यवहारमाह। द्रव्यं संव्यवहारतो लघुचरैर्योज्यं चरांगे बुधे धर्मोष्टात्मजगे ५।८।५। थतस्सहरणे हस्तार विजे ६५
कुजः संक्रांतिभरणीत्रिपु [illegible] ष्करयमौ कुंभांत्सयोश्चंद्रमाद्य स्थिरैश्चैति शुभाविहूल [illegible] इह यत्कुर्याद्दूणं तत्स्थिरं ॥१६॥ द्रव्यं क्रूवणादि संव्यवहा

रतः कुसीदव्यवहारेण लघुचरैर्नक्षत्रैर्योज्यं देयमित्यर्थः। क्व। चरांगे चरलग्ने। कस्मिन् सति। बुधे धर्माष्टात्मजगे सति। धर्मो नवमं। अष्टमं।
आत्मजः पंचमं। एषु अन्यतमस्थानगते सतीत्यर्थः। अन्यत्सूर्वोक्तं ज्ञेयं। अथानंतरं तस्य द्रव्यस्य हरणं। पुनर्ग्रहणं तस्मिन्विषये हस्तोनष्ट
नं। रविः रविवारः। ज्ञो बुधवारः। कुजो भौमः। संक्रांतिः सूर्यसंक्रमणदिनं। भरणी। त्रिपुष्करयोगः। यमौ यमलयोगश्च ग्रंथांतरे प्रसिद्धौ
। रत्नमालायां। विषमचरणं धिष्ण्यं भद्रा तिथिर्यदि जायते। क्रूरगुरु शनिक्ष्मापुत्राणां कथं च नवासरे। मुनिभिर्निरूदितः सोयं योगस्त्रिपु
ष्करयोग इति। कुंभांत्सयोश्चंद्रमाः। धनिष्ठापंचकं स्थिरयोगोपि शुभः। हस्तादयो त्रसकीद्रव्यग्रहणे शुभाः। विद्वरे इति। हस्तांटीमृद्
णं कुर्यात्तत्स्थिरं स्यात्। तथाचोक्तं। चरे क्षिप्रे भ्रेवे लग्ने बुधे धर्मसुताष्टमे। व्यवहारादिना द्रव्यप्रयोगो मुनिभिः स्मृतः। भरण्यां सग्रहं कुर्यात्स
चैकं त्रैज्ञे पुष्करे। ऋणकर्म चरैः क्षिप्रैः ऋणच्छेदः कुजे हितः। पंचके पंचगुणितं त्रिगुणं चात्रिपुष्करे। यमले द्विगुणं प्रोक्तं हानिर्व्याधिकं बुधैः।
ऋणं भौमे न कुर्वीत न देयं बुधवासरे। ऋणच्छेदं कुजे कुर्यात्संचयं सोमनंदने। हस्तार्कवारसंक्रांतौ यद्दणं स्यात्कुलेषु तत्। स्थिरयोगे तथा
ज्ञेयम् ऋणच्छेदं तु कारयेदिति॥ ॥अथ तीक्ष्णादिषु नष्टादिद्रव्यस्याप्राप्तिं तथा द्रव्यनिक्षेपं चाह। तीक्ष्णोग्रधुवमिश्रवासु बुधनं
ग नष्टादिकं नैति काद्रे ब्याप्त ४ त्रिरव शेषयोर्न बुनमेत्यं त्यां बु ॥१७॥ श्रुस्रोक्षिपेत्। विद्यांसोकवदिदृदे चनिधिमे ऽ थद्दृीशमूल
भुवे मृदु क्षीज्यकरो बुपे सुजलस्वाल्लांगेत रूत्वरोपयेत् ॥१८॥ तीक्ष्णोग्रं ध्रुवमिश्राणि पूर्वोक्तानि। वायुः स्वाती। एषु नष्टादिकं ध
नं नष्टप्रयुक्तविनिक्षिप्तादिकं सुवर्णादिद्रव्यं नैति। नागच्छतिकात्रारोहिणी नक्षत्रात् तिभे ऐंद्रे नक्षत्रे अब्याप्ते न्वनुभिर्भक्ते सति त्रिर
वशेषयोः गतं नश्यति। अथ द्रव्यनिक्षेपमाह॥ अंत्यांबुभुग्योक्षिपेत्। धनमित्यनुषंगः। अंत्यं द्वादशं। अंबु चतुर्थं। अनयोः भु
वि पापग्रहराहित्यं तस्यां सत्यां क्षिपेत्। निक्षिपेदित्यर्थः। तथाचोक्तं। साधारणाग्नतीक्ष्णेषु स्तां तो द्रव्यं न लभ्यते। दत्तं प्रयुक्तं निक्षिप्त
नष्टं चेत्साह नारदः। अथ नृसिंहारिमंत्रविद्यासाधनमुहूर्तं तथा [illegible] क्षरोपणमुहूर्तं मुनः राधनाह। विद्यामिति। विद्यां मंत्रविद्यां प्रो

 कवत्तेदविद्योक्तभादौविद्यांभौंज्युक्तभादौविद्यायुक्ते। तथास्वदेवतिथिभेस्वेष्टदेवतिथिनक्षत्रेसाधयेत्। गुरुमुखात्गृह्णीयात्। इत्य
र्थः। तत्रागमोक्तमंत्रग्रहणेअनध्यायदोषोनास्ति। स्वसुस्वदेवतिथिभे इत्यनेनपरहृतः। तथाचोक्तं। मृदुध्रुवचरक्षिप्रेर्वारोकोथ
 भेसत्क्रिया। कार्याविद्योक्तसैर्दीक्षास्वदेवतिथिभेषुचेति। अथवृक्षारोपणमाह। द्वीशांविशाखा। मूलंध्रुवाणिपूर्वोक्तानि। मृदूनिच।
अश्विनी। इज्यः पुष्यः। करोहस्तः। अंबुपःशततारका। एभिर्नक्षत्रैःअंघ्रिपान्पादपान्रोपयेत्। कस्मिन्तुजलखे अंगे। अंगेअब्जः।
अब्जांगेतस्मिन्अब्जःजलचरराशिश्वंद्रोवातत्। अब्जांगमुच्यते। जलंचरंचजलखेचतुर्थदशमेयस्याअंगस्यतत्तस्मिन्नित्यर्थः।
शेषंपूर्ववत्॥ ॥अथवापीकूपादीनाह। उद्वाहर्क्षहरित्रयादितिहयेज्यर्क्षैस्तडागादयोऽज्ज्या अंशस्तनुगेःभितेदशमगेसिध्यंतिस
द्मरवे। राजेक्षाश्रवणत्रयध्रुवमृदुक्षिप्रैः स्वकेंद्रायगेः।१।४।७।१०।११। सौम्यैः शांतिकपौष्टिकेसचरभैरेतैःस्वधर्मोदये॥३६॥
उद्वाहर्क्षाण्येकादशसंख्याकानिपूर्वोक्तानि। हरित्रयंश्रवणत्रयं। अदितिःपुनर्वसुः। हयःअश्वि। नी। इज्यर्क्षंपुष्यः। एभिस्तडागादयो
जलाशयाःसिध्यंति। केन्द्रेज्यौस्तनुगेःशोबुधःइज्योगुरुःअब्जश्चंद्रः। जलचरराशिश्च। एतेस्तनुगेः। लग्नगेः। कु। सहते। मघ
हवासरइत्यर्थः। तथाचोक्तं। चित्रास्वातीपुनर्वसुमृगशिरोभलाश्विनीरोहिणीहस्तःपुष्यानिधेष्टकंशततभिषकमित्रोत्तराबुतौ॥
